न्नेनजुहोमीत्यत्सर्जनसूत्रेचतौगृहपक्वंसमीपेग्नेर्निधायाज्यमधिश्रयेदितिकारिका

यांचदृष्टमस्तिनात्रलौकिकंनोपक्वस्यश्रोतागौरस्मार्तोग्निहोमश्चाकाविशेषदर्शना
दृष्टकाश्राद्धेपूर्वेद्युःश्राद्धेपूपद्रव्यपक्षेवृत्तिकारिकयोगृहमिश्राउपादेयाअपूपेषु न्
जुह्याद्यदितिसिद्धापूपग्रहणदर्शनाच्चामाधवेवृहस्पतिः॥प्रस्थधान्यचतुःषष्टि
राकृतेःपरिकीर्तितंतिलानांतुतदर्द्धंस्यात्तदर्द्धंस्याद्धृतस्यतु॥व्रीहीणांचयवानांच
शतमाकृतिरिष्यतइतिमाधवीयेबौधायनवचनं॥तथास्मृत्यर्थसारे॥प्रस्थस्य
चतुःषष्टिभागपरिमितमेकमवदानंतंडुलानांयत्तद्द्वयमपिउत्तरोभ्यसीमितिसू
त्रात्न्यायः सिद्धइतिस्मृत्यर्थसारवचनाच्चबाधितंचेनाप्रधानाकृतेराकृतिप
रिमाणस्यचरितार्थत्वान्नदोषः॥उत्तराकृतिर्योधिकागृह्यतेसाइदंअंगंतत्रभूय
सीमितिवचनादत्राकृतिपरिमाणबाधः॥उत्तराकृतेरंगत्वंविधानंतुकात्यायन

ब्राह्मणेऽग्निहोत्रविषयेस्पष्टं॥सायाप्रर्वाहुतिःसाग्निहोत्रस्यदेवतास्मात्तस्यैजुहोत्य
थयोत्तरार्द्धेहुताजनमेवतस्मात्तामुत्तरार्द्धेजुहोतीति।अनेनोत्तराहुतेरंगत्वमवग
तं॥अतएवोत्तराहुतेःपूर्वमग्निनाशोहिरण्यउत्तरांजुहुयादितिसूत्रात्तदर्थमग्नु
त्पत्तिर्नाग्निप्राधान्यंचोत्तराहुतेरितिश्रौतवृत्तिः।तेनोत्तराहुतेःपूर्वंद्रव्यनाशोद्रव्यंसंपा
द्यतांजुहुयात्।सोत्तराहुतिःप्रर्वाहुतिंसंसृष्टांचेदापस्तंबोक्तंयत्रवेत्यतिमंत्रेणसमि
दाधानेप्रायश्चित्तं।तत्रापस्तंबसूत्रं।यदिवोत्तरयाप्रर्वामभिजुहुयात्तयत्रवेत्यव
नस्पतेऽगामयेतिवानस्पत्ययर्चासमिधमाधायेति॥यद्वानुक्त्वाव्याहृतिभिरेका
ज्याहुतिः।अनेनतत्तंसूत्रेणचसर्वेप्रधानाहुतीनांस्विष्टकृदाद्युगाहुतिभिःसंसर्गो राम
नकार्यइतिसिद्धं॥ ॥अथपत्नीकुमारीकर्तृकोहोमः॥ ॥सायमोपासनहोमंकरिष्ये ३७

त्रिःपरिसमूह्यपरिस्तीर्यपर्युक्ष्यहोमद्रव्यंसंस्कृत्यअ ग्नयेस्वाहाअग्नयइदं॰प्रजापत
येस्वाहाप्रजापतयइदं॥॰परिस्तरणादिविसृज्यपरिसमूह्यपर्युक्ष्यप्रातस्तप्रातरौ
पासनहोमंकरिष्ये।परिसमूहनादि॰सूर्यायस्वाहासूर्यायेदं॰प्रजापतयेस्वाहा॥
प्रजापतयइदंपरिसमूहनादीनिकुर्यात्।इतिपत्नीकुमारीकर्तृहोमः॥ ॥अथाप
मा ह्यकर्त्तव्योहमद्रव्यसंस्कारप्रयोगः॥ ॥देशकालसंकीर्तनादिपरमेश्वरप्रीत्यर्थंसायं
म प्रातरौपासनहोमंसंस्यकरिष्येइतिसंकल्प्यपूर्ववत्सायंकालीनाहुतिद्वयंहुत्वाप
र्युक्षणादिकंकृत्वाकंचित्कालंस्थित्वानिमील्यवा .पुनःपर्युक्षणादिसमित्क्षेपांतंकृ
त्वाशक्तःकर्त्तव्यप्रातराहुतिद्वयमप्रक्ष्यहुत्वोपस्थानंकुर्यात्॥एकैवचेत्समित्तदासा
यंहोमादावेव।उपस्थानेमंत्राः॥।हविष्यांतमितिपंचर्चस्यवर्गस्यआंगिरसोमूर्द्धन्वान्वा

मदेवोवासूर्यवैश्वानरोऽत्रिरृष॥प्रजापतेप्राजापत्योहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥
उपस्थाने०॥ॐ हविष्यांतमजरंस्वर्विदिंविस्पष्टस्याऽऽहुतंजुष्टमग्नौ॥तस्यभर्मणेभुव
नायदेवाधर्मणेकंस्वधयापप्रथंता॥गीर्णंभुवनंतमसापगूल्हमाविःस्वरभवज्जाते
अग्नौ॥तस्यदेवाःपृथिवीद्यौरुतापोरणयन्नोषधीःसख्येअस्यादेवेभिर्न्विषितोयज्ञे
येभिरग्निस्तोषाण्यजरंबृहंतं॥योभानुनापृथिवींद्यामुतेमामाततानरोदसीअंतरि
क्षं॥योहोतासीत्प्रथमोदेवजुष्टोयंसमांजंनाज्येनाऽऽघृणानाः॥सपतत्रीत्वरंस्याजगद्य
च्छात्रमग्निरऽऽघृणाज्जातवेदाः॥यज्जातवेदोभुवनस्यमूर्द्धन्नतिष्ठोअग्नेसहरोचने
न॥तंत्वाहेममतिभिर्गीर्भिरुक्थैःसयज्ञियोअभवोरोदसिप्राः॥प्रजापतेनत्वदिति राम
सर्वंसमानं॥पर्य्यूक्षणाद्यंगजातंसऽऽकुर्योत्॥ ॥अत्राश्वलायनस्मृतिः॥सायंप्रा ३८

तस्तनौहोमावुभौसायंसमस्यतु॥सायंकालस्यमुख्यत्वादग्निहोत्रमितिश्रुतिः॥समस्य
सायमारभ्यजुहुयात्सायमाऽऽहुतौ॥परिषिच्याऽऽहुतौप्रातर्ऽऽकृत्वातुपरिषेचयेत् हविष्यां
तंहिदैवत्यमितिस्मृत्योग्निदैवतं॥समस्यपंचभिर्ऋग्भिःप्रजापतेननित्यइतिस्मृ
तिचंद्रिकायांमरीचिः॥प्रवासेवाग्निहोत्रीयस्त्रिपंचाद्यश्वसप्तवा॥दातव्योहोमए
काहेसायंप्रातःपृथक्पृथगितिं॥तथाचात्रैवत्रिकांडे॥अथापरःसमासस्यप्रका
रःप्रतिपाद्यते॥सायंप्रातस्तनौहोमावुभौसायंसमस्यतु॥आपन्नोजुहुतेत्रसमि या
देकाथवाद्वयं॥सायंहोमस्यमुख्यत्वान्नदर्शंतंत्रमिष्यते॥चतस्रआहुतीःकुर्यान्न
त्रेदंसायमाऽऽहुतौ॥द्वेप्रातराऽऽहुतीसायंहोमेचैकासमिधंदि॥समित्कृत्वाद्वितीया
चेत्सामवेत्यातराऽऽहुतौ॥त्रिःसायंहोमवन्मंत्र्यात्रिःप्रातर्होमतत्रुचं॥उपस्थानंस

हुत्कार्यशेषंप्रहुतिरिष्यते॥इतिस्मृत्यर्थसारेप्येवंअत्रत्रिःसायंहोमवन्मृज्यादिति
वचनंद्रव्यपक्षेस्तुक संमार्गस्यावृत्तिपरं॥ ॥अथामयादिगुर्वापदिपक्षहो
मः॥तत्रदेशकालौनिर्दिश्यामयाधीपतौअद्यावधिचतुर्दशी सायमवधिकान्साय
मोपासनहोमानाहुष्येकतंत्रेणकरिष्ये इतिसंकल्प्यपक्षादौपक्षहोमःस्यात्समस्यो
मध्यतोभवेत्॥सायंप्रातःएथक्कुर्यादेकस्मिन्वानिमित्ततइत्यहुत्वात्प्रतिपदिसा
यंकालेसमित्पक्षेपांतंपूर्वजातंहुत्वाहुतिप्रमाणेनतंडुलान्पात्रद्वयेप्रतिपात्रंचतु
र्दशावारंगृहीत्वातिथिक्रमवृध्याह्नभ्यांगणनयान्यूनाधिकंवागृहीत्वाहोमकाले
प्रथमपात्रस्थानग्नयेस्वाहेतिसर्वान्जुहुयात्॥ततःप्रजापत्यर्थंगृहीतान्प्रजाप राम
तिपदंचतुर्थ्यंतंस्मरन्हुत्वोपस्थानाद्यंगजातंसहुत्कुर्यात्॥एवंद्वितीयायांप्रातर ३९

पर्व

द्यावधिआगामिप्रातरवधिकान्प्रातरोपासनहोमान्प च हुष्येकतंत्रेणकरिष्य
इत्या दिसर्वंसायंहोमवत्॥विशेषस्तुप्रथमपात्रस्थान्सूर्यस्वाहेतिजुहुयात्सा य
व यंकालेद्वितीयाहुतिंचहुत्वोपस्थानाद्यंगजातंसहुत्कुर्यात्॥इतिपक्षहोमः॥अ
थशेषहोमः॥यदाकदाचिन्मध्येआमयाद्यापन्नौतस्मिन्नहनिसायंकालेअद्याव
धिचतुर्दशी सायमवधिकान्सायंशेषहोमानाहुष्येकतंत्रेणहोष्यामीतिसंकल्पे
त्यादिपक्षहोमवत्॥पात्रद्वयशेषतिथिगणनयातत्संख्यांस्तंडुलान्प्रतिपात्रंगृहीत्वा
पक्षहोमवत्सर्वंकुर्यात्॥यथापरेद्युःप्रातःकालेअद्यावधिकान्प्रातःशेषहोमा
नाहुष्येत्यादिसर्वंसायंशेषहोमवत्॥आपत्त्वपिपूर्वपार्वणेद्यानैमित्तिकंपर्वेःइत्यहुं
प्रायश्चित्तप्रदीपेअनेनस्थालीपाकापकर्षानकार्यःमत्स्यांकांविना॥ ॥अत्रपक्ष

होमशेषहोमयोर्मूलंस्मृत्यर्थसारत्रिकांडमंडनयोः॥ ॥अथ यावार्तिमानामऋ
तोवाध्वगतोपिवा॥राष्ट्रभंगेधनाभावेगुरुगेहेवस न्नपि॥अन्येष्वेवंप्रकारेषुनिमि
त्तेष्वागतेषुच॥समानंतमग्निहोत्राणांयथासंभवमाचरेत्॥अग्निहोत्राणामित्य
ग्निहोत्रहोमतुल्यः॥स्मार्ताग्निहोमः॥यआहिताग्नेर्धर्मःस्यात्सऔपासनिकस्य
नुइत्यक्तेः॥अनातुरोप्रकासीचनिश्चिंतोनिरुपद्रवः॥पक्षहोमंनुयःकुर्योत्सचरे
त्यतिव्रतं॥आलस्येनलोभेनाश्रद्धयावापक्षहोमान्नसमस्येत्॥अनापदिपक्ष
होमेतंनुमनीषिणः प्रायश्चित्तंइत्यक्तंदीपे॥अग्नयेतंनुमलोतेजइमितिस्था
लीपाकः॥निमित्तानामिहैकेषांनिर्दिश्यैकंयदुच्यते॥तत्सर्वेषुनिमित्तेषुजानीया राम
त्प्रतिपादितं॥पक्षहोमान्नशेषान्वाशेषहोमानथापिवा॥समस्यजुहुयात्तत्रप्रयो ४०

गोपंक्तिरूप्यते॥अशेषान्यक्षादिपक्षांतावधिकान्॥शेषान्यत्किंचिदादिकान्॥ता
वदधिकान्॥प्रतिपदन्नयेत्सायंमापद्यन्यत्रवादिने॥यावंतोपवसथ्याहात्प्रा
ग्दिनानिभवंतिहि॥तावंतिपरिग्रहीमाच्चतुरुन्नयनानितु॥पात्रांतरसहाया
यांनित्यायांप्रहतोस्रुचि॥स्थूलंस्रुगंतरंवापिहुत्वातत्रसमुन्नयेत्॥एकासमित्स
हस्रोमःसहदेवचमार्जनं॥उपस्थानंसहत्कार्यंशेषंप्रहुतिरिष्यते॥एवमेवान्तर
वापिप्रातर्होमान्समस्यतु॥जुहोत्योपवसथ्याहप्रातर्होमावधीन्सहत्॥समारो
पविधानंसमारोपयतेनत्वान्॥यथार्थंतथवाधार्योन्धारयत्यवरंवत॥ ॥
एवंप्रतिपदान्यत्रयत्रापदुपजायते॥तथैवापवसथ्यात्प्राक्तयैत्यापहिनरूप त्र
ति॥तृतीयायांचतुर्थ्यांवापंचम्यामितरत्रवा॥तदादीनांतदंतानांहोमानांस्यात्समस

ता॥आपदेवावधिर्होमसमासस्याप्युपेयते॥तस्मात्कदाचिदारभ्यायावत्तावतो
पिवा॥आपत्कालसमान्होमान्समस्यैकपक्षजान्॥अतएवद्विरात्रायत्रिरात्रा
याधिकायच॥समस्यजुह्वामाद्योमान्नित्येवंपठ्यतेकैः॥प्रवासिनोग्निहोत्रस्यप
चूहंसत्वापुनः॥सायंप्रातःपृथग्घोमएकस्मिन्नहनीत्यपि॥एवमेकत्रपक्षत्रये
होमास्तेषामशेषतः॥न्यूनानांवासमासःस्यान्नपक्षांतरवर्त्तिभिः॥स्मृत्यर्थसारे
प्येवं॥॥चंद्रिकायांमरीचिः॥शरीरापद्भवेद्यत्रभयाद्वाग्निःप्रजायते॥तथान्यास्व
पिचापत्सुपक्षहौविधीयते॥आपस्तंबोपि॥यायावराहवैपुराऋषयआसन्॥
तेध्वन्याम्यन्॥तेईमासायाईमासायाग्निहोत्रंजुह्वतीति॥समस्यपक्षशेषहो
मेषुसर्वत्रापिपर्वणिसायंहोमःपृथगेव॥तथाचप्रतिपदिप्रातर्होमः पृथगे

वानुक्तंतत्रैवसर्वेषोपवसथ्याहे सायंहोमैःपृथग्भवेत्॥तथैवयत्तुनीयाहेप्रा
तर्होमोभवेत्पृथक्॥स्मृत्यर्थसारेप्येवं॥अत्यंतापदादिनापर्वणिसायंहोमः पृ
थक्तुंनशक्यश्चेत्तदापूर्वैःसहसमासः॥तदुक्तंतत्रैव॥सर्वोपवासशून्यंचेत्मासंके
नापिहेतुना॥तदातत्सायंहोमापिपूर्वैःसहसमस्यते॥उपवासशून्यंनामान्वाधा
नशून्यंपर्वसर्वोपवासशून्यमित्येतद्यदाकेनचिन्निमित्तेनभाविपर्वण्यन्वाधानं
भविष्यतीतितदातंतदातत्सायंहोमस्यपूर्वैःसहसमासः।अत्रपर्वांतेपृथग्घोमप
क्षादौचपृथग्घोमइत्यत्रेपिमैत्रायणीयपरिशिष्टेअमुथग्घोमइत्युक्तंतच्चैवं
॥॥ऋषयोहस्मयमायुकाआसन्।तेग्निहोत्रेणातपंस्तेसमस्यहोमानपश्यंस्ते
थाद्विरात्रायषड्रात्रायार्द्धमासायमासायाग्निहोत्रमजुह्वुस्तस्माद्योयावरंग्राम

याव्यान्नोवार्द्धमासायाग्निहोत्रंजुह्वतिति॥एवंपर्वावधिरेवपक्षहोमइत्यर्थः
तावच्चेदापन्नापगच्छेन्नदापक्षांतरेपिपक्षहोमः कार्यः।तदेवोक्तंत्रिकांडमंड
ने॥तावतानोगच्छेच्चेदाप त्यक्षांतरेपिच॥पुनस्तत्रापिकर्त्तव्यःसमासःपथगेव
हि॥स्मृत्यर्थेसारेप्येवं॥पक्षांतरस्थानंहोमानांपूर्वपक्षगैर्होमैर्नसमासः॥तदु
क्तंतत्रैव॥नतुपक्षांतरस्थानांसमासश्चोद्यतेमिथः॥एवमापद्गतेपक्षेपक्षेचै
वंसमाचरेत्॥स्मृ०ल०प्येवं॥पक्षहोमविषयेतृतीयः पक्षहोमोनकर्त्तव्यः॥
तदुक्तंतत्रैव॥तृतीयेनंतरंपक्षसमासंनसमाचरेत्॥कर्मणःपक्षद्वयंचैवप
क्षहोमेनियम्यते॥पक्षत्रयेपक्षहोमेहृतेग्निनाशः॥हृतेषुपक्षहोमेषुपक्ष राम
त्रयमनंतरं॥कर्त्तव्यंपुनराधेयमितित्रिकांड्यामुक्तत्वात्।पक्षद्वयेपक्षहोमे ४२

हृतेपितावतापन्नापगच्छेन्नदातृतीपक्षेक्वेशेनापिदिनेदिनेएथग्योमान्निर्वर्त्त्यपक्षां
तरेपुनर्यथेष्टंपक्षहोमादिकमाचरेत्॥तदुक्तंतत्रैव॥तावतानापगच्छेच्चेदापत्पक्षे
तृतीयकेक्वेशेनापिविनिर्वर्त्यतत्रहोमान्दिनेदिने॥पक्षांतरेपुनःकामंपक्षहोमा
दिकंचरेत्।स्मृ०प्येवं॥एवंहृतेष्वापन्नापगच्छेन्नदायावज्जीवंअविच्छिन्ना
न्पक्षहोमान्कुर्यात्।नतत्रपक्षगणनावधिः।तदुक्तंतत्रैव॥आपच्चेदनुवर्त्ततदी
र्घकालंकथंचनायावज्जीवमविच्छिन्नान्पक्षहोमान्समाचरेत्॥आपदेवावधिस्तत्रा
नपक्षगणनावधिरितिस्मृ०प्येवं॥केनचिदापदादिनिमित्तेनपक्षहोमेहृतेसति
तत्रांतराळेआपच्चेदपगच्छतितदाकालमात्रःपुर्होमाः [illegible] कर्त्तव्याः।तदुक्तंतत्रै
व।दीर्घंपदंमत्वापक्षहोमे हृते सति॥तत्रांतराळेयद्यापत्कदाचिदपगच्छति।काले

ROYAL ASIATIC SOCIETY LIBRARY BOMBAY BRANCH

नू

कालेपुनर्होमाञ्जुह्वयाद्घृतानपि॥कश्चेद्घृतंविद्युःकेचिन्नेत्युक्तत्रपुनर्हुतमितिस्मृ॰
प्येवं॥स्मृतिचंद्रिकायामतएवमरीचिः॥पक्षहोममथोदृत्यागत्याकस्मान्निवर्तितः॥हो
मंपुनःसकुर्वीतभवेच्चेन्नसदोषभाक्॥सदोषभागितिश्रवणादत्रापिविकल्पःप्रती
यते॥अत्रसर्वत्रापियदेवसायंद्रव्यंतदेवप्रातर्द्रव्य मितिप्रागुक्तमनुसंधेयं॥॥पा
र्वणेत्रसमासास्तेसर्वेसायमुपक्रमाः॥प्रातःकालापवर्गाश्चनतुप्रातरुपक्रमाः॥स्मृ॰
य वं॥अत्यंतापन्नौनैवंनिमित्त्याह॥प्रातर्होमादिकायद्यप्रातश्चेदापदागतासारप्पवं॥
ष अत्यंतापन्नौपुनर्विशेषमाह॥तथाश्वीपराह्णौदोनिमित्तेचसमस्यति॥श्वोभूतेप्रातर्हो
माः॥समस्यकर्त्तव्याः॥अपराह्णेसायंकालात्प्रागेवसायंहोमान्कुर्यादित्यर्थः॥यदिसा राम.
यंकालप्रतीक्षणंकर्त्तुमशक्यं॥पक्षहोमस्यत्वेकस्मिन्चानिमित्तेइतियदुक्तं॥तदेना ४३

त

दृशापदिषयं॥पक्षहोमाद्येतदंतविषयेपुनायंश्चित्रसूत्रमपिमूलमस्ति॥मत्स्यशंकायां
विशेषमाह॥श्वेपक्षेतुरात्रौचेन्मत्स्यशंकाग्निहोत्रिणः॥सायंकृत्वातथैवायंजुह्वया
न्मातराकृतीः॥स्मृत्य॰वे॥श्वेपक्षेशुक्लपक्षेरात्रिहोमंकृत्वाप्रातर्होमंकुर्यात्॥न
तुसकलपक्षानित्यर्थः॥कृष्णपक्षेहमरणेप्रातराकृतिमारभ्यरात्रिमरणेसायमा
कृतिमारभ्यपक्षहोमवत मरणादि नादिदर्शादिनसंख्ययाचतुश्चतुस्त्रआकृ
तीर्जुहुयात्॥दर्शेस्थालीपाकंचकुर्यादित्याह॥यदित्वपरपक्षेस्यान्मत्स्यशंका
ग्निहोत्रिणः॥तावत्तिष्ठाश्वपक्षेस्मिन्जुहुयात्सकलाकृतीः॥स्मृत्य॰॥दर्शेपिंडान्व
तःकुर्यात्॥अग्निहोत्रद र्शेपिंडान्वाहिताग्नेरुपासनहोमस्थालीपाकसाधा
रणाविनियोक्तारः॥यआहिताग्नेर्धर्मःस्यात्सओपासनिकस्यात्इतिप्रकरणांतेश्रवणा

पा

दिनिभावः॥ननुसकृत्प्राकृतीः किंप्रातराकृतिद्वयंसमाप्यततःसायकृतिद्वयंसमाप्यपु
नस्तथैवकर्तव्यं॥अथवासर्वीःप्रातराकृतीः संपाद्यततः सायमाकृतीरित्येकाःमत
द्वयसन्निधितीयइतिन्यूनः॥नदुरुंकारिकायां॥शुक्लपक्षेप्रमीयेतयद्यग्निप्रातरा
कृतीः।शेषास्तुजुहुयादर्शपर्यंताः पक्षहोमवत्॥तदानीमेवजुहुयात्सायंकालाकृ
तीरपि॥सायंम्रियेतचेत्सायमाकृतीर्जुहुयादपि॥तदानीमेवजुहुयात्प्रातःकालाकृ
तीरपि॥सकृद्गृहीतमंत्रेषु नतत्रहोमयोः॥दर्शेचापिप्रकुर्वीतस्थालीपाकंतथैवहि
होमदर्शेचकर्तव्योपनर्यदिनजीवति।भिन्नंतत्रसायंहोमतंत्रंसमाप्यप्रातर्होमतं
त्रंस्वतंत्रमित्यर्थः॥एवंविपर्ययेतिः॥इष्टिर्यदिनसंभवेत्॥देवतानांप्रधानानामेकैक रात्र
स्यैरथकृथक्॥पुरोनुवाक्यायाज्याभ्यांचतुरोघृताकृतीः॥जुहुयादेवमन्यत्रस ४४
हु

र्वत्रयदिदृश्यते॥पुरोनुवाक्येत्यादिश्रोतंत्रमिदंसंस्कारपरं॥प्रकृतेतुनाममंत्राएवग्राह्याः॥अ
यमाशयः॥सर्वेष्टितंत्रकरणसंभवेआज्यसंस्कारादिकंकृत्वाएकैकस्यैप्रधानदेव
तायैचतुर्गृहीताभिराज्याकृतीर्जुहुयात्तावतैवेष्टिःकृताभवति।एतावत्पर्यंतंमरण
यां शंकौकार्यं॥जीवतएवएषविधिरुक्तः॥ ॥मृत्यूशंकांविनासर्वत्रापिपूर्वेपार्वणस्था
लीपाकयोर्नेप्रतिकर्षः॥प्रायश्चित्तमदीपेआपत्त्वपिपूर्वेपार्वणेष्वानेप्रतिकर्षइ
न त्युक्तत्वात्मृत्यूशंकवद्रचनाभावाच्च॥एतदंतंसर्वैत्रिकांडमंडनानुसारेणोक्तं॥ ॥
अथतस्मिन्मृतेपुत्रादिविशेषमाह॥आहिताग्निःकदाचित्स्यात्कृष्णपक्षेमृतोयदि।
तदाशेषाकृतीःसर्वाजुहोतीत्याश्वलायनः॥अन्येतदेवदार्शेपिंकुर्युःकृष्णमृतस्य
तु॥शुक्लपक्षेनिशिप्रेतस्येष्टिंप्रातराकृतीः॥यआहिताग्नेर्धर्मस्यात्सौपासनि

कस्यतु॥इतिशाखायनकमाचष्टेब्राह्मणमत्रतु॥अन्येपुत्रादयःमरणानंतरंपूर्वोक्त
हुतिंकुर्युरित्यर्थः॥इत्थंकृत्वास्मृत्यर्थसारे॥अथशौचेहोमविधिः॥तत्रजननेशावा न
शौचयोःऋत्विगादिनासायंप्रातर्होमौकारयेत॥स्वयंचद्रव्य त्यागंकुर्यात॥ऋ
त्विगाद्यन्याभावेतुआशौचपर्यंतंसर्वंशेषहोमविधिनाहोमान्कृत्वावक्ष्यमाणेना
ग्निसमारोपप्रकारेणाग्निंसमारोपयेत॥नात्रसर्वथोपवसेत्याहसायंहोमः पृथग्भ
वेदित्यादिनियमः॥अनन्यगतिकत्वात॥अथवाआशौचपर्यंतंसर्वस्मान्नीग्निरात्मनो
न्येषामभावेसूतकादिषुसमारोप्यतदंतेतुविहृत्यजुहुयात्स्वयमितिनिर्णयसिंधा
वाश्वलायनवचनात॥शेषहोमार्थंकृत्वापिवक्ष्यमाणेनाग्निसमारोपप्रकारेणाग्नि ग्रम
समारोपणंकृत्वासूतक निवृत्तौस्नात्वाकृतनित्यक्रियोग्निंप्रतिष्ठाप्यप्राणाना ४५

यम्यदेशकालेसंकीर्त्यममनित्यहोमातिक्रमजन्यदोषपरिहारार्थंप्रायश्चित्तपूर्वकं मृति
कांतहोमान्करिष्यइतिसंकल्प्यपरिसमूहनादिकृत्वाग्नेःपश्चिमतःसपवित्रेपात्रे
ना आज्यमासिच्यांगारौयतनाद्दूतरतोबहिःकृत्वातघाज्यपात्रंनिधायतृणनावज्वल्य
दर्भाग्रहयंक्षिप्त्वातेनैवत्रिःपर्यग्निकृत्वात्मुकंनिरस्यकर्षन्निवोदगुद्वास्य।अंगा
रानतिसृज्यसवितुःप्रसूतमंत्रेणसकृद्दुस्तूष्णीमेवंत्रिरुत्सृज्यपवित्रमोक्ष्याग्नेःप्रहृत्या
ज्यंपश्चिमतोदर्भेघासाद्यस्रुवेणस्रुचिंगृहीत्वाज्यमवेक्ष्यसुवेणस्रुचिंगृहीत्वाज्यमा चतु
ज्यंविलिन्नंयत्नंसमिंदधातु॥पाहिष्टेत्रयसोयाअग्नयइष्टास्तासंतनोग्निहविषाघृते
नस्वाहाज्यातिपदंनमंमंत्रेत्यजेत॥आद्यादशदिनादेवंप्रायश्चित्तंतदूर्ध्वंचेदग्नि
नाशः॥तदेवाकृंकारिकायांनित्यहोमेत्वतिक्रांतेसंस्कृत्याज्यंचपूर्ववत॥चतुःकृत्वा

गृहीत्वाज्यंमनस्त्वत्याजुहोत्यथ॥आघाद्याद्यादिनादेवमूर्ध्वंविछिद्यतेनत्वइति॥सर्वेषां
ज्ञातानांहोमत्वोपनामकेवमनोज्योतिरितिचतुर्गृहीताहुतिः॥अग्निहोत्राहोमे
चेतिविशेषात्केचित्प्रतिहोमंवा॥कारिकायामप्याघाद्याद्यादिनादित्यनुवृत्तेश्च॥
ततोतीहोमार्थेचपूर्वन्नेडुत्वान्तंसंस्रुत्यनित्यहोमवत्परिसमूहनादिसमित्पर्यु
पांतं नेत्रपूर्वकमतीतकालादारभ्यक्रमेणाहुतीर्हुत्वातत्कालहोमंच
हुत्वाग्निसूर्यप्रजापतिंचोपस्थायपरिसमूहनाद्यंगजातंसंस्कुर्यात्॥प्रयोग
रत्नेअर्तीतहोमान्कुर्यादित्यनुवृत्तेयत्रपक्षद्वयंतदेवकारिकायांप्रायश्चित्तहुतेप
श्चादर्तीतमपिकर्मेवा॥कार्यमित्येकआचार्योनेच्छत्यन्यविपश्चितइत्यनुवृत्तेवा॥ राम
ग्निहोत्रहोमेचप्रतिहोममेकएतत्सूत्रइत्येकस्मिन्पक्षेअतीतहोमानपिकु ४६

र्यादित्यनुवृत्तेश्चविकल्पःइत्याशौचेहोमविधिः॥ ॥प्रसंगाज्जननाशावशौचयोःपिं
डपित्रयज्ञस्थालीपाकादिकंश्रवणाकर्माश्वयुजीकर्मेचवक्ष्यमाणप्रणीतासंस्कारा
न ऋत्विगादिनाकारयेत्॥अत्रयजनंनकार्यंकालांतरसाध्यत्वात्॥प्रत्यवरोहणंआ
श्वलायनोपि॥स्मार्ताग्निःसूतकेशावेस्वयंनजुहुयाद्द्विजः॥निर्णयसिंधौ॥सूतके
समनुप्राप्तेस्मार्तकर्मैकथंभवेत्॥ पित्रयज्ञंचस्थालीहोममसपिंडेनकारयेत्॥इति
चस्थालीपाकः॥श्रवणकर्मादिश्रौतिवित्तानेश्वरः॥प्रारब्धंतुसपिंडेनापिकार्यंन
चेतत्कर्मेकुर्वाणः सनाभ्योप्यशुचिर्भवेदितिमनूक्तेः॥विवाहाद्युन्नयंपिंडदाननि
षेधोपित्रिभिःपिंडैःपिंडपित्रयज्ञःकार्यएवपिंडयज्ञेचसोमेचपिंडोदधुरवतेः॥ते
पिंडाः॥अत्रपित्रयज्ञःस्मार्ताग्राह्यः॥श्रौतेनैवश्रौतसिद्धेः॥पार्वणश्राद्धंतुसाक

त्यितं॥नतत्रपिंडदानं॥तन्निषेधोक्तेः॥अत्रैतद्विषयदार्ढ्यार्थंग्रंथांतरोक्तंसिद्धमे
वसंगृह्यते॥तत्रविज्ञानेश्वरेणायज्ञिक्षाध्यायेश्रुतित्वेनसकलश्रौतस्मार्तकर्मो
धिकारनिवृत्तौप्रसक्तायांकेषुचिदभ्यनुज्ञानार्थमाह॥वैतानोपासनाःकार्याःक्रि
यास्वश्रुतिचोदनात्॥वितानाग्नीनांविस्तारस्तत्रभवोवैतानः स्मृताग्निसाध्या
ग्निहोत्रदर्शपूर्णमासाद्याक्रियाउच्यंते॥वैतानोपासनावैदिक्यक्रियार्थाः॥कथंवै
दिकत्वमितिचेत्॥श्रुतिचोदनात्॥तथाहि॥यावज्जीवमग्निहोत्रंजुहुयादित्यग्निः
श्रुतिभिरग्निहोत्रादीनांचोदनास्पृष्टैवातथा॥अहरहःस्वाहाकुर्याद्दर्शभावेके
नचिदाकाष्ठादितिश्रुत्योपासनहोमोपिवेष्टते॥अत्रचश्रौतत्वविशेषेणोपादा राम
नात्स्मार्तक्रियाणांदानादीनामनुष्ठानंगम्यते॥अतएवव्याघ्रपादेनोक्तं॥स्मा ४७
व

रा र्तकर्मपरित्यागोहोरन्यत्रसूतके॥श्रोतेकर्मणिनत्कालंस्नातःशुद्धिमवाप्नुया
दिति॥श्रौतानांचकार्यत्वाभिधानंनित्यनैमित्तिकाभिप्रायेणयथाहपैठिनसिः॥नित्यानि
मित्तैरन्यत्रवर्जेराज्ञाग्नेश्चेकइतिनित्यानिमित्तवर्जंनित्यविशेषणावश्यकानां र
नित्यनैमित्तिकानांनिवृत्तौप्रसक्तायांवैतानवर्जमितिअग्नित्रयसाध्यावश्यकानां
पर्युदासः॥शालाग्नेश्चेकइति॥गृह्याग्नेश्चभवानामप्यवश्यकानांपाक्षिकपर्युदा
सउक्तः॥आस्तेधानशौचंनास्त्येवकाम्यानांपुनःशौचाभावादननुष्ठानंमनुना
प्यनेनैवाभिप्रायेणोक्तं॥प्रत्यहंनाग्निषुक्रियाइति॥अग्निषुक्रियानप्रत्यहंदित्य
ग्निसाध्यानांपंचयज्ञादीनांनिवृत्तिः॥अतएवसंवर्तः॥होमंतत्रप्रकुर्वीतस्रुक्स्रुवे
नफलेनवा॥पंचयज्ञविधानंचनकुर्यान्मृत्कजन्मनारितिवैश्वदेवस्यअग्निसा

ध्यत्वेपिवचनान्निवृत्तिः॥विप्रोदशाहमासीतवैश्वदेवविवर्जितइति तेनैवोक्त्वा
त्॥सर्वैककर्मणांत्यागःसंध्यादीनांविधीयतइति॥यद्यपिसंध्यानिवृत्तिश्रूयतेतथा
पंजलिप्रक्षेपादिकंकार्यंसूतकेसावित्र्याचां जलिंप्रक्षिप्यप्रदक्षिणंकृत्वासूर्ये
संध्यायांध्यायन्नमस्कुर्यादितिपैठीनसिस्मरणात्॥यद्यपिवैतानोपासनाकार्या
इतिसामान्येनोक्तं॥तथाप्यन्येनैवकारयितव्यं॥अन्येनतानिकुर्युरितिपैठीनसि
स्मरणात्॥बृहस्पतिनाप्युक्तं॥सूतकेमृतकेचैवअश्नीयाद्ब्राह्मणोयदि॥प्रवासा
दिनिमित्तंवाहवयेन्नतुहापयेदिति॥तथास्मार्त्तेत्वेपिडयज्ञस्रुवणाकर्मोश्व
युज्यादिकश्चनित्यहोमः कार्यएव॥सूतकैसमुत्पन्नेस्मार्तंकर्मकथंभवेत्॥पिं राम
डयज्ञंचरुंहोममसगोत्रेणकारयेदिति॥जातकर्म्यश्रवणात्॥यद्यपिसांगेकर्म ४८

तुर

गा१

ण्यनन्यकर्तृत्वंतथापिस्वइव्यात्मकंप्रधानंस्वयंकुर्यात्॥तस्यानन्यनिष्पाद्य
त्वादेतएवोक्तंश्रोतेकर्मणितत्कालंस्नानःशुद्धिमवाप्नुयादितियःपुनर्दानंप्रति
ग्रहोहोमःस्वाध्यायश्चनिवर्त्ततइतिहोम प्रतिषेधःस्वकाम्याग्निप्रायोवैश्वदे
वाग्निप्रायोवाः व्यवस्थानीयः॥तथासूतकान्नभोजनमपिनकर्त्तव्यं॥उभयत्र
दशाहानिकुलस्यान्नंनभुंजतइति॥यमस्मरणात्॥उभयत्रजननमरणयोर्दे
शाहानीत्याशौचकालोपलक्षणं॥कुलस्यसूतकयुक्तस्यसंबंध्यन्नंनासकुल्यै
र्भोक्तव्यं॥सकुल्यानांपुननैदोषः॥सूतकेतुकुलस्यान्नमदोषंमनुरब्रवीत्॥
इतितेनैवोक्त्वात्॥अयंचनिषेधोदातृभोक्रोरन्यतरेणजन्ममरणेज्ञातेद्रष्ट
व्यः॥उभाभ्यामपरिज्ञातेसूतकंनैवदोषकृत्॥एकेनापिपरिज्ञातेभोक्तुर्दोष

मुपावहेदिति।षट्त्रिंशन्मतेदर्शितः॥इतिमिताक्षरायां॥अथस्मृत्यर्थसारे॥आचा
राध्यायेपक्षहौदिनिर्णीयते॥॥संध्यामिष्टिं चरुंहोमंपावज्ञावंसमाचरेत्॥नत्यजे
त्स्रुतकेवापित्यजनाच्छेदधोद्विजः॥कुर्यान्नित्यमहायज्ञान्नित्यशःस्रुतकंविना॥नि
त्येनैमित्तिकंचान्यत्सकर्मोपिनहापयेत्॥स्वकर्महानोपतनमन्यूनेवत्वनापदि॥
स्वकर्महानोनास्विक्यान्मासेनपतनंस्मृतं॥द्वादशाब्दव्रतेनैवतस्यशुद्धिरुदाहृता
था॥तंनित्यैरीप्सितंकर्मीक्षेतस्यर्त्विग्यात्सचेत्रुजं॥तेनसंभाषणंस्पर्शंकुर्वन्नब्दे न
तत्समः॥तदन्नभुक्तोसद्यस्कंसहशय्यासनेषुच॥इतिहोमविधिः॥तत्रैवं॥प्रमा
दस्मरणविषयांतेअशौचप्रकरणजाताशौचेमृताशौचेचत्रेताग्निसाध्याग्निहोत्र
दर्शपूर्णमासाद्यानित्यनैमित्तिकाःक्रियाःकार्याःऔपासनाग्निसाध्याश्चसायंप्रा

राम ४९

तर्होमपार्वणस्थालीपाकाद्याःनित्यनैमित्तिकाः श्रुतिनोदितत्वात्कार्याएवासंभवेहा
वयेत्॥सर्वथानहापयेत्॥तस्मान्नत्वेपिपित्र्यश्रवणाकर्माश्वयुजीकर्मादिकम
सगोत्रेणकारयेत्॥नहापयेत्॥व्रतचर्यादिव्रतिनांतेश्राद्धंकृत्वापितॄणांमंत्रिता
नांभोक्तृणांयत्किंचिन्नि यमस्थानामप्रतिषिद्ध्याहित्यशेदातॄणामेतेषांयाव
दुपाधिस्नावदाशौचंनास्त्येव॥ऋत्विगादीनांस्नानमस्ति॥यजमानस्तुस्नात्वाचम्य
उद्देशत्यागंकुर्यात्॥सर्वंकार्यंचवज्रमेवास्मान्नत्वेपिसंध्यायांगायत्र्याजलंदानंका
र्यमार्जनंकार्यंनवा॥यद्वाप्राणान्नियम्यशास्त्रयामनसामंत्रमुच्चारयन्मार्जनादिकं
कृत्वावाचागायत्रीमुच्चार्यजलंदद्यात्॥दानमतियज्ञपंचमहायज्ञनित्यश्राद्धस्वा
ध्यायादीनांस्नानोनात्यागएव॥नित्यस्नानशौचभोजननियमानस्त्रियस्य

र्शस्नानंचकुर्यादेवा।सूतकान्नभोजनंस्वकृत्यानांकार्येनस्वकृत्यानांदोषः दातृभो
क्तोरन्यतरेणसूतकेज्ञाते नभोक्तव्यम परिज्ञानेनदोषः॥निर्णयसिंधौतु।
कर्मतआशौचस्थलेअपवादांतरमाह॥याज्ञवल्क्यः।वैतानोपासनाःकार्याःक्रिया
श्चश्रुतिचोदनात्॥तत्रत्यागमात्रे स्नानेनैरंस्वयंकर्तृत्वं॥सूतकेमृतकेचैवअ
राशौस्पृश्यभोजने॥प्रवासादिनिमित्तेषुहावयेन्नतुहापयेदितिबृहस्पतियुक्तेः॥
नित्यानिनिवर्त्तेरन्निताभवंतीत्याग्नेयंकन्यएतानिकुर्युरितिपैठीनसिस्मृतेश्च
तिविज्ञानेश्वरः एकग्रहणेऽन्यार्थंतेनस्मार्तंकार्यमेवेतिहारीतायां॥दक्षिणा
त्याग्निकल्पमाहुः॥अपराकादिनिबंधनात्स्रोतंसर्वंस्वयंकार्यं॥ ॥स्मार्त्तंतु राम
त्यागादिस्मृत्यन्यसेवकर्तृकत्वं॥त्यागमात्रेतुस्वस्य ॥कर्मवैतानिकंकार्यस्नानो ५०

पस्पर्शनात्स्वयं॥जन्महान्योर्विनान्यस्यकर्मत्यागोनवियतइतिहारीतोक्तेः॥श्रौताग्नौ
केवलेहोमः कार्यएवान्यगोत्रजैरितिजाबालोक्तेश्चाङ्गः॥आशाकैप्येवंयाज्ञिकाअप्ये
वं॥सूतकेतुसमुत्पन्नेस्मार्त्तंकर्मकथंभवेत्॥पिंडयज्ञंचहुंहोममसगोत्रेणकारयेदि
तिजातूकर्ण्योक्तेश्च॥चरुस्मार्त्तस्यात्पाकश्रवणाकर्मादिश्चतिविज्ञानेश्वरः॥प्रा
रब्धेतुसपिंडे नापिकार्यं॥नचतत्कर्मकुर्वाणःसनाप्नोत्यशुचिर्भवेदितिमनूक्तेः॥
छंदोगपरिशिष्टे पिहोमश्रौतेतुकर्त्तव्यः।स्रुघान्नेनफलेनवा॥अहुतंहावयेत्स्मा
र्त्तेतदभावेहुताहुते॥अहुतेव्रीह्यादि॥हुताहुतेतंडुलादिस्मार्त्तहोमादौतुविकल्पो
सेयः ।श्रौताग्नौचैकेइतिमागुरुक्तेः॥यदाकरणंतदाअन्यद्वारा॥अत्रेदंतत्वंयेषांबहू
नांदशरात्रहोमेपिनाग्निविच्छेदेनकार्यं॥नैत्तिरीयाणांत्रिरात्रमहत्रयमा

सौ

नोग्नित्रौकिकः संपतइतिसुदर्शनभाष्येवचनात्॥ ॥समारूढेत्वग्नौतेनापिनका
र्यं।किंतुपुनराधानमेवसमारोपप्रत्यवरोहयोः आशौचापवादाभावादकर्तृत्वा
च्च॥अथोन्येपुनराधानमपिस्यात्॥ ॥यत्त्वाश्वलायनः॥तौवापिसूतकेशावेपर्व
णीष्टिमहापदि॥पुष्यवत्यांचभार्यायांनकुर्यातांकदाचना।स्मान्नाग्निःसूतकेशावे
स्वयंनजुहुयाद्द्विजः॥श्रौताग्निस्तुसहुत्वासमाप्तिंवास्वयंहुनेदिति॥तदापि
समारूढपरंतदाहसएवस्मान्नाग्निरात्मनोन्येषामभावेसूतकादिषुसमारोप्य
तदंतेनुविहृत्यजुहुयात्स्वयमिति॥तथामनुः॥प्रत्यहेन्नाग्निषुक्रियाइति॥ ॥
वैश्वदेवस्त्वग्निसाध्यत्वेपिनिवृत्तिः।विप्रोदशाहमासीतवैश्वदेवविवर्जितइति रम
संवर्त्तोक्तेः॥यद्यपिपंचयज्ञविधानंतुनकुर्यान्नूत्नजन्मनोरितितेनैवोक्तेः॥प्रवेनि ५१

षेधोव्यर्थस्तथापिपक्षेबादीनांवैश्वदेवस्यपंचयज्ञभिन्नत्वात्पृथक्निषेधः॥ ॥हरद
त्तस्त्वाशौचेपिबहुचैर्वैश्वदेवःकार्यः।तस्यद्रव्यनिध्यायीयदात्मासुविर्यद्देशइति
ब्रह्मयज्ञस्यैवाशौचेविशिष्यनिषेधात्।संध्यादीनामप्यपवादमाहपराशरःपुलस्त्यः
॥संध्यामिष्टिंचरुंहोमंयावज्जीवंसमाचरेत्॥नित्यंजप्तंसूतकेवापित्यजन्नाह्नेदधोद्वि
जः॥सूतकंमृतकंचैवसंध्याकर्मनसंत्यजेत्॥मनसोच्चारयन्मंत्रान्प्राणायाममृते
द्विजः॥यत्तुसूतकेकर्मणांत्यागःसंध्यादीनांविधीयते॥यच्चविष्णुपुराणंसर्वकालमुपा
सातुसंध्ययोःपार्थिवेप्यते॥अन्यत्रसूतकात्सोय———इतितत्पूर्णसंध्यापरं।
अर्घ्यीतामानसीसंध्याकुशवारिविवर्जिता।शुद्धदीपे च्यवनोक्तिः॥पैङ्गिनसिस्तु
अर्घ्यमंत्रोच्चारणमाह॥सूतकेसावित्र्यांजलिंप्रक्षिप्यसूर्यंध्यायन्नमस्कुर्यात्॥फर

ह्याजोपिसूतकेमृतकंकुर्यात्प्राणायामैमंत्रकं॥तथामार्जनमंत्रांस्तूष्णीमनसोच्चार्यमा
र्जयेत्॥गायत्रीसम्यगुच्चार्यसूर्यायार्घ्यंनिवेदयेत्।मार्जनंतुनवाकार्यमुपस्थानं
नचैवहि॥॥ग्रहणेश्राद्धादावप्याशौचापवादमाहव्याघ्रपादः॥स्मार्तकर्मपरि
त्यागोराहोरन्यत्रसूतकेइतिचेंगेपि।सूतकेमृतकेचैवनदोषाराऊ दर्शनात्ता
वदेवभवेच्छुद्धिर्यावन्मूर्तिर्नदृश्यतेति॥॥श्राद्धभोजनादौऋत्विग्वाद्यभावेगायत्र्या
दशाहृत्वोपःपीत्वासंध्याहोमादिकंकुर्यात्॥पुराणेघनुरूविशेषेणगायत्र्यादशाहृ
त्वोपःपीत्वाशुध्यतितनःसंध्योपासनहोमंयथोचितंकुर्यादितिस्मृत्यर्थसाराक्षेः॥
दशाहृत्वःपिवेदापोगायत्र्याश्राद्धभुग्द्विजः॥ततःसंध्यामुपासीतशुद्धेतुदनंतरमि राम
ति॥अनुरूप्रायश्चित्तश्राद्धविषयमितिमिताक्षरायां॥माधवेप्येवं॥तच्चसंध्याहो ५२

मयोःप्रतिषेधस्त्वनुपनायश्चित्तस्यसूतेतुप्रायश्चित्तेकुर्यात्॥अतएवविष्णुपुराणं
॥दशाहृत्वःपिवेदापोगायत्र्याश्राद्धभुग्द्विजः॥ततःसंध्यामुपासीतजपेतचजुरु
यादपीति॥॥अथसभार्यस्यप्रवासेप्रसङ्गेआशौचादिनिमित्तेवाग्नि.समारोपवि
धिः।कालहोमानंतरंअयंतेयोनिरित्यस्यगाथीपुत्रोविश्वामित्रोग्निरनुष्टुप्॥अग्निस
मारोपणेविनियोगः॥ॐअयंतेयोनिर्ऋत्वियइत्यनेना रणीद्वयेसमारोपयेत्॥अथ
वानेनैवाश्वत्थसमिधिसमारोपयेत्॥हिरण्यकेशीस्मार्तसूत्रेउडुंबरादिसमित्स्वपि
समारोपउक्तोस्तिअत्रापसव्यंगीकर्तव्यः॥यदायातेअग्नेयन्नियातनूस्तोयारोहा ये
त्मात्मानमछावसूनिच्छन्वन्न र्यापुरुणि॥यस्तोभरत्वायन्नमासीद योनिंजा
तवेदाभुवआजायमानइतिमंत्रेणपाणीप्रतापात्मनिसमारोपयेत्॥त्रिविधोपि

ऋत्वियोयतोजातोअरोचथाः॥तंजानन्नग्नआसीदाथानोवर्द्धया ५

ए॰सा॰ समारोपोयजमान कर्तृकः।तत्रापिआत्मसमारोपस्तूनियमेनयजमानकर्तृकेनैवान्यक
५३ र्तृकःतत्रप्राङ्घरणकान्तेरणिसमारोपेप्रत्यवरोहत्यनेनारणीनिर्मथ्यस्थंडिलेग्निं
प्रतिष्ठापयेत्॥अश्वत्थसमित्समारोपपक्षेश्रोत्रियागारादग्निमाहृत्यसंस्कृतेस्थंडि
लेप्रतिष्ठाप्यप्रत्यवरोहतिमंत्रेणतांसमिधंनिदध्यात्॥समित्समारोपपक्षेयावत्योग्रा
मं ममर्यादानद्यश्चसीमाअतिक्रांतोनदीश्चसंतरंतोदंपतीसमिधमन्वारभेयातांअन्वा
रंभावन्यतरेणवान्वारंभःअन्वारंभाभावेअग्निनाशः॥अस्त्रहरणेसमारोप्यहरणे ज
चयजमानःपत्नीचान्वारभेयातांतदभावे ग्नयोलौकिकाभवंतितदग्न्या
धेयेग्रामश्चित्तमितिप्रायश्चित्तप्रदीपेउक्तत्वात्अरणीसमारोपतुल्यःसमिदारो राम
पः॥ज्येष्ठान्वारभतेवह्निंबहुभार्यस्यनेतरेतिसंग्रहोक्तः॥नान्वारंभआत्मसमारो ५३

ष्य निम

पे॥एतन्मूत्रंत्रिकांड्यांआत्मसमारोपपक्षेसर्वदास्पृश्यंस्पर्शनंजलेनैव स्नानंस्त्रीगमनंचा
कुर्वन्मूत्रपुरीषोत्सर्गंशौचमकृत्वाचिरकालमतिष्ठंश्चभवेत्॥होमकालेआत्मस
मारूढमग्निमुल्कासरूपेणप्रत्यवरोहतिमंत्रेणलौकिकाग्नौनिदध्यात्॥॥एवंयथा
विधिकारमग्निंप्रतिष्ठाप्यकालद्वयेएककालेवापूर्ववज्जुहुयात्॥इदंसमारोपणंद्वा
दशरात्रमेवकुर्यात्॥नहूर्ध्वंसमारोपणेमूत्रंशोनकेन॥अरण्योःसमित्त्वेवगृह्य स
स्तु ग्नेःयथाविधि॥अग्नौप्रज्वलितेगृह्यप्रतपेदरणीद्वयं॥अश्वत्थसमिधंवापिअयंते
योनिरित्यृचा॥यानेअग्नेयज्ञियेतिपाणीवायुगपत्तपेत्॥आपद्येवंसमारोप्यततः
प्रत्यवरोहयेत्॥------अग्निसमारोपणविधिःक्रमात्॥एषांत्रयाणांपक्षा
णांपूर्वःपूर्वःप्रशस्यतइति॥यज्ञपार्श्वेपि॥ऋषिभ्यश्चपुरादृष्टमापत्कालेषुसर्वदा॥

अरण्योश्च समारोप्याग्निदृष्टेनकर्मणेति॥चकारात्समिध्यपि॥अत्राश्वत्थसमिदेवेति
नियमः॥अरण्यश्वत्थयोनित्वादश्वत्थसमिधंवापीत्युक्तत्वात्चअलाभेउडुंबरादि
समित्स्वपिसूत्रांतरोक्तेस्तत्रैवारण्यकेशीस्मार्त्तसूत्रंयदिप्रागग्न्याख्यातमात्म
न्यरण्योर्वासमारोपणंसमिधिवासमारोप्येदरणीकल्पेनखादिरःपालाशऔडुंब
रश्वत्थोत्रैकतरस्मिंपत्नावस्येनस्मिन्श्रोत्रियागारादग्निमाहृत्याजुह्वानउद्ध्य
स्वेतिद्वाभ्यांयस्यांसमारूढस्तामादधातीति॥आत्मसमारोपेप्रयोगरत्नेनियमाउ
क्तास्तेषांमूलंबोधायनीयमायश्चित्तप्रदीपे॥गृह्यकारिकायांच॥कृत्वापाणिसमा
रोपंनियमांश्चनिबोधत॥जलेनिमज्यनस्नायान्नोपेयाच्चस्त्रियास्तथा॥कृत्वा
मूत्रपुरीषंतुचिरन्नासीतचाशुचिरितिकारिकाएवमात्मनिसमारूढेषुनखादेन्न

पिबेन्नोपरिशय्यायांशयीतास्कन्निमज्जेन्मैथुनंव्रजेदित्येतदनापद्विषयं॥अपद्यमै
थुनंनिषिद्धं॥नियमोक्तमेमनस्वतीमंत्रजपःप्रायश्चित्तं॥आत्मनिसमारूढेष्वग्निषु
नाप्सुनिमज्जेन्मैथुनंव्रजेत्॥अमेध्यश्चेदिस्यर्शेअव्रत्यचरणेचाग्नयोनश्यंतीद
मप्युक्तंदीपे॥ततस्तान्नखादेदित्यादिवैकल्पिकेस्यातिक्रमेउक्तामनस्वतीजपः॥
स्त्रिकांडमंडनेपि॥आत्मारूढेषुमज्जेद्वावदद्भापतितादिभिः॥अथवायोषितंगछे
दन्तौकाममोहितः॥वदंत्येषुनिमित्तेषुकेचिदग्निविनाशनमिति॥बौधायनसूत्रे
पि॥आत्मन्निसमारूढेष्वग्निषुन्नखादेन्नपिबेन्नोपरिशय्यायांशयीतनाप्सुनिम
ज्जेन्मैथुनंव्रजेत्कामंखादेत्कामंपिबेत्कामंत्वेवोपरिशय्यांशयीतनत्वेवास्कनि
मज्जेन्मैथुनंव्रजेदिति॥आत्मनिसमारूढेव्रतंचरेदरणीविनाशेक्तोदोषोभवे

दग्न्याधेयमरणिविनाग्नेनाग्निविनाग्नउक्तः॥उत्तरस्त्रेनियमापरिपालनेग्निना
शान्न दर्शपूर्णमासयोरनुष्ठानंपत्नीविनाप्रवासेतुनैवकुर्याद्पाँनमित्तिकेपत्नी स
विनाप्रवासेसर्वग्रंथेषुप्रवासा पस्थानस्यविधानान्नदाग्निहोत्रंनित्येष्टिः पित्तय
ज्ञइतित्रयंकर्त्तव्यंपत्नीसहितेपत्यौनान्यत्वाग्निक्रियान्वितमितित्रिकाण्डेउक्तंयेआहि
ताग्नेर्धर्मस्यात्सौपासनिकस्यचित्या दिसर्वेषामुक्तेदार्शनीयप्रभृतीनांनु
पर्वणामतिपातने॥पुनराधेयमितिकारिकायामुक्त्वाचसर्वदृष्यावेष्टव
त्॥॥समित्समारोपविषयेपिदर्शपूर्णमासयोरनुनास्त्रीकिकत्वमितिदिक्॥अत्र षा
पक्षहोमादिषुसर्वत्रापिकृतेसमारोपेअवरोपोत्तरमनस्तीहोमः प्रायश्चित्तमि राम
त्यंप्रायश्चित्तप्रदीपेतत्रैवाग्निषुसमारूढेषुअनुद्धरणप्रायश्चित्तंनास्ति॥अ ५५
नेष्यतइत्युक्तेनप्रादुष्करणतुल्यत्वात्समारोपमात्रेप्रादुष्करणाकरणनिमित्तं१

थपुरुषस्यैवप्रवासकालेकर्त्तव्यं॥प्रवासस्कंसाग्निकेनइष्ट्याजेनादिदृष्टकार्योर्थमेव
केवलेनपुरुषेणकार्यः॥नतुतीर्थयात्रार्थकार्यार्थं॥तदुक्तंत्रिकांडेधनान्यजेयि
न नुंयुक्तःप्रवासाग्निहोत्रिणः॥धनैसंभवेदिज्यातीर्थाद्यर्थंनतुत्रजेत्॥ब्रह्मावि
ष्णुःशिवःसूर्योगोविप्राःपितृदेवताः॥अग्निहोत्रगृहेसंतिव्रततीर्थतपांसिचेति।
न तत्रप्रवत्स्यन्नग्निंप्रज्वाल्यात्मन्यग्नयेवोग्नयेमेस्कइत्यपस्थायग्रामांतरंप्रवासंग
छेदागत्यपूर्ववदग्नयइत्यपस्थायगृहमाबिभीतोमवःस्वस्त्येवोस्मासुचमन्यय
ध्वमाचवोगोपतीरिवदितिस्वगृहंनिरीक्ष्य॥गृहानहंसुमनसःप्रपद्येवीरघ्नो
वीरवतःसुवीरानाइरांवहंतोघृतमुक्षमाणास्तेघृहंसुमनाःसंविशानीतिगृहंप्र
विश्यशिवेशग्मेशयीरितिपुनस्त्रिरनुवीक्ष्य॥ततोज्येष्ठपुत्रशिरउभाभ्यांपाणि

ष्यांपरिगृह्य॥अंगादंगात्संभवसिहृदयादधिजायसे।आत्मावैपुत्रनामासिसजीवश
रदःशतमिति मंत्रंजपित्वामूर्धानं त्रिराजिघ्रेत्॥एतसुत्रेपिप्रोष्यागतेभवति। अवग
तमप्यप्रियंप्रवासागतंप्रतितद्दिनेननिवेदयेयुः॥कारिका 'नुसारेणेदं लिखितं।
अत्रसूत्रमपि॥गृहानीक्षेताप्यनाहिताग्निरिति॥अनुपस्थिताग्निश्चेत्प्रवासंगछे
त्तदाऽहरेवसंत त्रसंतंत्वाग्नेहृदावाचामनसावाबिभर्मि॥तिरोमासंतमाप्रहासी
ज्र्योतिषात्वावैश्वानरेणइति॥यत्रस्मरेत्तत्रैवोपतिष्ठेत॥प्रत्यागमनादिपूर्ववत्॥इ
त्यऋग्माश्वलायनसूत्ररत्नमालायां॥संग्रहेणकुर्युरग्न्युपस्थानंप्रवत्स्यंत्योपियोषि
तः।त्यागंनप्रोषिताःकुर्युरग्नंत्येवसधर्मकं॥आगतोपस्थितेचापिस्त्रीणांनेछंति राम
सूरयइति॥ ॥प्रोषितपत्नीकर्तव्यता॥तत्रसायंप्रातरोपासनहोमोदर्शपूर्णमास ५६

यि

स्थालीपाकपिंडपितृयज्ञश्चऋत्विगादिनाकार्यंतव्यः।होमंतुस्वयमेववाकुर्यादितिउक्तंप्रा
गेव।अत्रविक्रीडमंडनः॥कुर्यादवसरप्राप्तमृत्विक्पत्नीसमन्वितः॥पत्न्यारजस्वला
यांवाप्रसूतायामथापिवा॥सर्वमेवनियुक्तःसन्कुर्यादृत्विग्यथाचितं॥अतोग्निहोत्रंनि
त्यंदर्शःपितृयज्ञश्चनित्यः॥कर्तव्यंप्रोषितेपत्न्यानान्यत्स्वामिक्रियान्वितमिति॥प्रवसत्या
हिताग्नेतुयद्याग्रयण मागतं॥अग्निहोत्रीव्रीहिस्तंबमितिपक्षंसमाश्रयेत्॥इत्येत
स्यार्थः॥अग्निहोत्रीगांत्रीहिश्यामाकयवानामन्यतमेनाशयित्वातस्याःपयसायंप्रात सा
रग्निहोत्रं जुहुयात्सोयमाग्रयणेघनुकल्पःप्रोषितपत्नीकार्यः॥श्रोतएवस्मार्तेतुअ
ग्निहोत्रीमितिपक्षोनभवतिकिंतुस्थालीपाकएव॥आग्रयणस्थालीपाकसूत्रेतूक्तोवच
नात्॥सत्याग्रयणस्थालीपाकः स्वाग्यागमनपर्यंतमुत्कृष्टव्यः॥पितृयज्ञत्रयमिति

श्रवणादन्यन्नित्यमपिश्रवणाकर्मादिकंनकर्त्तव्यमिति॥येतु नैमित्तिकांप्रायश्चित्तचरवस्तेषुपूर्णाहुतिःकार्या॥यास्तुप्रायश्चित्तेष्वस्तासुपूर्णाहुतिःकर्तव्येतिप्रायश्चित्तप्रदीपेउक्तत्वात्॥प्रायश्चित्तेषिसंप्राप्तोकुर्यात्पूर्णाहुतिंबुधइतित्रिकाण्डमण्डनोक्तत्वाच्च॥ ॥प्रोषितेयजमानेत्वहनिपत्नीरजस्वलाचेन्नदापंचमेह्नियागः॥संकल्पेनरकालंचेन्नामपरुध्यकार्यइत्यत्रकल्पेदेव्यांभाव्यंच॥प्रवसन्यजमानःपूर्वोक्तविधिनाग्निमुपस्थायप्रवसेत्॥अस्त्युपायीप्रवसतीतियोयंप्रोषितस्त्रीनिषेधः॥तत्रमोहमूलास्त्रीविषयःप्रोषितेयजमानेपत्नीपुत्रोवाबहिर्नाग्निनाप्रवसेत्॥राष्ट्रविघ्नमादिप्रवासनिमित्तंपत्नीतुपत्नीअग्निनासहप्रवसेत्॥तत्रक्रमः।अध्वर्युः पक्षविधानेनौपासनहोमान्समाप्यकृत्वाग्निंध्नसिहोमोपकरणंपात्रादिकंसर्वमारो

प्यदक्षिणमनड्वाहंयुक्त्वाज्यंसंस्कृत्यतावन्मात्रयोगिन्यापर्णमय्यास्रुचाचतुर्गृहीतमाज्यंवक्ष्यमाणमंत्राभ्यामेकामेवाज्याहुतिमग्नौजुहोति॥वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः॥यत्वेमहेप्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदे॥ वास्तोष्पतेशग्मयासंसदोमेसक्षीमहिरण्वयागातुमत्या॥अवःक्षमरणयोगेवरन्नोयूयंपात स्वस्तिभिःसदानः स्वाहा॥वास्तोष्पतयइदंनमम॥स्रुचमग्नौप्रक्षिप्य॥सव्यमनड्वाहंयुक्त्वाअयंनइत्यृचाश्वत्थसमिध्यग्निंसमारोप्यशकटेनिधायपत्न्यपिशकटमारोह्याग्निनासहामि त्रषितंदेशंगत्वाविहारंपरिक्रम्यित्वाप्रत्यवरोहेत्यवरोप्याज्यंसंस्कृत्यमनस्वत्याचतुर्गृहीतमाज्यंकृत्वातंनुमतीष्टिंकुर्यादित्यृक्त्वाचाग्नयेतंनुमतस्थालीपाकंकुर्यात्. अत्रशरावंदक्षिणा॥ए

कभोजनपर्याप्तमन्नंश्राद्धं॥प्रवसन्यजमानइत्याद्येतदंतंप्रायश्चित्तप्रदीपादिसारे
णलिखितं॥अत्रापलंबसूत्रमप्येवं।त्रिकांड्यांतुअग्निनाशकान्कपक्रम्यतत्रना
शं परेत्वाऽभ्यायतनेनऽष्यतिकिंतु साग्निर्विनाभार्यांगत्वासंस्कृतसर्पि
षा॥हावयेच्चतुरान्नेनप्राप्तेदर्शेमनस्वती।सायंप्रातस्तनोहोमावेवंस्याऽमनो
न्वहं।वास्तोष्पतीयहोमेज्याभवत्यत्रापशोषन दुतिप्रोषितपत्यावेकापिनपूर्व
सेदित्यऽकं प्रायश्चित्तप्रदीपे।त्रिकांडीमतेतु॥भार्यायांप्रोषितोंचिऽदित्यकोक्त यां
मेतिवा॥तत्रस्यात्पुनराधेयमन्येत्वाऽहरिहान्यथा॥ज्येष्ठाचेदग्निसंयुक्तागछं राम
त्यन्यायथारुचि।यजमानेनसहितायद्वाताएवकेवलाः॥स्वाम्यसंनिधौपुनःसं ५८
धानंजयंतोऽकंपुनराधेयंचनकर्त्तव्यं॥अग्न्याधिःपुनराधिर्वानोभयंस्वाम्यसं

न्निधावितित्रिकांड्यामुऽक्त्वात्॥आहिताग्नेःप्रवासस्येतत्पत्नीगृहेदर्शेऋत्विगादि
नाकारयेत्॥अमावास्यादिनियतं प्रोषितेधर्मचारिणीपत्नीतुकारयन्नित्यमन्य
नाप्यृत्विगादिनेतिलघुहारीतोऽक्तेरितिपृथ्वीचंद्रोदयः॥आदिपदमाह्निकादि
सर्वपर्वणपरमितिशूलपाणिरितिनिर्णयसिंधुः॥श्राद्धदीपिकायांतुराजकार्यनि
युक्तस्यबंधनेगृहवर्त्तिनः॥व्यसनेषुचसर्वेषुश्राद्धंविप्रेणकारयेदितिः॥संग्र
हेपराग्निपक्वंनाश्नीयाद्गुडगोरसमंतरा॥आहिताग्नेरयंधर्मोयाज्ञिकानांतुसंमं
तः॥इक्षुक्षीरविकाराश्चशष्कृष्यवापिवा॥परान्नपक्वंकेवलपावके॥तदन्नंफ
लवज्ज्ञेयमन्नदोनविद्यते॥इदंयत्तत्प्रायेणकात्यायनपरं॥तेषांत्वाग्निपक्वस्यभो
जननियमात्रवसादोनथाऽनुष्ठानदर्शनाच्च॥॥अथापत्नीकोपासनप्रयो

नज्ञेयंप्रवासेचाग्निहोत्रिणः॥यदंनंवारिहीनंचपक्वं३

गः॥ ततःपूर्वमृतायैपत्न्यैदद्याद्धोग्निंदत्वाग्निष्टाग्निंकृत्वैवत्सायंप्रातर्होमाश्चप
र्वचाग्रयणंतथा॥ मलमासेतुकर्त्तव्यंकाम्याइष्टीश्चवर्जयेत्॥ अवपट्टकारये
होमाग्निहोत्रौपासनवैश्वदेवाद्यः॥ पर्वदर्शपूर्णमासौ॥ आग्रयणंस्यात्स्थालीपाकश्च
ता ।आग्रयणकर्त्तव्यंतुपुरातनधान्याभावेनत्वनापदि॥ वचनांतरे निषेधात्॥
एतावत्सर्वमासंगिकं॥ इदानींप्रकृतमनुसरामि॥ ७॥ इत्यारंभप्रकरणं
य रणंभट्टकृतेप्रयोगरत्नरहोमविषयंनिरूपणं॥ ॥अथस्थालीपाकारंभः
सचविवाहान्नरगृहप्रवेशीयहोमादागामिन्यांपौर्णमास्यामेवारंभणीयइति
नियमोदर्शनिर्णसिंधौतुप्रघारंभे राम
मलमासस्मृत्यादिभवति॥ तदाप्यारंभःकार्यः।यानितूपरागोधिमासश्च ५९

यदिप्रथमपर्वणि॥ तथामलिम्लुचेपौर्णमासेनाधिमासारंभणमिष्यते॥ गुरुभार्गवयोर्मौढ्ये
चंद्रसूर्यग्रहेतथेति संग्रहवचनानि॥ तानिआत्मस्यादिनाअतिकौशिकारंभ न
विधयाणि॥ नामचर्मचदर्शेष्टिंयथाकालंसमाचरेत्॥ अतिपातेसतितयोःप्रश
व स्तेमासिपुण्यभेइत्यपरार्केभार्गवंवचनादितिप्रयोगपारिजातोऽप्येवंचैतत्प्रयोगर
त्नेभट्टैः॥ कालादर्शेतुनामकर्मचदर्शेष्टिमितिपाठः। याज्ञिकास्तुआधानानंत
रापौर्णमासीचेन्मलमासगतास्यात्तारंभणीयादीन्नकुर्वंतिकदाचनेतिकौंडमंड त्रि
नवचनाल्लुप्तकालएवविभक्तेष्टिंकृत्वारंभंकुर्यादित्याहुः॥ कालादर्शस्मृतिसं
ग्रहेपि॥ आरंभंदर्शपूर्णेष्योरग्निहोत्रस्यचादिमं।प्रतिष्ठाःपंचकर्मोद्यामलमा
दि सेविवर्जयेतिएतदंतसिंधूक्तंकंप्रातस्यपर्वणः॥ स्थालीपाकइतिश्रौतग्रंथ

मतं॥अत्रापि होमवद्विवक्षेते॥यथाचारंकार्य्यं॥पौर्णमासस्थालीपाकस्य चेद्दर्शकालत्वंसद्यस्कालत्वंवादर्शस्य स्याद्दर्शकालनियमः॥अत्रापत्न्यंतरप्रदिसद्यस्कालत्वं॥तत्रविवाहोत्तरंदर्शेपूर्णमासस्थालीपाकयोरनुष्ठानंनक्तमनंतरमग्निविच्छेदेबहुकालोत्तरंपुनःसंधानंयदाक्रियतेतदादर्शेपूर्णमासस्थालीपाकयोरारंभकालेरजोदोषमसन्निधिः॥यदावादर्शेवार्पिण्यादिवधूलाभेविवाहकालेपिरजोदोषमसन्निधिस्तत्रविशेषः॥प्रायश्चित्तप्रदीपे॥अर्द्धोवाएतस्ययज्ञस्यहीयतेइत्यादिपत्न्यामनालंभुकायामेतस्ययज्ञमानस्यार्द्धंहीयतेउभाभ्यांसहकर्त्तव्यत्वात्॥अतोन्यनालंभुकाभवतीतित्रत्येहनिनिकर्मलक्ष्यतेव्रताहैकर्मणिसंकल्पादिनामक्रांतेनालंभुकायांरजस्वलायांअपरुध्ययजे

राम ६०

संकल्पात्पूर्वमनालंभुकायांविरम्यकालांतरेकुर्यात्॥३

त्॥अपरोधनंनामऋतुव्यापारोदासीनकरणं॥सर्वैर्वयज्ञेनयजतेसांगेनपत्न्याकर्त्तव्यमित्यर्थमेवकरोति॥तामिष्ट्वोक्तेयतोश्नुतेचतुर्थेहनिकर्मार्थमुपक्रयेतसमूहमस्मीति॥ऋतुकालउपगमनमंत्रोवा॥अग्न्याधानप्रभृत्यपरुध्येवयजेतेति॥संकल्पादूर्ध्वंकर्मारंभात्पूर्वमनालंभुकायामन्वाधानप्रभृत्यपरुध्येवसमापयेत्॥द्वितीयादिप्रयोगेषुसंकल्पात्पूर्वमनोभुकायांसंकल्पप्रभृत्यपरुध्यैकुर्यात्॥एवंविहृतीष्टिष्वपि॥आग्रयणचातुर्मास्येषुपशुबंधेचभवति॥अन्येत्वाहुः॥प्रथमेप्रयोगेसंकल्पादूर्ध्वमन्वाधानात्पूर्वमनालंभुकायांविरम्यकालांतरेकुर्यात्॥अन्वाधानादूर्ध्वंचेदपरुध्यसमापयेत्॥द्वितीयादिप्रयोगेसंकल्पात्पूर्वमनालंभुकायांविरम्यकालांतरेकुर्यात्॥संकल्पादूर्ध्वमनालंभुकायांअग्न्याधानप्रभृत्यपरुध्यसमा

पयेत्॥एवंविकृतीषुपशुचातुर्मास्येष्वपीति॥शातदृयीभाष्योक्तमपिलिख्यते॥व्रत्यमह
र्नीमव्रतोपायनतद्विसर्गयोर्मध्यउच्यते॥केचिद्व्रताहेमहर्व्रत्यमितितेषांमतेदर्शपूर्ण
मासादीनांकर्मणांकालःपर्वादिर्व्रत्यमहः।एषपक्षोनुष्ठीयतेऽहैःकेचित्संकल्पादारभ्ये
तिवर्णयंतितस्मिन्व्रत्येहनियदिपत्नीरजस्वलास्यात्तदापत्नीकर्मवर्ज्यंदर्शपूर्णमासा
दिकर्त्तव्यं॥एवंदर्शपूर्णमास तद्विकारेष्टिपशुचातुर्मास्येषु॥अग्न्याधानादूर्ध्वं
रजस्वलायामपरुध्यैवयागः कर्त्तव्यःकर्मारंभात्पूर्वंचेत्कालांतरेयागःकर्त्तव्यःसंक
ल्पात्यागपियागः। कार्यइत्यंडविलायतोप्रोषितेस्वंयागेवपत्न्यांप्रसूतायांस्त्रीप्र
सवे मासपर्यंतंपुत्रप्रसवेविंशतिरात्रपर्यंतंकर्मान् हीन ।त्कर्मपुत्रःकुर्यात्॥रोगा राम
दिनाकर्मण्यसमर्थायाम प्येकुर्यादित्येनदीपोक्तं॥ ॥अथेष्टिनिर्णयः।पर्वप्रति ६१

वं

दि। पदोःसंधिरवागावर्त्तनार्थैतस्मिन्नहनियएकंपूर्वेद्युरुडुपक्रमः॥१॥आवर्त्तने यदा
संधिःपर्वप्रतिपदोर्भवेत्॥तदहर्योग इ.प्येतपरतश्चेत्परेहनि।२आवर्त्तनात्परःस
धिर्यदि तस्मिन्नुपक्रमः॥परेद्युरिष्टिरित्येवंपर्वद्वयविनिश्चयः।३।संधिर्यद्यपरा
ह्णेस्याद्योगंप्रातःपरेहनि॥कुर्वाणःप्रतिपङ्गागेचतुर्थेपिनडुष्यति॥४॥माधवेपर्वप्र
तिपदोःसंधिर्मध्यान्हेवातनःपुरा॥अन्वाधानंपूर्वदिनेयागःसंधिदिनेभवेत्॥ऊ
र्ध्वंमध्याह्नतःसंधावन्वाधानंतुतद्दिने॥इष्टिंपरदिनेकुर्यादन्योवाजसनेयिनः॥
यस्यवाजसनेयीस्यान्नस्य संधिदिनात्पुरा॥नक्ताप्यन्वाहितिःकिंतुसदासंधिने हि
श्वे सा॥साअन्वाहितिः। संधौसंगवादूर्ध्वंपार्वण्यवर्त्तनाद्वेः॥सापूर्णमासीविज्ञेयासद्य
स्कात्रविधौतिथिः॥वृद्धिःप्रतिपदोयास्तिनदर्शेपर्वणिक्षिपेत्।क्षयस्याहैतयाक्षिप्ता

संधिर्निश्चीयतांसदा॥पर्वणोयश्चतुर्थांशःआद्याःप्रतिपदस्त्रयः॥इष्टिकालःसविज्ञेयः
प्रातरुक्तोमनीषिभिः॥१॥प्रतिपद्यप्रविष्टायांयदिचेष्टिःसमाप्यते॥पुनःप्रणीयकर्त्तव्यायागविघ्नभैः॥२॥स्यात्तीपाकेतुनायंनियमइत्यूर्दनपारिजातकारणस्वीयनिबंधेसप्तमस्तवकेपरंतुयाज्ञिकासंमतंतन्नादृग्वाक्यालाभात्॥आवर्त्तेनात्तु
पूर्वोक्तात्परात्परतः॥३॥मध्याह्नस्तुतयोःसंधिर्यदावर्त्तेनमुच्यते॥अत्राह्निधिधाभागइत्यूर्दनस्मृत्यर्थसारे॥मदनपारिजातेकात्यायनः॥आवर्त्तेनात्पाग्यदिपर्वसंधिःक्षयात्तुतस्मिन्नहनिविक्षत्याः॥तदैवयागःपरतोयदिस्यात्तस्मिन्विक्षत्याः
प्रहृतेःपरेद्युः॥इष्वौविकृतिःसर्वापर्वण्यवेतिनिश्चयः॥खंडपर्वणितु——— तत्रा
ग्रायणंपौर्णमासात्पूर्वेदर्शोनंतरमिविकेकः॥अत्रस्मृत्यर्थसारे॥——पर्वणिसं

र्णेअन्वाधानंप्रतिपदियागः॥ खंडपर्वाणिविशेषउच्यते॥पौर्णमासीसूनचंद्रानु
मतिःपूर्णचंद्राराकेइंद्विधा॥अमावास्याद्दष्टचंद्रासिनीवालीनष्टचंद्राकुहूरितिद्विधा॥प्रधानकर्मतियेरुक्तास्तेतिथिवृद्धिह्रासयोरुपूर्वतिथौप्रक्षिप्यकालोविज्ञेयः॥सूर्यस्यावर्त्तेनात्पूर्वं आवर्त्तनेवोप्रतिपत्संधौसतिनस्मिन्नहनियागः॥आ
वर्त्तनादूर्ध्वंसंधौपरेहनियागः॥पर्वणोयश्चतुर्थांशःप्रतिपदितुआद्यास्त्रयोंशायागकालः॥प्रातःकालोयागः॥अपराह्णसंधौपरेह्नीतिप्रतिपच्चतुर्थांशेपियाग का प
लः।नष्टचंद्रसंधौअत्राह्नोद्विधाविभागःपूर्वोक्तंपर्वद्वयेपिसमानंपौर्णमास्यांविशेषोवक्ष्यते॥आवर्त्तनात्पूर्वंसंधौसद्यस्कालेनवा।आवर्त्तनात्पूर्वंसंगवादूर्ध्वंपर्वसंधौतुसद्यस्कालएवासर्वापौर्णमासीयज्ञनीयदिनेपर्वणिवासद्यस्कालेकेचिदाहुः

प्रह्णतेःसद्य स्कालत्वंकदाचिदपिनास्तिविह्णतावेवत्तदितिकेचित्।किंचपौर्णमास्याम
यंविशेषः।।अहःस्वमंदीर्घेषुतिथिह्रासेसतिउदयसमीपपर्वचतुर्थ्याद्यभावेपिश्र
वीह्णपर्वसंधिश्चभवतितत्रैवस्र्वीह्णसंधिदिनवायागोनान्यत्रपरेह्नियागः।।
अमावास्यायांतुअपराह्णादिपर्वसंधौसत्यपरेह्निदृष्टचंद्रेपियागः।।पूर्वाह्णेसंधौ
सतिप्रत्यक्षचंद्रदर्शनाहेयागेभूर्भुवस्वःस्वाहेत्याहुतिंहुत्वाविप्रायदंडंदत्वाप्रायश्चि दा
त्तं प्राच्यांचंद्रदृष्टौतद दर्शयागे तैत्तिरीयोक्ताभ्युदितेष्टिः मनस्त्वत्याज्याहुतिर्वामती
च्यांचंद्रदृष्टौअन्वाधानेसतिपरेह्निइष्टिंसमाप्यान्यत्रहविष्टृष्टिः कार्यातत्राग्निः
पथिदृष्टाकपालःइंद्रोवृत्रहाएकादशकपालः।।अग्निर्वैश्वानरोष्टाकपालः।शरं राम
धनुर्दक्षिणा।एषावाजसनेयोक्ताइष्टिः।प्रकृतिरेववापुनःकार्या।।मनस्त्वत्याज्याहु ६३

तीर्वाव्याहृत्याहुतिर्वादिनद्वयेप्रातर्यागकालेसत्यपिपूर्वाह्णसंधिदिनएव प्रातर्यागः
।सर्वथासंधिरेवयागोत्कर्षापकर्षप्रयोजकः।तिथिवृद्धिह्रासौनप्रयोजकौ।।सप्तद
शीतिथिरन्वाधानेनिषिध्यतेनयागेविह्णतेः।।प्राच्यांचंद्रदर्शनेपिंडपितृयज्ञकाल
इतिसारोक्तःपर्वनिर्णयादर्शपूर्णमासयोःश्राद्धतिथिपुनर्वृद्धिह्रासस्वीकारोनान्यत्रे
तिसारेखंडतिथौनिर्णयस्थले।। ।अथपात्रलक्षणंबौधायनमतेहस्त्योष्ट हंसमु
खवायसपृ छनामन्यतमाकाराःसेचनवत्यः।प्रादेशारत्निबाहुनामन्यतमाया
मास्त्वकूस्थानासेचनवत्योवृत्तमूलदंडा ग्राआसेचनाआयामाद्दंडाअवशिष्टाया
मार्द्धयथाशोभंत्रिचतुःपंचाष्टांगुलविलयुक्ताअवशिष्टाग्रादर्वीकृवापाक्षणीच।।
बाहुमात्रेषुतुप्रादेशमध्येबिलाग्रेसंपाद्यअवशिष्टोदंडःकार्यः।स्रुवस्त्वरत्निमात्रोंगु

द्वपर्वमात्रवृत्तबिलः।धृष्टिमेक्षणेअरत्निमात्रेचतुरंगुलविस्तृतसमाग्रे।अत्रधृष्टिर्भ
स्माग्रसरणार्थामेक्षणंपितृयज्ञादौहोमार्थं॥उलूखलंप्रादेशारत्निघरत्न्यूनमा
यामंतद्दीर्घविस्तारंतदायामात्त्रिगुणमुसलं॥स्फ्यःखड्गाकारश्चतुरंगुलविस्तारार
त्निमात्रः।चमसःप्रादेशमात्रःचतुरंगुलदंडः।अष्टांगुलचतुरस्रबिलः॥दर्वीपाला
शीध्रवावैकंकती।प्रोक्षणीवैकंकतीस्रुगाहुतिः॥स्फ्यस्रुचौमुसलंचनिखादिरा
णि॥चमसःपालाशःनैय्यग्रोधऔडुंबरोवा॥एतेषांमूलभूतवचनानिबौधायनीय
श्रौतकल्पसारेत्रिकांड्यांचसंग्रहेयानिनात्रलिखितानिग्रंथविस्तारभीतः॥॥बौधाय
नस्मार्त्तग्रंथमतंतु॥हस्तोष्ट्रोहंसमुष्ट्रश्चतथावांसपुच्छकाःत्रिप्रकाःस्रुचोज्ञेयाः
स्त्रीलिंगाःसंविकल्पितं॥॥जुहूपभृद्ध्रुवादीनामेकाकारःस्मृतोबुधैः॥आयामोबा

द्धुमात्रःस्यादथवारत्निमात्रकः॥प्रादेशोनमितोवापिमताबौधायनादपि॥द्वेधाविद
रितस्यापित्वग्रेवासेचनास्यदं॥काष्ठाग्रेहितलेयमितिबौधायनोब्रवीत्॥विल
मष्टांगुलंकार्यंहस्तोष्ट्राश्रोतविज्ञानैः॥काकपुच्छहंसमुख्याबिलंपंचांगुलंस्मृतं।
चतुरंगुलंत्र्यंगुलंचैववैकल्पिकमिहेरितं॥आयामार्द्धमितोदंडःप्रादेशारत्निमा
त्रकः॥दंडस्यैवमितावृद्धिर्बाहुमात्रमनीषिणां॥यथाशोभमितंप्राहुराचार्यास्तु
बिलादिषु॥स्रुवस्यारत्निमात्रत्वाद्बिलमंगुष्ठपूर्वकं॥धृष्टिश्चमेक्षणंतद्वयंवेदांगु
लंभवेत्॥द्वादशांगुलमायामंतदर्द्धनतुविस्तृतं॥उलूखलंबुधैःप्रोक्तंत्रिगुणंमुस
लंभवेत्॥अरत्निद्वयविस्तारमरत्न्यायममात्रकं॥इतिवैकल्पिकंज्ञेयमुलूखलं
बुधैःस्मृतं॥प्रादेशमात्रंवा॥शूर्पंतृणमयंकुर्यात्॥खादिरस्फ्यःखड्गाकारोद्वाद

शांगुलः षोडशांगुलोहस्तमात्रोऽरत्निमात्रोबाहुमात्रोवा॥उलूखलंपालाशंखादि
रंवाकुर्यात्॥मुसलंखादिरंषोडशांगुलंकुर्यात्॥खादिरःस्रुवोषोडशांगुलः
षोडशांगुलोहस्तमात्रोरत्निमात्रोबाहुमात्रोवा॥खादिराभ्रवाषोडशांगुलहस्तमात्रा
रत्निमात्राबाहुमात्रावा॥मेक्षणंकस्यचिल्काष्ठस्यपालाशंचमस्षोडशांगुलंतन्मध्ये
अष्टांगुलंबिलंचतुरंगुलोदंडः॥अश्वत्थस्यवाकुर्यात्॥प्रोक्षणीवैकंकतीस्रुगाद्य
न्तिःकार्या॥उक्तानांवृक्षाणामसंभवेयस्यकस्यापियस्मिंयवृक्षस्यपर्णिकार्योणिपात्रे ३
पूर्वकाष्ठाद्यभावेवक्ष्यमाणेष्मवृक्षेषुकपित्थादीन्वर्जयित्वावृक्षमात्रेणायंश्रुत्कल्प
भाव्यं॥॥स्थालीपाकादिप्रकृतवैकृतहोमानांस्थालीपाकप्रकृतित्वात्परिभाषादिकं राम
किंचित्प्रासंगिकमत्रैवोच्यते॥अथाग्निमुखप्रयोगादिपरिभाषा॥तत्रतत्कर्मकर्तापा ६५

स्रुवउपविश्यवक्ष्यमाणेषुकर्मसुवक्ष्यमाणंभागेपत्नीमुपवेश्याचम्यप्राणानायम्य।
प्राणायामंतथाकृत्वाकालसंकल्पंयथाविधीति मदनपारिजातःतथा॥मासपक्षतिथी
नांचनिमित्तानांचसर्वशः॥उल्लेखनम कुर्वाणोनकर्मफलभाग्भवेदृतिगोऽयंय
स्यप्रयोगदीपिकास्थपद्यवाक्यात्संकल्पं चयथाकुर्यात्तानत्रतादिकं॥अन्यथापुण्य दान
कर्माणिनिष्फलानिभवंतिचेतिपारिजातेमार्कंडेयवचनाद्मु ककर्मकरिष्येतदंग
स्थंडिलाद्यग्निप्रतिष्ठापनादिकरिष्येइतिसंकल्प्यस्रुवदंशकिंचिदुक्षितंसमीकृतं
सर्वतः वृषमात्रमरत्नि मात्रमधिकंवोन्नतलक्षणं कुंडंस्थंडिलंवाकृत्वागोमयेनो
पलिप्ययज्ञियंतृणमाकल्पेनवह्निस्थापनदेशस्यपश्चात्प्रादेशमात्रमुदक्संस्थांरेखा
मुल्लिख्यतस्यदक्षिणोत्तरयोःप्रागायतेउदक्संस्थेपूर्वायतसंसृष्टेद्वेरेखेतयो

गृ.सा. र्मध्येतिस्रउदक्संस्थाःप्रागायाम संहताः॥ एवंपरिस्तरेखाउल्लिख्याकुलंनिधायस्थं
६६ २ डिलमङ्गारमुत्स्यंकुलंनिरस्याँउपस्पृश्याग्नेजुष्टदमूनाइत्येताभ्यांव्याहृति
भिश्चत्रेखास्वग्निंप्रतिष्ठाप्यपरीष्यन्नित्यन्तेएतदेतंकुर्यादाज्यद्रव्यकेहोमेआ
ज्यपरिग्रहश्चेत्तत्तूष्णीमेवपरिस्तरणमनादिष्टाज्यहोमेषुयेषुकर्मसुस्रुत्र
हृदाज्यपदंनोच्चारयतितत्रपरिस्तरणं नित्यंसर्वेषुपाकयज्ञेषुआज्यभागौहुता
हुतौ॥ ब्रह्मापितथाथधन्वंतरयेस्वयज्ञस्थलेचनित्योब्रह्मास्त्रहुत्वाकश्चिंमंत्रेण त्
क्वचिन्नाम्नाहोमःस्थलेचयत्रोभयमपिनोक्तंतत्रनाम्नैवहोमस्तस्योदाहरणंप्राजा
पत्यस्थालीपाकेत्यत्रप्रजापतयेस्वाहेत्यनेननाम्नैवहोमः॥ सूत्रेचौलकर्मोपनयन राम
गोदानविवाहइत्यत्रतेषांपुरस्ताच्चतस्रआज्याहुतीर्जुहुयादग्नआयूंषिपवस ६६

इतितिसृभिःप्रजापतेनत्वदेतान्यन्यइतिचैकैकः पक्षोव्याहृतिभिर्वैश्वान्यः समुच्च
यमेकेइत्यत्रोभयोः समुच्चयइत्यपरेनैकेकांचनेत्यत्रकेचिन्मतेकामयाहुतिं
नकुर्यादितिचार्थो यंयदाचौलादौनैकेकांचनपक्षआश्रितस्तदा नादिष्टहोमत्वा
दग्निरिंद्रप्रजापतिर्विश्वेदेवाःब्रह्मेत्यनादेशोहोतव्याअनेकपाकयज्ञाएकस्मिन्का
लेएककर्तृत्वेसुश्चेत्तदासमानंतंत्रकास्तंत्रंनामाग्न्याधानचक्षुष्यंतंस्विष्टकृदादिस
माप्तिपर्यंतंचतच्चैकमेवनात्रतंत्रावृत्तिस्तत्रोदाहरणंपर्वणिव्रतत्वोपेग्नयेव्रतपत
येस्थालीपाकस्तत्रत्रा तपतिस्थालीपाकपार्वणस्थालीपाकयोरेककालत्वात्समान
तंत्रतातथायदापर्वणिराकादौपुत्रकामनोत्पद्यतेतदाकाम्यपार्वणयोरेककालत्वा
त्समानतंत्रतायदाचाश्वयुज्यामाग्रयणाश्वयुजीकर्मणीक्रियेतेतदापितथायपा

त्रासादनमंत्राधिश्रयणादिकंस्रुवादिसंमार्गेऽध्मरज्जुप्रहरणमेतच्चतुष्टयमेछिक्रत्वा
त्कृतालक्तंपूर्णंपात्रमाज्यस्योत्पवनमेतद्द्वयंनित्यत्वेनभवेदथस्थालीपाकंजुह्वयाद्
धिसक्तून्जुहोत्येवंरूपद्रव्यादेशाभावे॥आनःप्रजांजनयतुप्रजापतिरितिचतसृभिः
प्रत्यृचंहुत्वेत्येतादृशस्थलेआज्यद्रव्यंयेषांकेषांचिदन्येषांहविषामप्यसंभवे॥सर्वत्रा
ज्यमुपादेयंभरद्वाजमुनेर्मतादितिस्मृत्यर्थसारोनत्वेतत्काम्यप्रतिनिधिर्नास्तीत्युक्त्वा
ना दथहोमसाधनंस्रुवेणहोमोथजपानुमंत्रणा भिमंत्रणार्थाप्येतानिषड्
त्युक्तमेण्वपांशुभवंत्पांशुत्वस्यादृक्षणंकरणवदशब्दंमनःप्रयोगउपां ष्वित्यथ
जपादीनांषण्णांलक्षणानिवृत्तोजपमुच्चारणंविद्याकृत्वर्थमपितद्भवेत्॥अर्थतःकार्ये राम
त्वाभश्चेदर्थएवकृतोभवेत्॥मंत्रमुच्चारयन्नेवमंत्रार्थत्वेनसंस्मरेत्॥अंगिनंतन्म ६७

स्थानमंत्राःकर्मकरणाः ४

नाभृत्वास्योदेतदनुमंत्रणं॥एतदेवाभिमंत्रणंलक्षणंचेक्षणाधिकं॥अद्भिःसंस्पर्शना
धिक्यान्नदेवाप्ययनंस्मृतं॥जपस्थानंतदेवस्यात्प्रणतिस्थानसंयुतं॥बाह्यंकार्ययदंते
षुमंत्रकालेक्रियेततं॥कर्मणःकारणास्तेसुर्विहितार्थप्रकाशनात्॥मंत्रेणकृत्वाक
र्मातेक्रियतेकर्मयेपुनः॥इदंकार्यमनेनेतिनक्वचिद्दृश्यतेविधिः॥लिंगादेवेदमर्थत्वं
ये षांतेमंत्रसंज्ञिताः॥अथजपादीनामुदाहरणानि॥शिरःपरिगृह्यजपत्यंगादंगा
दितिजपस्य॥शंन्नोदेवीरभिष्टयेऽत्यनुमंत्र्येत्यनुमंत्रस्य॥ब्रह्मचार्यसीतिकेवलमंत्र
स्य॥समिधोधेहरस्वीभ्रूपासमित्कृपस्थायेत्कृपस्थानस्य॥ऋतमग्नेप्रथमंजनेपिंडान
भिमंत्र्येत्यभिमंत्रस्य॥रौद्रेण्यमाणेताप्तुस्तेऽग्नेसिक्तंचरुं माज्येनाप्यायध्वमाप्याय
स्वसमेतुतइत्याप्या यमनस्यानःप्रजांजनयतुप्रजापतिरितिचतसृभिःप्रत्यृचंहुत्वेति

त

कर्मकरणमंत्रस्यसर्वत्रानुमंत्रणाभिमंत्रणोपस्थानवर्जेमंत्रांतेकर्मकर्त्रेयंमंत्रम्यकर
णात्वात्सर्वत्राभिमंत्रणोपस्थानेषुमंत्रोच्चारणसमकालमेवक्रियाभवेदुन्नावुक्त्वा
त्।गृह्यकर्मणिकर्मादृतौमंत्रस्याप्यावृत्तिरिति॥अथानःप्रजोजनयनुप्रजापतिरिति
चतसृभिःप्रत्यृचमित्येवंरूपंसूत्रेयत्रप्रत्यृचंग्रहणंतत्रौंगंतेस्वाहाकारंपठन्'होऋ
मःयत्रस्यात्प्रत्यृचंशब्दस्तत्रैवंहोम'इष्यते॥ऋगंतेतत्रहोतव्यंस्वाहाकारंपठन्त
इत्यृक्त्वादाचार्यःसमन्वारब्धोजुहुयात्सदसस्पतिमद्भुतमितिमाविच्याद्वितीयमि
त्येतादृशेषुमंत्रोक्तदेवतेपुतूष्णीमेवनिर्वपणंतूष्णीमेवप्रोक्षणंसहैवान्नंश्रपयेदत्रा
नास्तियुक्तरणमेव मादिष्टमंत्रहोमेषुसर्वत्रौपासनिके आज्याधिश्रयणाकरणे राम
आज्यस्यकेवलोत्पवनेचात्रदधिसक्तुत्वाजादिद्रव्यांतरस्यत्रिःप्रोक्षणं॥पाकयज्ञेषा ६८

ज्यभागौहुतादहुतंवित्यत्रोपितेषांपुरस्ताच्चतस्रआज्याहुतीर्जुहुयादितिसूत्रेणौपो
दि नयनानुप्रवचनीष्वादिष्टाज्यभागकेषुकर्मसुआज्यभागौनित्यौ॥॥दिक्नियमोजपहो
मादिकर्मसुयत्रमोक्तस्तत्रनिस्तोदिशः शस्तोऽयंदीसोम्यापराजिता।पत्रासीनऊर्ध्वप्र
कोवेतिनियमोनोक्तस्तत्रासीनेनैवकर्त्तव्यमंतर्जानुकरोनादेशोस्वयंकर्त्तामाकूलसा
धनानांप्राक्संस्थत्वं चकर्मणामुक्तकालेष्वभंकर्मयज्ञोपवीतंप्रदक्षिणंगाचारंकुर्या
प त्पुरस्ताद्दग्वोपकर्मावर्गचौलकर्मोपनयनंप्र थमविवाहचत्वारिवद्व्रतानिसमा
वर्त्तनमंतानिलौकिकेग्नौकुर्याद्पाकर्मोत्सर्जनेवायंसर्वोधान्याहिताग्निर्हुत्वोक्तान्य
एकादीनिकर्माणिलौकिकेग्नौकुर्यान्नत्वेवमनुष्ठानमाज्यभागोत्तरंपुनस्त्वादित्यारुद्रा
वसवःसमिधंतांपुनर्ब्रह्माणोवसुनीथयज्ञैः। घृतेनत्वंतनुवोर्द्धवेषस्वसत्याःसंतुयज

मानस्यकामाः स्वाहाऽग्नितिकृत्वाऽग्निप्रधानहोमंकुर्यादथयद्यग्न्याधेयेसर्वमौपासन
मभिप्रव्रजेयुःपुनस्त्वादित्याऽऽवसवःसमिंधतामित्येतयास्रुवाऽऽहुतिंकृत्वालौकि
काग्नौगृह्याणिकर्माणिप्रयुंजीतेतिबौधायनमायश्चित्तसूत्रेऽऽहुत्वाऽऽहार्यौपासने
कुर्यात्सवौधानेतुलौकिकेकार्येस्मार्त्तेलौकिकेचश्रौतंवैतानिकाग्निष्ठितिस्मत्यर्थेसा
रेऽऽहुत्वाऽऽहृत्यजातनामान्नचौत्तानिकुर्यादपितूक्तौमथेधमवसुकर्मस्वन्वाधानेऽग्न
रग्निधाबर्हिषोःसंनहनंहोमेसर्वत्रोभयतःपरिसमूहनपर्युक्षणेचाथानुज्ञमन्यतो
ग्राह्य मितिवचनाद्दोऽराक्षसनैर्ऋतपैतृछेदननिरसनात्माग्निमशेनानिचकृत्वाऽऽप प
स्पृशेत्॥इत्यापस्तंबसूत्रोक्तमविज्ञातस्वरमंत्रेणैकश्रुत्यंब्रूयादित्यलंबहुना॥ ॥इर्वे राम
एह्यग्नेजुषोदमूनाऽइत्येताभ्यामग्निप्रतिष्ठोक्तानत्रपारिजानेगृह्यपरिशिष्टेस्थंडि ६९

नेग्निंव्याहृतिभिरभ्यात्मंप्रतिष्ठापयेति॥अत्रव्याहृतिभिरुपलक्षणंएह्यग्नेजुषोदमूना
ऽइत्येतयोर्हरदत्तेनमंत्रभाष्येतयोर्मंत्रयोरग्निप्रतिष्ठापरत्वेनव्याख्यातत्वात्॥सर्वत्रा
पिव्याहृतिभिरग्निप्रतिष्ठाकार्याभूर्भुवःस्वरोमितिप्रतिष्ठेतिहिरण्यकेशिसूत्रेऽऽहु
त्वात्॥समिधःस्मृत्यर्थसारे॥पालाशखदिरश्वत्थशम्युडुंबरजासमित्॥अपामार्गा
र्कदूर्वाश्वकुशाश्चेत्यपरे विदुः॥हेमाद्रौत्वाह्ये॥शमीपलाशन्यग्रोधक्षवैकंकतोऽन्य
वाः॥अश्वत्थोडुंबरोबिल्वश्चंदनःसरलस्तथा॥शालश्चदेवदारुश्चखदिरश्चेतियज्ञि
याः॥अन्येपिविशेषःपारिजाते॥समित्पवित्रंवेदश्चत्रयःप्रादेशसंमिताः॥इध्मस्तद्वि
गुणःकार्यस्त्रिगुणःपरिधिःस्मृतः॥स्मार्तेप्रादेशइध्मोवाद्विगुणःपरिधिःस्मृतः॥स्म
त्यर्थसारेप्येवं॥स्मार्तेपरिध्यनुष्ठानमापस्तंबीयानांसएवेत्यन्यत्र॥नसर्पणासमित्का

योहोमकर्मसुस्नानेति।इष्टापूर्त्तादिकंकार्यंस्वशाखोक्तंनविद्यते॥तत्रबौधायनंग्रा
ह्यंवस्तूचादिभिरादरात्॥इत्यक्त्वाबौधायनसूत्रानुसारेणबौधायनीयमापस्थि
नदीपोक्तंयावदपेक्षितंकिंचिल्लिख्यते॥अथहविषामर्थेव्रीहियवोमुख्यौ॥तयो
रभावेप्रियंगवः।तेषामभावेकोद्रवोदारकमाषवर्जंसर्वाण्यान्याओषधयोभोजने
ष्वविरुद्धाग्राह्याः।यद्वाव्रीहियवप्रियंगूनामभावेश्यामाकनीवारयवादयआर
ण्याओषधयोग्राह्याः।तेषामभावेतरसंकंदमूलफलानिग्राह्याणि॥आज्यार्थंगवां
घृतंमुख्यंतस्यालाभेमाहिषंमार्जवाघृतं॥तयोरलाभेतैलंप्रतिनिधिः॥तस्याला
भेजतिलतैलं॥अतसीकुसुंभसर्षपतैलान्याद्याः।तेषामलाभेपुन्नागमधूदकादी
नांवीजोद्भवस्नेहाग्राह्याः॥तेषामभावेभोजनेषुविरुद्धानारिकेलादिसंभवस्नेहा

रत्न
७१

चतुरः प्रतिनिधीनाह।युग्धन्यंवाह्यंदधिपयोवेसाज्यस्य

न्य

ग्राह्याः॥लोकशास्त्रविरुद्धानिनिंबादीनिवर्जयेत्॥सर्वेलाभेयवपिष्टानिव्रीहिपिष्टा
निश्यामाकपिष्टानिवाद्भिःसंस्कृज्यआज्यार्थंप्रयुंजीत॥जैमिनिराज्यस्यैप्रतिनिधयइ
ति।युग्धौमीषद्धिन्नीनंनवनीतं॥शाकटादि नावाद्यमानेदध्निवर्तन्येवयद्भवतिनद्धा
ह्यं॥दधिपयसीप्रसिद्धे॥आज्यपयसोःपरस्परंप्रतिनिधित्वं।यथाहकौंडिन्यः॥आ
ज्याभावेपयःपयसाभावेआज्यंनहन॥॥दर्भकार्येकुशामुख्याः॥कुशाभावेआस्फो
वाल्ये॥तदभावेशरः।कुतपईक्षवः॥सुगंधितृणानिहवोऽर्जुनदारश्यामाकमंजा
ग्राह्याः॥शुकशुंछनबल्वजछत्रातृणंतृणवर्जंतृणानिदर्भकार्येरक्षीयात्॥स्मृत्य
र्थसारेप्येवं॥पालाशः खादिरोवेध्मोमुख्यः।पालाशस्त्रिविधिः॥श्लक्ष्णाकोलोमशो
ब्रतरिति॥पालाशेषुत्रिविधेषुश्लक्ष्णकोमुख्यस्तदभावेइतरौग्राह्यौ॥खादिरोद्विविधो

रक्तःश्वेतश्चेति॥पालाशखादिराभावेयाज्ञियानांवृक्षाणांअन्यतमस्येध्मःकार्यः॥ते
षामप्यभावेनीपनिंबबिल्वबाधकबेभीतकराजन्यवृक्षशाल्मश्यरराकपिल्वकरंज
कोविदारश्लेष्मान्तकपलाशीतित्रयोदशवृक्षान्वर्जयित्वासर्ववृक्षेभ्यइध्मंगृह्णी
यात्स्मृत्यर्थसारेप्येवंत्रिकाडमंडनेप्येवमेव॥एवंपाञ्चेष्टकाष्ठाद्यभावेश्वत्थौदुंबरकपित्था
दीन्वर्जयित्वा॥वृक्षमात्रंगृह्य मित्यकंभाव्यं॥ ॥अत्रपालाशखादिरेध्माभावेअश्व
त्थोडुंबरशम्यर्कपामार्गोदयइत्यकंभाव्यं॥पालाशःखादिरोवास्यादिध्मः॥शमीव
दादिकंग्राह्यमनयोर्यद्यसंभवइतिकारिका॥प्रायश्चित्तप्रदीपेदक्षिणानांकालेगो
हिरण्यंवासोवादक्षिणांदद्यात्॥काम्येष्टिषुवासोदक्षिणा॥याअनादिष्टदक्षिणाप्राय रास
श्चित्तेष्वस्तासुसर्वत्रहिरण्यं दद्यात्॥नित्येष्टिपशुपाकानांदक्षिणानामभावेफलं ७१

निष्क्रयान्निष्कक्षाणिवादक्षिणांदद्यात्॥यथाकंयंचिन्नित्यानिकर्तव्यानिनित्यंनित्यानि
कुर्वीतनचनित्यानित्येषयेदित्याचार्येणोक्तत्वात्॥काम्येष्टिषुनैमित्तिकेष्टिषुचयथो
क्तदक्षिणांदद्यात्तदलाभेप्रत्याम्नायत्वेनशक्त्यनुसारेणहिरण्यंदद्यात्॥सतिद्रव्ये
हीनकल्पंनकुर्यात्॥तथाहमनुः॥हीनकल्पंनकुर्वीतसतिद्रव्येफलप्रदं॥प्रभुःप्रथ
मकल्पस्ययानुकल्पेप्रवर्तते॥नपारलौकिकंतस्यदुर्लभंविद्यतेफलमिति॥ ॥अत्र
स्मार्तेष्टिश्राद्धेनस्थालीपाकःशतचंडीरुद्रहोमायुतहोमानिचकर्मोणिग्राह्याणिरु
द्रविरुद्धिष्टदक्षिणेत्यादिष्टदक्षिणाअग्नयेपुत्रिणेत्यादिकारिकोक्ताःअन्यवाकाम्यवृ
षोत्सर्गादिकाःकाम्याःपथिच्छदित्यादिप्रायश्चित्तस्थालीपाकाः॥श्रवणाकर्मादिनित्ये
ग्रहमखादिनैमित्तिकं॥वक्ष्यमाणभागेपत्नीमुपवेश्येत्यकं॥तत्रसंस्कार्यसंस्कारक

पत्नीनामुपवेशननिमंः स्कंदेनोक्तोमेंगाभवा॥संस्कारकस्तसर्वत्रतिष्ठेदुत्तरतःस
दा॥संस्कार्यःपुरुषोवापिस्त्रीवादक्षिणतःसदा॥ऋतौपुंसवनेचैवसीमंतेयज्ञकर्म
णि॥श्राद्धकालेविवाहेषुपत्नीदक्षिणतःसदा॥विवाहेग्रहवेशेचपुंसिचैलेतथैव
दे च॥जातेनाग्नि.चकुर्वंतिविलौग्नौतथैव॥एषुकर्मसुपत्नीचदक्षिणेचोपवेशयेत्। च
शौनकोपि॥कंन्यादानेविवाहेचप्रतिष्ठायज्ञकर्मसुसर्वेषुधर्मकालेषुपत्नीदक्षिण
गे तःसदा॥त्रिषुस्थानेषुसापत्नीवामभागेप्रशस्यते॥पितृणांपादशौचेचरथारोहेमृतौ
तथेति॥अभिषेकेपि॥॥अथपार्वणस्थालीपाकस्तस्य पौर्णमास्यांप्रथमारंभः
पर्वणिप्रातरोपासनंकृत्वादर्भेघासीनोदर्भौधारयमाणःपत्नीभिःसहप्राणानाय राम
म्ययज्ञपुरुषात्मकपरमेश्वरप्रीत्यर्थंदर्शपौर्णमासस्थालीपाकाख्यंयक्ष्ये॥तत्रेदानीं ७२

पौर्णमासस्थालीपाकेनयक्ष्ये॥इतिपौर्णमासे॥दर्शेतु॥पूर्वंसंकल्पितदर्शस्थालीपाकेन
यक्ष्यइतिसंकल्प्य॥सप्तहस्तप्रमितुःशृंगःसप्तजिह्वोद्विशीर्षकः।त्रिपात्प्रसन्नवदनःसु
खासीनःशुचिस्मितः॥स्वाहांतुदक्षिणेपार्श्वेदेवीवामेस्वधांतथा।बिभ्रद्दक्षिणहस्तेस्रु
ग्गस्मिन्नंस्रुचंस्रुवं॥तोमरंव्यजनंवामेघृतपात्रंचधारयन्॥आत्माभिमुखमासीनएवं स्व
रूपोदृताशनः॥चत्वारिशृंगतिचाग्निंध्यात्वास्थालीपाकेदेवतायैग्रहार्थमस्मिन्नग्नावग्निं परि
ज्ञातवेदसमिध्मेनप्रजापतिंप्रजापतिंचाघारदेवतेआज्येनाग्नीषोमौचक्षुषीआज्येना
ग्निमग्निषोमौप्रधानदेवतेचरुद्रव्येणेतिपौर्णमास्यामग्निमिंद्राग्नीप्रधानदेवतेचरुद्र
व्येणत्यमावास्यायामग्निंस्विष्टकृतंहुतशेषेणरुद्रंपशुपतिमिध्मसन्नहनेनाग्निमया
संदेवाग्निंस्तुमग्निंवायुंसूर्यंप्रजापतिंचएताःप्रायश्चित्तदेवताःआज्येनविश्वान्देवान्

संस्त्रावेणज्ञाताज्ञातदोषनिबर्हणार्थेत्रिवारमग्निमरुतश्चाज्येनांगदेवताःप्रधानदे
वताःसर्वाःसंनिहिताःसंतुसांगोपागेनकर्मणास्रोयक्ष्येसघस्कान्पक्षसघोयक्ष्या स्
मस्तव्याहृतीनांप्रजापतिर्ऋषिःप्रजापतिर्देवतादेवीबृहतीछंदः॥अन्वाधानसमिधा
मेवि०। ॐभूर्भुवस्वःस्वाहाप्रजापतयइदंनमम॥इध्मावर्हिषीसन्नह्यदर्भैस्त्रिसंधि
त्रिरावृतं रज्जुद्वयंकुर्यात॥तत्रप्रादेशमात्रान् षट्त्रिंशद्दर्भान्रज्जुकरणार्थंगृही
त्वातत्रद्वादशदर्भैःसंधित्रयवतींरज्जुंप्रादक्षिण्येनछत्वापुनरन्यांरज्जुमेवंछत्वोप
यमपिप्रादक्षिण्येनसमस्यपुनरन्याछत्वाप्रादक्षिण्येनत्रिःप्रथमामुदग्ग्रामास्तीर्य
प्रादेशमात्रांदर्भमुष्टिंछित्वापउपस्पृश्यप्रागग्रांतस्यांनिधायतयाबर्हिरावेष्यारज्जुमू राम
वापुरोडाशंनिमज्जयेत्॥८॥अथहुत्वाज्यभागांतेचर्वाहुतिंचतुष्टयं॥हुत्वाचतु

ष्टयेनाग्नेनयेतिप्रत्यृचंननतः॥९॥उपस्तीर्योपसव्येनदक्षिणेप्रोक्षितेकरेसव्येनेककपालं
नमोप्यस्तत्नम स्वंडितं॥१०॥उपरिष्टात्सव्येनकुर्यादिरभिघारणं॥अच्युतायेतिमंत्रेणद
क्षिणेनजुहोत्यथ॥११॥यस्मिन्नाज्येनिमग्नोयंस्रुवेणेवजुहोतितत्र॥उपर्येककपालस्य
मानोअग्नेइत्यृचा॥१२॥अथोपस्तरणाद्धन्यःकरोतिगृहिणोजनौ॥सतेनजुहुयाद
क्ताधानाःशान्तोभवंतिति॥१३॥यास्तधानाअनभ्यक्ताःपुत्रादिभ्योदत्तानिताः॥अथ
स्विष्टकृतंहुत्वाचैधानेकदेशतः॥१४॥परिषेचनपर्यंतंहोमशेषंसमापयेत्॥इत्थ
कंश्रवणाकर्मसर्पबल्याख्यमुच्यते॥१५॥ ॥इतिश्रवणाकर्म॥अथप्रहरयेद्वैसनु
भिःकंशस्थितैः॥गृहात्मागुपनिष्क्रम्यप्रचेदिशेन्हिकल्पिते॥१६॥अपआसिच्यतानौ
पसर्पदेवेतिमंत्रतः॥नांतराबलिमात्मानंभवेयादिकश्चन॥१७॥व्यवायस्यनि

धेयमुक्त्वाप्रदानतः॥येसर्पाइतिमंत्रेणंनमस्कुर्यात्कृतांजलिः॥१८॥बलिंप्रद
क्षिणंकृत्वापश्चादस्यापविश्यच॥सर्पोसीत्यादिकंमंत्रंदराम्यंतंसकृदेत्॥१९॥ध्रुवा
मुंतंपरिदराम्येतमुक्त्वानिवेदयेत्॥ज्येष्ठानुक्रमतःपुत्रानप्रतिहितस्तथा॥२०॥ततः
पत्नींध्रुवामुंतइत्याद्यावर्त्तनेत्रतु॥वाच्यं पुत्रादिनामात्रद्वितीयांतममुंपदे॥२१॥ध्रुवमु
मितिचात्मानंततःपरिदातिसः॥अन्यःकुर्वीतचेदाहगृहिणोनाममांपदे॥२२॥सायं
प्रातश्चमंत्रेणैनाप्रत्यवरोहणात्॥बलिमेवहरेन्नैव नमस्कारादिरिष्यते॥२३॥सायं
प्रातश्चयावंतःकालास्तुस्तद्दिनादधः॥तावतोवाबलींस्तस्मिन्नेवाहनिहरेदथ॥२४
इतिसर्पबलिः॥कुर्वीताश्वयुजमासस्यपौर्णे
मास्यांतुकर्मेतत्॥२५॥निवेशनमलंकुर्यात्कुड्यानांलेपनंभवेत्॥उपर्याछादनंचे

षांसमांभूमिंकरोत्यथ॥२६॥सर्वेष्वाविशेषेणस्रांतिश्रुक्कांवरस्तथा॥उपासनेऽकृते
प्रातरन्वाधानादिपूर्ववत्॥उक्तापशुपतीत्येतच्चतुर्थ्यंतंततःपरं।त्वाजुष्टंनिर्वपामी
तिनिर्वापप्रोक्षणंतथा॥२८॥प्रोक्षामीतिविशेषस्तुप्रोक्षणेन्यत्समंभवेत्॥चरुश्र
पणपर्यंतमवघातादिपूर्ववत्॥२९॥कुर्यात्पृषातकंनामहविरन्यन्नइच्यते॥पय
स्याज्येनिष्पिनुतुतत्पयस्यापृषातकं॥अस्यापिचसहाज्येनपर्यग्निकरणंभवेत्॥
अज्यस्यकेवलेत्पूतौतस्यत्रिःप्रोक्षणंभवेत्॥इध्माभिघारणंतस्यादाज्याद्वासं
नादिकं॥हुत्वाज्यभागपर्यंतमन्वारब्धःसुतादिभिः॥३२॥पशुपतयेशिवायशंक
रायेतिनामतः॥एषातकायस्वाहेतिमंत्रेणजुहुयाच्चरुं॥३३॥अथोपस्तरणाद्यन्यः
करोतिगृहिणांजलौ॥स्वत्वतःस्रुवेणैवएषातकमवद्यति॥३४॥जुहोत्यंजलिना

पेतदूनंमेपूर्यतामितिं॥हविर्हयांशतःस्विष्टकृतंहुत्वासमापयेत्॥३५॥इत्याश्वयुजी
कर्मशारद्यायणंनामपर्वणिस्यानइष्यते॥पूर्णपात्रनिधानांतमन्वाधा नादिपूर्ववत्
३६॥निर्वापप्रोक्षणेतूष्णीभवेतामत्रकर्मणि॥हुत्वाज्यभागपर्यंतमवघातादिपूर्ववं
त्॥३७॥तिस्रश्चर्वाहुतीर्हुत्वासन्नरित्यादिभिस्त्रिभिः॥ततःस्विष्टकृतंहुत्वापूर्वनि
प्राशनंत्विति॥३८॥चरुशेषस्यैकदेशंसव्येपाणौनिधायच॥प्रजापतादिमंत्रेणद
क्षिणेनाभिमृशेत्तं॥३९॥भद्रान्नइतितुप्राश्याच्चम्याथोनाभिमात्मनः॥आत्मभेतो
पविएसकृतत्रैवामोसिमंत्रतः॥४०॥मध्यमंतुहविःशेषंपत्नीप्राश्याद मंत्रकं॥प
रिषेचनपर्यंतंहोमशेषंसमापयेत्॥४१॥एतदाग्रयणंकुर्यात्त्रेतायामाहितानलः॥
इत्याग्रयण॥एवमाग्रयणंप्रोक्तंवक्ष्येप्रत्यवरोहणं॥४२॥मार्गशीर्षस्यमासस्यपौर्ण

मास्यांतदिष्यते॥पूर्वेद्युर्वाभवेन्नदत्तंहुत्वाग्निंविशेत्तनं॥४३॥भानावस्तमितेऽर्वागन्वा
धानादिपूर्ववत्॥निर्वापप्रोक्षणेतूष्णीपयसिश्रपयेच्चरुं॥४४॥हुत्वाज्यभागपर्यंत
मन्वारब्धःसुतादिभिः॥अपश्येतेतिमंत्राध्यांजुहुयात्तायसाहुती॥४५॥जपेदभ
यमित्यादिमीक्षमाणोहविर्भुजं॥उल्काशिवोनइत्यादिहेमंतेतिपदंस्मरेत्॥स्वस्तरं
स्वयमास्तीर्यपश्चादग्नेरतःपरं॥तत्रोपविशतिस्योनापृथिवीतिजपेदृचं॥४६॥ए
तत्प्रभृतिमंत्रज्ञाजपेयुस्तनवोपिच॥शयीततत्रसामात्यःप्राक्शिराउदगाननः॥गृहि
णोनंतरंयोपेज्येष्ठस्तल्पंछयीतसः॥यथावकाशमथवाशेरतेनदृदेवते॥उत्थायचे
मतोदेवाप्राङ्मुखास्त्रिर्जपेत्पथ॥ऋचोस्याःप्रथमंपादंजपेयुर्दक्षिणामुखाः॥५१॥ राम
प्रत्यङ्मुखाद्वितीयंतुतृतीयमुदगाननाः॥तृतीयेविष्टलंहुत्वाहोमशेषंसमापये ११११

त्॥यथाज्ञाप्यंज्ञापयित्वातेसंगताउदितेरवौ॥जपेयुःसूर्यसूक्तानितदुत्थस्यनानिच।
५२॥उदुत्यंजातवेदसंदेवानामुदगादिति॥नमोमित्रेचसूक्तंचसूर्योनइतिचापरं॥५३॥
उक्तानिसूर्यसूक्तानिवस्येत्थस्यनान्यथा॥अनोभद्रास्तथास्वस्तिनोमिमीतांपरावतः॥५४॥संस्कृतेनगृहान्नेनब्राह्मणान्भोजयेदथ॥ॐस्वस्तिब्रूतइत्युक्त्वाॐस्वस्ती
तिब्रुवंतिते॥५५॥इतिप्रत्यवरोहणं॥॥अथपिंडपितृयज्ञः॥एवमाहिताग्निर्नित्ये
य श्राद्धंपित्वात्रिप्रणीजुहुयादितिसूत्राद्धुत्वाग्निमतःपिंडपितृयज्ञप्रायः सचगृह्याग्नि
परिचरणोन्तरंयदैवदर्शोप्राप्तिस्तदैवारंभणीयःनपुनस्तस्यदर्शपूर्णमासस्थालीपा
प कारंभप्रतीक्षा॥अमावास्यायामेराह्णेपिंडपितृयज्ञेनचरत्यमावास्यायामपराह्णेपिं
डपितृयज्ञइतिश्रुतिसूत्रयोस्तस्यस्वतंत्रकालविधानात्पिंडपितृयज्ञःस्वकालत्वादनं

गृ.सा. गृह्यादितिजैमिनिसूत्रेच्च॥ ॥तत्रसूत्रं।अमावास्यामपराह्णेपिंडपितृयज्ञइति॥अमावा
१११ स्याश्चाद्यःप्रतिपत्संवदृश्योःसंधिवचनःअत्रापराह्णश्चासमन्वयान्नहत्यहोरात्रेवर्त्तते॥
तस्याअपराह्णेअहश्चतुर्थेभागेपिंडपितृयज्ञःकर्त्तव्यइतिवृत्तिः॥अनेनखंडेदर्शे
शेषपर्वणिस्थालीपाकोत्तरंअप राह्णेपिंडपितृयज्ञःकर्त्तव्यइतिसाधितं॥अखंडे
तुदर्शेतद्दिनएवपिंडपितृयज्ञः॥अहोरात्रसंधौतिथिसंधौतुयाग पूर्वदिनएवे
तिवृत्तिकृत॥यागःस्थालीपाकः॥अत्रयोनाहिताग्निरौपासनाग्निमान्मृतपितृकः
सवक्ष्यमाणंपार्वणश्राद्धंपिंडपितृयज्ञंचाखंडेदर्शेव्यतिषंगेणकुर्यात्॥खंडे दर्शे
तुपूर्ववछेषपर्वणिपिंडपितृयज्ञःपूर्वेद्युःकेवलंपार्वणश्राद्धमेवनव्यतिषंगः॥वृत्ति राम
कृतानात्रापूर्वःस्थालीपाकश्चोद्यतेसर्वश्राद्धेषुप्रसंगादित्यृक्तेः।व्यतिषंगोनामद्वयोः १११

कर्मणोर्विच्छिद्यसहानुष्ठानात्मकस्तंत्रविशेषः।अत्रार्थेनिर्णयसिंधुः॥आश्वलायनाना
मपिशेषपर्वणिपिंडपितृयज्ञः॥तथाचसूत्रं॥अ मावास्यायामपराह्णेपिंडपितृयज्ञ
इति॥अत्रनारायणवृत्तिः॥अमावास्याश्चाद्यःप्रतिपत्संवदृश्योः संधिवचनोप्यत्रा
पराह्णश्चासमन्वयान्नहत्यहोरात्रेवर्त्तते॥तस्यापराह्णेअहश्चतुर्थेभागेपिंडपि
तृयज्ञःकार्यः औप वसथ्येयजनीयेवाहनियदात्वहोरात्रसंधौतिसंधिःस्या थि
न्नदौपवसथ्यएवाहनिक्रियतइति॥अयंचस्मार्ताग्निमतासंपूर्णदर्शश्राद्धव्यतिषं
ना गेणकार्यः॥व्यतिषंगोभयोःसहानुष्ठानं।एतच्चस्थालीपाकेनसहपिंडार्थमुक्त
त्येतिसूत्रेवृत्तिकृतोक्तं॥ खंडपर्वणितुकेचिदाहुःपूर्वेद्युःपिंडपितृयज्ञव्यति
षंगेणश्राद्धंकृत्वापरेह्निपिंडपितृयज्ञःकार्यः॥वृत्तिकृताआन्वष्टक्यं च पूर्वे

घुर्मासिमास्यपार्वणं॥काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमित्यदाहृत्यपूर्वेषुच
तुर्षुस्थालीपाकादुद्धृत्याग्नौकरणमित्यन्तैर्दर्शश्राद्धेस्थालीपाकोनिगदेतिगम्यते॥
स्थालीपाकश्चपित्रयज्ञएवेतिपूर्वदिनेव्यतिषंगःसिद्धः॥प्रयोगपारिजातेतुवार्षि
कश्राद्धेरपिव्यतिषंगउक्तः॥किमुतदर्शश्राद्धस्यन्यायविदस्त्वाहुः॥स्त्रश्चष्ट
न्तेश्वसंपूर्णदर्शविषयत्वात्खंडपर्वणिपूर्वदिनेकेवलंश्राद्धंपरेदिनेचकेवलंपित्र
यज्ञःकार्यः॥अतएवोक्तंवृत्तिकृतानात्रपूर्वेस्थालीपाकश्चोद्धृतसर्वश्राद्धेषुप्रसं
गादिति॥प्रयोगपारिजातोक्तिरप्येतद्विषयैवापूर्वदिनेचश्राद्धेअग्नौकरणमे
वनपाणिहोमः॥चतुर्ष्वीधेषुसाग्नीवैश्वौहोमोविधीयते॥पित्र्यब्राह्मणहस्तेस्याद्उत्त रात्र
रेषुचतुर्ष्वपीति॥परिशिष्टेनियमात्॥नचत्रौकिकाग्नौपक्वस्यकथंगृह्याग्नौहो ११२

नां

मः॥नान्याग्नौपक्वमन्याग्नौजुह्वादितिनिषेधात्॥मैवं॥श्राद्धस्यगृह्यत्वेनस्मार्ताग्नौ
पचनाग्नौकर्तव्यत्वात्तस्मात्पूर्वेद्युःकेवलंश्राद्धंनव्यतिषंगः॥इदमेवयुक्तं॥आ
हिताग्निनातुसर्वाधानिनार्द्धोपानि॥नाचसंपूर्णेखंडेवादर्शेश्रौताग्नौएवगेवपि
त्रयज्ञः कार्योनतुदर्शश्राद्धव्यतिषंगेणेति विस्तरभीतर्विरामः॥इतिनिर्णयसिं
धूक्तं॥॥अथप्रथमदर्शेपत्न्यारजस्वलायांपिंडपित्रयज्ञारंभंनकुर्यात्॥पिंडपि
त्रयज्ञोपप्रायश्चित्तार्थंसप्तहोमारंभाअनंतरंदर्शेपिंडपित्रयज्ञारंभं कुर्यादि
त्यर्थं प्रायश्चित्तप्रदीपेहि तीयादौपिंडपित्रयज्ञेनप्रतिबंधउक्तंभाव्यं॥त
त्रअनाहिताग्नेर्दक्षिणाग्निस्थानीयेऔपासनाग्नौश्रपणहोमोभवतः॥यद्वाप्र
योगरत्नेवाजपेयिकृतश्राद्धपक्वतोद्धृत्वाद्यथासंप्रदायंविचार्यैत्यर्थकृत्वादति

ग·सा· प्रणीतेहोमइतिसाधितत्वाच्चनित्येस्रुपयित्वातिप्रणीतेवाहोमः॥अत्रहोमेपक्षद्वये
११३ ता उपवीतिप्राचीनावीतिताचात्राद्यपक्षेअग्नयेकव्यवाहनायस्वाहा॥सोमायपितृ
मतेस्वाहेतिकृत्वासव्येनैवमेक्षणानुप्रहरणं॥प्राचीना वीतिताहोमपक्षेतुस्रुवेणो
मायपितृमतेस्वधानमस्तताग्नयेकव्यवाहनायस्वधानमइतिजुह्वांप्राचीनावीतिने न्
वमेक्षणानुप्रहरणं॥यद्यपिभट्टैःप्रयोगरत्नेवाजपेयिभिःस्वकृतग्रन्थेचैतोचत्रभ पद्ध
सव्येन यपक्षेपिमेक्षणानुप्रहरणं॥इदानींतनानांयाज्ञिकोमेवंविधानुष्ठानदर्शनात्का ना
रिकायांस्वाहाकारेणहोमश्चेदुपवीतीभवेदिह॥अस्मिन्नेवनुपक्षेग्निंपूर्वमेव
जुहोत्यथमेक्षणानुप्रहृत्यंतंमंत्रयोर्व्यत्ययस्तथेत्यक्त्वात्स्मृत्यर्थसारेप्राचीना राम
वीतेनहोमपक्षेप्राचीनावीतेनैवमेक्षणानुप्रहृत्यंतंमंत्रयोर्व्यत्ययस्तथेत्यक्त्वा ११३
य

च॥सव्येनहोमपक्षेसव्येनमेक्षणानुप्रहरणं॥प्राचीनावीतेप्राचीनावीतेनैवइतिमथि
तोर्थः॥वृत्तिरुक्त्वरसक्तसव्येनेतिभाति॥तदाक्तौसूत्रछेद एवंस्वाहाकारेण
म वाग्निंपूर्वंयज्ञोपवीतीइदमेवंसूत्रं॥मेक्षणंनुप्रहृत्येत्यपरं॥प्राचीनावैरिखांत्रि० ती
महाइतितत्तोप्यपरं॥अत्रप्रासंगिकंकिंचित्॥यःअहीधानीआहिताग्निस्त
स्यश्रौतेनपिंडपित्रयज्ञेनैवमिहिःनपुनरौपासनहोमस्यात्रीपावत्स्मार्त्तोपि क
पिंडपित्रयस्तएवमनाहिताग्निर्नित्यइत्यतस्त्रस्यानाहिताग्नित्वेनप्राप्त्यभावा
त्॥॥अथपिंडपित्रयज्ञप्रयोगः॥अत्रैवंकारिका॥एकाग्निरपिकुर्वीतपित्रय
ज्ञंसउच्यते॥अथदर्शेपराह्णेनुमज्ज्यौपासनंततः॥१॥प्राग्दक्षिणाग्रकैर्दर्भैः
परिस्तीर्यहविर्भुजं॥कर्मसाधनमत्रेदंसर्वंप्रादक्षिणामुखं॥२॥दर्भानास्तीर्यवा

यव्यामेशान्यांवाहविर्भुजः॥स्थाल्यांयेकेकमासाद्यस्थालीस्रुवेप्रगृह्यच॥३॥व्रीहि
मष्टकटंवहेद्दक्षिणस्यामवस्थितं॥आरुह्यव्रीहिभिःपूर्णांस्थालींस्रुवेणनिगृह्य
च॥४॥शकटारोहणंचेदृभवेद्दक्षिणभागतः॥स्रुवस्थालुकटेमास्यद्दस्राजि
नउल्लखने॥५॥चरुस्थालीस्थितान्व्रीहीनवहन्याद्धृक्षतः॥सकृत्कृत्वोद्धतान
त्रसकृन्मक्षाल्यतंडुलान्॥अपयित्वोल्मुकंनीत्वायेरुपेत्यानलंदिशं॥अतिप्रणी
तएषोग्निस्तंपरिस्तीर्यपूर्ववत्॥७॥अवोगस्मन्त्रिरवेत्स्फ्यनेखांमहताइति॥अभ्यु म
क्ष्यतांसंस्तीर्यसकृदाछिन्नबर्हिषा॥८॥अनुस्रुतंविलीनाज्यंध्रुवापांसिच्यतेधु मा
नाउत्स्रुतंनवनीतंवासाद्यदक्षिणतोध्रुवं॥९॥अभिघार्यचरुंश्रौवेणादगुद्धास्य राम
पश्चिमे॥आसाद्यचांज[illegible]नादीनिदक्षिणस्यांहविर्भुजः॥१०॥प्राचीनावीत्यथे ११४

दानीमाधायेध्मंहविर्भुजि॥अथावदानधर्मेणगृहीत्वामेक्षणेननु॥११॥चर्वोरुतिरश्चं
कृत्वासोमायेतिहृयेनवै॥स्वाहाकारेणहोमश्चेदुपवीतीभवेदिह॥१२॥मेक्षणानुप्रहृ
त्यंतंमंत्रयोर्वत्यपस्तथा॥प्रास्याग्नौमेक्षणंचापोनिनयेत्पितृतीर्थतः॥१३॥लेखायां
पिंडदेशेषुशुंधतामितिमंत्रिभिः॥तत्रपिंडत्रयंदद्यात्प्राचीनेनपाणिना॥१४॥पि
त्रादित्रिभ्यएतत्तेविष्णोयेचेतिमंत्रतः॥नामानिचेन्नजानीयात्तत्तेत्यादिंदेक्रमात्।१५ द
स्वाहांतेनोक्तमंत्रेणपिंडोजीवायकल्पतां॥त्रिएतातत्रपितरइतिताननुमंत्रयेत्॥१६॥
अप्रदक्षिणमावृत्यचादक्षाणान्नियम्यच॥मत्याहृत्यानुमंत्र्यामीमदंतेत्यादिमंत्र
तः॥१७॥चरुशेषमवघ्रायनिनयेत्पूर्ववज्जले॥अभ्यक्ष्वांक्ष्वेतिनामादिमंत्राभ्यां
तैलमंजने॥१८॥दद्याद्दशमथैतद्दइतिपिंडेघृतःपरं॥नमोवइत्यपस्थायमनोन्वेति

त्रचेनच॥१९॥परेतनेति मंत्रेणपिंडान्त्रीन्प्रवाहयेत्॥औपासनांतिकंगत्वाजपेदग्ने
तमित्यृचं॥२०॥यदंतरिक्षमेतांतत्स्थएवजपेदृचं॥गार्हपत्यपदस्थेहत्वोपन्यायविदोवि
दुः॥२१॥वीरंमे दत्तमंत्रेणपिंडमादायमध्यमं॥तंपिंडंप्राशयेत्पत्नीमाधत्तेत्यादिमं
त्रतः॥२२॥अस्तुवानिप्रणीतेग्नावितरोप्रक्षिपेदथ॥सादितान्वथवानीहनवज्ञायु
धानितु॥२३॥ह्वेएवोत्सृजेन्नानिशिएसाहैतृणेनतु॥ ॥अमावास्यायामपराह्णेऔ
पासनाग्निमभ्यर्च्यशुचिःप्राणानायम्यधृतपवित्रोदेश कालौस्मृत्वापितृन्नि
दाम्नीपरमेश्वरीत्यर्थीपिंडपितृयज्ञंकरिष्ये॥इतिसंकल्प्याग्नेय्यभिमुखोग्निं
ध्यात्वापरिसमूह्याग्नेय्याग्रकैर्दर्भैःपरिस्तीर्योग्नेरीशान्यांवायव्यांवाग्नेय्याग्रकान्दर्भा राम
नास्तीर्योग्निंपर्युक्ष्यतेषुचरुस्थालींस्रुवंस्रुवं॥हविर्यज्ञं १९५

सकुशं नंबर्हिरिध्मंमेक्षणंजलपूर्णकमंडलुंचेतिदशपात्राणियथायोग्यंसंभृत्या
न्यकैकशआग्नेयसंस्थान्यासादयेत्॥पूर्वोक्तलक्षणःकाष्ठबर्हिःस्यात्तथाज्यधारणा
र्थोस्रुकस्रुवावाज्यप्रोक्षणार्थं॥पात्राण्युत्तानानिकृत्वाकमंडलुजलेनप्रोक्ष्यस्थालींस्रुवं
चादायाग्नेर्दक्षिणतोवस्थितेंध्रोहिमस्रुकंदक्षिणतआरुह्यस्थालींस्रुवंनिधायध्रु
हिभिःपूरयित्वायथास्थालीमुखस्थाःस्रुवंपतंतियथानिमज्जस्थालीमुखदेश
नःपतितान्व्रीहीन्शकटेनास्याग्नेःपश्चिमतोवायव्यग्रीवआस्तीर्यकृष्णाजिनउत्त
रलोमनिधायतत्रस्थालीस्थान्व्रीहीन्विधायाग्नेयाभिमुख्यानिष्पत्यापत्यावहतान्मुस
लेनावहतानविविच्यसकृत्प्रक्षालितान्जीवतउलूखलमुसलाभ्यांप्रपयेच्चरुमनुद्वास्यैवाग्नेरंक
प्रदीप्तमुल्मुकंगृहीत्वाग्नेयादिशिकृतेष्वग्निष्वित्येतेरूपाणिप्रतिमुंचमानाअसु

राः संतः स्वधया चरंति॥ परापुरो निपुरो ये भरंत्यग्निष्टा त्रोकात्प्रणुदात्वस्मादिति मं
त्रेण नीत्वा तं मतिप्रणीताख्यमग्निं पूर्ववत्परिस्तीर्य दक्षिणाभिमुखोऽप हताँसु अ
रारक्षांसि वेदिषदश्चिति मंत्रेण औपासनाग्निप्रणीतयोरंतराग्नेस्त्येनसव्योत्तराभ्यां
पाणिभ्यां गृहीतेनकुशाग्रमूलेनवाग्नेय्यभिमुखांस्तेखामुत्क्षिप्यतामद्भिरभ्युक्ष्य
सकृदाछिन्नबर्हिषालाघानुस्तृतमाज्यंविलाप्यतप्तमुस्रुतंनवनीतंवाभ्रुवायामा
सिच्यअग्नेर्दक्षिणतः कुशेघासाधस्तृवंसंमृज्यतेनध्रुवस्य माज्यमादायचरुमभि
घार्यउदगुद्वास्योपासनाग्नोहोमपक्षेतस्यपश्चादतिप्रणीताग्नोहोमपक्षेतिप्रणीता
ग्नेःपश्चाद्दर्भघासाधदक्षिणतोभ्यंजनांजनकशिपूपबर्हणान्यादायेत्ततोतिप्रणीता राम
ग्नेरौपासनाग्नेर्वापश्चिमतउपविश्यार्चयित्वाप्राचीनावीत्यक्षिघारितमरत्निमात्रं ११६

न२ सा२

प्रादेशमात्रंवापंचदशदारुकमिध्मंपितृतीर्थेनतूष्णीमग्नावभ्याधायस्रुवेणाज्यमा
दायमेक्षणउपस्तीर्यउद्गुतंचरुंद्विधाविभज्योत्तरभागमध्यादंगुष्ठपर्वमात्रंमेक्षणेनावदाय
पुनःपूर्वभागादवदायपात्रस्थमवत्तंचाभिघार्यसोमायपितृमतेस्वधानमइति अंगी
कृताग्नेर्दक्षिणभागेपराचीनपाणिर्कृत्वासोमायपितृमतइदंनममेतित्यजेत्॥पुनः
व पूर्वदक्षिण भागस्थचरोरवदायअग्नयेकव्यवाहनायस्वधानमइत्यग्नेरुत्तरभागे
दं पूर्ववत्कृत्वाअग्नयेकव्यवाहनायेदंनममेतित्यक्त्वाप्राचीनावीत्येवमेक्षणमग्नावनुप्रहरे त्य
त्॥अनुप्रहरणस्यहोमांगत्वात्॥स्वधानमः शब्दस्थानेस्वाहाकारेणवाहोमः॥तदा
य आकृत्याव्यंसउपवीति नाचमेक्षणानुप्रहरणपर्यंतं॥यथाअग्नयेकव्यवाहनायस्वा
हाइतिप्रथमाकृतिः॥सोमायपितृमतेस्वाहेतिद्वितीयात्यागश्चाकृतिवत्॥ततःप्राची

नावीतीपूर्ववद्धृतलेखायांस्थापितकमंडलुजलंदक्षिणहस्तेनपतितीर्थेनाग्नेय्यपवर्गेशुंधं
तांपितरःशुंधंतांपितामहाःशुंधंतांप्रपितामहाइतिमंत्रैस्त्रिर्निनयेत्॥ततोद्धृतशेषेण
साज्येनत्रीन्पिंडान्कृत्वातस्यांलेखायांपराचीनपाणिःपतितीर्थेनतान्पिंडान्नाग्नेय्या
पवर्गेपित्रादिभ्योदद्यात्॥तद्यथा॥एतत्तेमुकशर्मन्येचत्वामन्वनुतेभ्यश्चेतिपित्रेएवं
पितामहप्रपितामहयोरपि॥ततःअत्रपितरोमादयध्वंयथाभागमावृषायध्वमि
तिसद्धत्पिंडंननुमंत्रंसव्येनपार्श्वेनसव्यंवृत्योऽङ्गुष्ठोभूत्वामथाशक्तिप्राणान्नि
यम्यअभ्यावृत्य॥अमीमदंतपितरोयथाभागमावृषायध्वमितेतिपुनस्तान्नुमंत्र्यउपवी न
तीचरुशेषमवघ्रायचम्यप्राचीनावीतीपूर्ववच्छुंधंतांपितरइत्याद्यैर्मंत्रैस्त्रिभिःकमंड राम
लुजलंपिंडांतेनिनीयामुकशर्मन्नभ्यक्षेतिस्त्रिभ्योपिपिंडेभ्यंजनंतैलंघृतंवादर्भे ११७

५ नमोवःपितरोघोरायनमोवःपितरोजीवाय५

णदत्वाअमुकशर्मन्नंक्ष्वेतितथेवांजनंदद्यात्॥अथेतरःपितरोवासोमानोतोन्यपितरो
युङ्ग्वमितिप्रतिपिंडंमंत्रावृत्यानवांवासोदशांपंचाशद्धस्तोधिकवयश्चेत्स्वप्नकोष्ठहृद
यान्यंतरलोमवादत्वाकशिरुपबर्हणानिनिंद्यसव्योनराभ्यांपाणिभ्यांहृतांजलिराग्ने
य्यभिमुखःपिंडानुपतिष्ठेतमंत्रैः।तेचनमोवःपितरइषेनमोवःपितरऊर्ज्जेनमोवः
पितरःशुष्मायनमोवःपितरोरसायस्वधावःपितरोनमोवःपितरोनमएतायुष्मा
कंपितरइमाअस्माकंजीवावोजीवंतइहसंतस्याम॥मनोन्वाहवामहेनाराशंसेनसो वे
मेन।पितॄणांचमन्मभिः॥आतएतुमनःपुनःक्रत्वेदक्षायजीवसेज्योक्चसूर्यंदृशे॥पु
नर्नःपितरोमनोददातुदैव्योजनः।जीवंव्रातंसचेमहिइतिच॥अथयेतनःपितरः
सोम्यासोगंभीरेभिःपथिभिःपूर्व्येभिः॥दत्वायास्मभ्यंद्रविणेहभद्रंरयिंचनःस

र्वीरंनिमछत।इतिमंत्रेणपिंडानाग्नेयाभिमुखंसङ्कुन्नानेनहस्तेनचालयेत्॥अग्ने
तमद्याश्वंनस्तोमैःक्रतुन्नभद्रंहृदिस्पृशं॥ऋध्यामात्वौहैः॥इत्युपासनाग्निसमीपं
गत्वा॥यदंतरिक्षंपृथिवीमुतद्यांयन्मातरंपितरंवाजिहिंसिं॥अग्निर्मातस्मादेनसः म
प्रमुंचतुकरोतुमामनेहसं॥इतिमंत्रंगार्हपत्यपदरहितंपठेत्॥केचित्तुद्वाभ्यामपि
मंत्राभ्यामग्न्युपस्थानमाहुः॥अथवीरंमेदत्तपितरइतिमंत्रेणमध्यमंपिंडमादाय
सुपुत्रप्राप्त्यैपत्न्याप्राशयेत्॥आधत्तपितरोगर्भंकुमारंपुष्करस्रजे॥यथायम र
पाअसदितिमंत्रेण॥अयंमंत्रःपत्न्याःपत्योबह्वृच्वेद्विभज्यपिंडंप्रतिपत्नीमंत्रेणप्रा
शयेदित्यूक्त मंडिलायां॥रामांडारेतनीयपटलेप्येवं॥निर्णीसिंधौश्राद्धकलिकायां राम
छागलेयःप्राचीनावीतमामंत्र्यपत्नीपिंडोविभज्यते॥प्रतिपत्न्यस्यमंत्रस्यकर्त्तव्या ११८
पत्नीबहुत्वेपिंडविभागोमंत्रावृत्तिश्चेयुक्तंगृह्यकारि य
कायोमप्येवं२

वृत्तिरत्रतु॥व्यतिषंगश्चेदुद्धावपिमध्यपिंडौविभज्यप्रतिपत्नीमंत्रेणप्राशयेत्॥तत्रपिं
डद्वयप्राशनेभागद्वयप्राशनेचसकृदेवमंत्रःसहभक्षत्वात्॥नृसिंहपारिजातेतुपत्नी
द्वित्वेअथोत्पन्नमध्यपिंडंएकस्यैचमतामहपिंडमेकस्यैचदद्यात्॥पत्नीबहुत्वेतासांगु
णतोवयस्कालनसमर्थाभ्योदद्यात्॥तत्रसर्वाःसमर्थाश्चेदृतुकालानुसारेणदद्यात्।
अथवाआगामिदर्शेवादद्यादित्याद्युक्तमयुक्तंवाविचारणीयमेतत्॥इतरौपिंडावस्व
ग्निप्रणीतेवाक्षिपेत्॥ब्राह्मणंवाप्राशयेत्॥स्मृत्यर्थसारेतु॥पिंडास्तुगोजविप्रेभ्योदद्याद
ग्नौजलेपिवाक्षिपेत्॥आसादितानांपात्राणांमध्येछदाछिन्नबर्हिरिध्मसेक्षणीनांवि स
निमुक्तत्वादवशिष्टानांनवानांहृद्यावत्सर्गः॥अवशिष्टमेकंतृणेनसहोत्सृजेत्।अ
ग्नेःपरिसमूहनपर्युक्षणेस्मृत्यर्थसारोक्तत्वात्त्रिरित्यनेन॥मदनरत्नेवायुपुराणेकं

ङनंपेषणंचैवमथनोल्लेखनक्रिया॥सह्यदेवपितॄणांस्याद्देवानांतुत्रिरुच्यते इति॥परि
स्तरणकालेनात्रप्रदक्षिणशंकाकार्या॥अन्वाक्येसम्मूलंबर्हिरप्रदक्षिणमितितद्
सौविशेषोक्तेः॥नवात्रप्रदक्षिणशंकापरिसमूहनपर्युक्षणयोः॥पाराशरमाधवे
मनुःपतिव्रताधर्मपत्नीपितृप्रजननत्परा॥मध्यमंतुततःपिंडंमंत्रेणसुतार्थिनी॥ यात्
आयुष्मंतंसुतंविद्याद्यशोमेधासमन्वितं॥धनवंतंप्रजावंतंधार्मिकंसाधकंतथे
ति॥॥पिंडंपत्नीप्राशयेदित्यत्रपत्नीयदागुर्विण्यादिनापिंडप्राशनानर्हातदातंपिंडं वृ
ङ्वृषभंछागंवाप्राशयेत्॥पत्नीयद्यन्यदेशास्थागुर्विणीसूतिकापिवा॥तदातंजीर्ण राम
वृषभश्छागोवाभोक्तुमर्हतीतिबृहद्याज्ञवल्क्योक्तेः॥परशुरामप्रतापे॥बृहस्पतिरे १९९
वमेवाह॥तत्रैवापस्तंबस्मृतिप्रतिपत्त्यंतरमाह॥यदिपत्नीविदेशास्याज्ज्वरार्तायदिवा

ना मृता॥दुरात्मानुकूलाचतस्यपिंडस्यकागतिः॥आकाशंगमयेत्पिंडंजलस्थोदक्षिणामुखः॥
पितॄणांस्थानमाकाशंदक्षिणादिक्तथैवचेति॥॥पराशरेमाधवेतुपत्न्याअसंनिधाने
पिंडानांप्रतिपत्त्यंतरमाहबृहस्पतिः॥अन्यदेशगतापत्नीगर्भिणीरोगिणीतथा॥त
दातंजीर्णवृषभश्छगोवाभोक्तुमर्हतीति॥आपस्तंबोपि॥प्रतिपत्त्यंतरमाह॥यदिपत्नी
विदेशास्याउच्छिष्टायदिवामृता॥दुरात्मानानुकूलाचतस्य पिंडस्यकागतिः॥आ
काशंगमयेत्पिंडंजलस्थोदक्षिणामुखः॥पितॄणांस्थानमाकाशंदक्षिणादिक्तथैवचेति।
यत्तुदेवलोक्तं॥ततःपिंडनिवृत्तिःस्यात्पिंडास्कंदनंतरं॥ब्राह्मणोग्निरजोगोर्वी
भक्षयेदप्सुवाक्षिपेदिति॥तत्सुत्रार्थी भावविषयं॥॥अत्रपित्रादिनामास्मानेन
तन्नामस्थानेएतत्तइत्यस्यानंतरंततपितामहमपितामहेतिशब्दक्रमेणपिंडाः

प्रयोज्याः सूत्रेउक्तत्वात्॥एकस्यद्वयोर्वानामाज्ञानेपियथास्थानंतनादिद्वयोगो
न्यत्रनामप्रयोगः॥अत्रपित्रादीनांमध्येएकस्यद्वयोर्वाजीवनेतपिंडकालेपूर्वोक्त
पिंडदानमंत्रेणस्वाहाकारांतेनजीवद्वृद्धेनाग्नौस व्यपाणिनापिंडहोमः॥तत्रत्र
याणामपिजीवनेपितृमात्रजीवनेवात्रयःपिंडाहोतव्याः॥अथवापिंडदानरहितो
होमांत एवपिंडपितृयज्ञः॥अनारंभोवापितरिजीवतित्रिभ्योपिहोमएवनभ्रमो
पिंडदानं॥जीवपितामह्यैपित्रेपिंडंदत्वाद्वयोर्होमः॥जीवप्रपितामहस्यआद्ययोःपिं
डःप्रपितामह्यैहोमः॥होमेचयज्ञोपवीतितासवेत्रइत्याद्याकरतोज्ञेयमित्यूक्तप्र
योगरत्नेपिंडपितृयज्ञेअतिप्रणीतनाशेनतस्मिन्नहोमपक्षेसर्वप्रायश्चित्तमेवनपु
नरतिप्र णयनंकार्योभावात्॥तस्मिन्होमपक्षेपिंडप्रक्षेपपक्षेचसर्वप्रायश्चि

राम १२०

१ आपस्तंबानांतुअतिप्रणीतनाशेसर्वप्रायश्चित्तंहुत्वापुनरतिप्रणयनं १

त्तंहुत्वापुन रतिप्रणयनंकुर्यात्॥तस्यपुनरग्नौप्रक्षेपविधानात्॥पिंडपितृयज्ञकरणे
प्रायश्चित्तं निर्णयसिंधौपराशरमाधवीयेकात्यायनः। पितृयज्ञात्ययेचैववैश्वदे
वात्ययेपिच॥भोजनेपतितान्नस्यचरुर्वैश्वानरोभवेदिति॥चरुःस्थालीपाकः॥अ
ग्नयेवैश्वानरायजुष्टंनिर्वपामीत्येवंनिर्वपेः॥पितृयज्ञलोपेसप्तहोतारमितिबोधा
यनीयप्रायश्चित्तसूत्रे॥ ॥इतिपिंडपितृयज्ञप्रयोगः॥अथपार्वणश्राद्धप्रयोगः॥
सचास्मत्कृतश्राद्धसागरेसप्रमाणःसविस्तरउक्तः संक्षेपस्त्वत्रोच्यते॥अथसं
क्षिप्तपार्वणश्राद्धप्रयोगः॥अथाश्वलायनगृह्यमाश्रित्यहेमाद्र्यादिग्रंथानुसारेणसं
क्षिप्तपार्वणश्राद्धप्रयोगः॥श्राद्धकर्तापूर्वेद्युःश्राद्धदिनएववासव्येनैवप्राणाया
मत्रयंविधायप्राचीनावीतीदेशकालौसंकीर्त्यात्रवाप्राचीनावीतीसव्यंजानुच्याम्य



पाणंसपिंडंसंदेवंदर्शश्राद्धमन्नेनहविषापित्र्यंतृप्तिकामोहंश्वोद्यवाकरिष्येइति
संकल्ययज्ञोपवीत्युदङ्मुखोदक्षिणंजान्वाच्यप्राङ्मुखस्यविप्रस्यदक्षिणजा
नुस्पृष्ट्वास्मत्पितामहप्रपितामहानामित्यादिपूर्ववदुक्त्वासपत्नीकानां
दर्शश्राद्धेविश्वेदेवायंत्वयाकरणीयइतिहावेकंवानिमंत्र्यप्राचीनावी
तीदक्षिणाभिमुखःसव्यंजान्वाच्यउदङ्मुखस्यविप्रयसव्यंजानुस्पृष्ट्वा
स्मत्पितुरमुकशर्मणोमुकगोत्रस्यसपत्नीकस्यवसुरूपस्यदर्शश्राद्धे
त्वयाक्षणःकरणीयइतिदेवेक्षणःक्रियतांश्राद्धेक्षणःक्रियताम
मुकस्यस्थानेक्षणःक्रियतामित्येवंवाइत्यादि य

क्षणः

१२१ थालिंगं विप्रान्निमंत्र्य ॐ तथेति क्षणस्य प्रत्युत्तरमग्रिमनिमंत्रण
द्वयोरप्येवं पुनः कर्ता प्राप्नोतु भवानित्युक्ता प्राप्नवानीति प्रत्युक्तस्ततः
अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः॥ भवितव्यं भवद्भिश्च म
यापिश्राद्धकारिणा इति विप्रान्छ्रावये दथश्राद्धदिनेत्वकृतदंतधावनः
सुस्नातःपुरुषसूक्तादिकृतमंत्रजपोद्विराचम्य शिष्याकारितान्कृतपौ
वानाह्नांतान्ब्राह्मणान्प्रत्युत्थानेनसत्कृत्य पूर्वेद्युर्निमंत्रणाद्यकरणप
क्षेःत्रवासव्येनैवद्विराचम्य प्राणायामत्रयंविधायप्राचीनावीतीतिथ्या
दिसंकीर्त्यपूर्ववदस्मत्पितृणामित्यादिसंकल्प्याचारात्समस्तसंपदित्या १२२

दिपठन्प्रदक्षिणीकृत्यसंप्रार्थ्यक्रोधनैरित्याद्युक्त्वादर्शश्राद्धंकर्तुममाधिकारसंपदस्त्वि
तिभवंतोब्रुवंत्वित्यस्मश्राद्धाधिकारसंपदित्यनुज्ञातःस्वगृहमागतान्विप्रानपराह्णे
स्वयंनिषन्नुभयत्रापिसव्येनैवदैवपूर्वंभवतांस्वागतमितिपृष्ट्वक्वथगेकेकंब्राह्मण
ब्रूयात्सुस्वागतमितिप्रत्युक्तःसव्यापसव्याभ्यांदेवेक्षणःक्रियतांपित्रादिनामोक्त्वाश्राद्धे
क्षणःक्रियतामित्येतद्द्वितीयंनिमंत्रणंकृत्वातत्तोगृहांगणेसव्येनपूर्वं देवार्थं
२ चतुस्त्रंप्रादेशमात्रमुदक्प्लवंनिहितगंधपुष्पयवमागयकुशद्वयंमंडलमध्येषडंगु
लमंतरंत्यक्त्वाप्राचीनावीतीतद्दक्षिणतःपित्र्यर्थंवर्तुलंत्रिनस्तिमात्रंदक्षिणप्लवंनि
हितगंधपुष्पतित्तदक्षिणाग्रकुशत्रयंगोमयाभ्यांविधायोपवीतीमंडलसमी
पेसदर्भपीठयोःप्राङ्मुखौद्विजावुप वेश्यस्वयमुदङ्मुखएवमत्प्राङ्मुखोवादक्षिणंजा

च्च्यागच्छंतुमहाभागाविश्वेदेवामहाबलाः।येऽत्रविहितास्राद्धेसावधानाभवंतु
तइतिसंप्रार्थ्यतत्पादयोर्यवकुशागंधादिद्रव्युक्तंजलमंजे नापुरुरवार्द्रवसंत लि
काविश्वेदेवाइदंवःपाद्यंस्वाहानमइतिप्रत्येकंक्षणक्रमेणदेवतीर्थेनप्रक्षिप्य दे
शान्तोदेवीरभिष्टयआपोभवंतुपीतयेशंयोरभिस्रवंतुनइत्यृचातत्पादावु
पर्येवप्रक्षालयेन्नाधःप्रक्षालनंसग्रंथिनापवित्रेणचसाचीनावीतीदक्षिणमंड
लसमीपेउदङ्मुखवान्पित्र्यद्विजान्द्विजौद्विजंवोप वेश्यस्वयंदक्षिणामुखःसव्यजा
न्वाच्यतत्पादयोस्तिलकुशादियुक्तंजलमस्मत्पितःपितामहप्रपितामहाअमुक
शर्मणोमुकगोत्राअमुकरूपाइदंवः पाद्यंस्वधानमइत्यस्मत्पितरमुकशर्मन्न राम
मुकगोत्रवसुरूपसपत्नीकेदंतेपाद्यंस्वधानमइतिवाप्रत्येकंयथाक्रमंपित्र १२२

तीर्थेननिषिच्यशान्नइत्यृचेत्यादिपूर्ववदेवपितामहादिमातामहादीनामथकर्त्तृ
मंडलार्चनपाद प्रक्षालनपदार्थोपयुक्ततिलकुशयवगंधादिद्रव्यशेषं त
त्तन्मंडलोपरिसव्यापसव्यविभागेनैवनिक्षिप्यधृतपवित्रेत्यक्तोपवीतीस्वय
मादौप्रक्षाल्यान्येपवित्रेधृत्वादेविकमंडलादुत्तरतोब्राह्मणचरणक्षालनोदका
चमनोदकयोर्भूमौसंसर्गमकुर्वन्द्विराचम्यविप्रांश्चतत्रैवतथैवद्विराचमम्
ब्राह्मणैःसहश्राद्धभूमिमागत्यापसव्येनश्राद्धसिद्धिरस्त्वितिब्राह्मणान्प्रत्युक्तोते
श्वास्तुश्राद्धसिद्धिरित्युक्तेतदुपवेशनार्थंप्रागुक्तस्वेतकंबलादीनिश्रीपर्ण्यादि
दारुमयानिप्रत्येकमुपरिस्थापितानिप्रागग्रदर्भद्वययुतानिदेवेपित्र्येतुप्रत्येक
मुपरिस्थापितदक्षिणाग्रकदर्भाग्र्याण्यास नान्युपकल्पयेत्॥ ॥इतिश्रीमन्त्रा

रामणभट्टकृतेगृह्याग्निसागरेसंक्षिप्तपार्वणश्राद्धप्रयोगेप्रथमःखंडः॥अथतेषु
प्राङ्मुखानुदङ्मुखंस्थान्दैविकब्राह्मणानुदङ्मुखान्प्राङ्मुखंस्थान्पित्र्यब्राह्मणानुदङ्मु
खत्वाल्लाभेदक्षिणवर्जितान्यदिङ्मुखान्वायथाधिकारंसव्यापसव्याभ्यांवामह
स्तेननत्तदासनंध्रत्वादक्षिणेननत्तद्विप्रदक्षिणहैंगृहीत्वाॐभूर्भुवःस्वःसमाध्व स्तं
मितिप्रत्येकमुत्कायावन्मुखपाणिपादमार्द्रंतांनजहातितावद्वित्तंबिलमुपवेश्य राम
येन्नैरप्योंसुसमास्महइतिप्रत्यक्तक्तिलतैलेनघृतेनप्रशस्तस्नेहादिनावाप्रतिदि १२३
नंदीपान्सव्यापसव्यविभागेनैवसंस्थापयेदेकंवासव्येनब्राह्मणाश्चेतःप्रभृत्या
श्राद्धसमाप्तेःपवित्रपाणयोमौनिनःप्रमादसंभवमुच्छिष्टसंस्पर्शंवर्जयंतोवर्तेर
न्प्रमादान्मोनत्वौतुप्रायश्चित्तंपूर्वोक्तंज्ञेयंपूर्वोक्तलक्षणत्वक्षितातिथिरागतश्चे

त्यस्मरणमात्रंपठेदपवित्रःपवित्रोवासर्वावस्थांगतोपिवा।यःस्मरेत्पुंडरीकाक्षं१
तमपिसव्येनब्राह्मणपंक्तावुपवेश्यायेदथशुंचित्वाशायार्घंपुंडरीकाक्षेसवाह्याभ्यं
तरशुचिरितितत्तोपसव्येनतद्विष्णोःपरमंपदंसदापश्यंतिसूरयः॥दिवीचक्षुराततं
।तद्विप्रासोविपन्यवोजागृवांसःसमिंधतो।विष्णोर्यत्परमंपदं॥तत्सवितुर्वरेण्यंभ
र्गोदेवस्यधीमहि।धियोयोनःप्रचोदया दित्येतत्रयंजेपित्वासव्येनश्रीविष्णुस्मर
णपूर्वंकंप्राणायामत्रयंकृत्वादक्षिणाग्रेषुदर्भेषु पित्र्यद्विजाभिमुखमुपवि
म ष्टःसव्यंजान्वाच्यमर्णपूर्वकमेवदेशकालौसंकीर्त्यापसव्येनास्मत्पितृसपत्नीकाना
मेतदंतेप्रक्षांतंश्राद्धंयुष्मदनुज्ञयाकरिष्यइत्युक्त्वाकुरुष्वेत्यनुज्ञातोत्रारंभेमध्ये
वसानेचैतं मंत्रंदेवताभ्यः पितृभ्यश्चमहायोगिभ्यएवच॥नमःस्वाहायैस्वधा
यैनित्यमेवनमोनमःपतिश्रिवारंपवेत्॥प्रागुक्तवदत्रनीवीबंधःकर्तव्यःततोपह

ताअसुरारक्षांसिपिशाचाःयेक्षयंतिपृथिवीमनु॥अन्यत्रेतेगछंतुयत्रैतेयांगतंम
नइतिसर्वतस्तिलानपसव्येनैवावकीर्योदीरतामवरुत्परासुन्मध्माःपितरःसो
म्यासः॥असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषुरनिसर्वतःप्रोक्षयेत्तिलारक्षंत्व
सुरान्दर्भारक्षंतुराक्षसान्पंक्तिवैश्रोत्रियोरक्षेदतिथिःसर्वरक्षकृतिद्वारदेशेकु
शत्तिलप्रक्षेपस्ततः॥तरत्समंदीधावतिधारासुतस्यांधसः॥तरत्समंदीधावति॥गुप्ता
व.स॰तरत्स॰धूम्रयोःपुरुषंत्योरासहस्राणिदशरुद्रे॥तरत्स॰आयोस्त्रिंशतंतनासह
स्राणिचदशरुद्रे॥तरत्समंदीधावतीतिचतसृभिःपावमानीभिरभिमंत्रितेनजपप्रोक्षे
णजलेनपाकादिप्रोक्षेत्केचित्तद्विलोर्गायत्र्याचेतिततोदृष्टदृष्टिनिपातादिदूषितः
पाकःपूतोभवेदितिसंकीर्त्यप्रोक्षणंपाकंकृत्वापुण्याहंवाचयित्वासंपन्ना प्रोक्षितंव

स्वद्रव्य
राम
१२४

स्तुकिंचित्स्पृशेत्॥२॥इतिश्रीनारायणभट्टकृतेगङ्गाग्निसागरेसंक्षिप्तश्राद्धप्रयोगेदर्शी
पःखंडः॥अथश्राद्धकालेगयांध्यात्वाध्यात्वादेवंजनार्दनं॥वस्वादींश्चपितॄंध्यात्वाततः
श्राद्धंप्रवर्तयेदितिवाजपित्वासंपादिताःपदार्थाः॥श्राद्धयोग्याभवंतिवितिभवंतोब्रुवंत्वि
त्यृत्काश्राद्धयोग्याभवंत्विति॥प्रत्यृक्कोदैविकंद्विजांतिकमुपवीतीदक्प्रवणउपविश्यद
क्षिणंजान्वाच्यांतर्जानुकरोद्विजहस्तयोरर्पयत्वातद्दक्षिणहस्तमुत्तानंनिजवामहस्ते
नधृत्वादक्षिणेनजलयवसमन्वितदर्भाग्रद्वयमृज्वेवादायपुरूरवाईवसंत्रिकानोवि
श्वेषांदेवानांभूर्भुवस्वइदमासनंस्वाहानमइत्यृक्काद्विजहस्तेतज्जलमासिच्यकंव
व्याघासनदक्षिणभागस्योपरिदेवतीर्थेनतत्सयवदर्भाग्रद्वयंप्रक्षिपेन्नहस्तेविप्राध
र्मोसि विश्विराजाप्रतिष्ठितइतियजुरुच्चार्यस्वासनमितिप्रतिब्रूयात्पुनरर्पयत्वासनंस्व

शान्नत्रास्यतामित्यक्त्वाधर्मोसीतिविप्रेणासनकुशान्गृह्णन्प्रत्यक्त्र एवमन्यस्मिन्विप्रेप्येकं
पुनरपोदत्वादैवेक्षणक्रियतामित्यक्त्वानि रूँषद्विजहस्तंगृहीत्वाँवेवदेववानिमंत्रयेदौंत पू
थेतिप्रत्यक्त्रः मान्नोनुप्सवानित्युक्त्वाप्रान्नवानीतिप्रत्यक्त्र एतदंतमेवमेवंप्रतिविप्रमि
दंतनीयेनिमंत्रणंपुनर्हस्तेपोदत्वाप्रोक्षितायांभुविमागग्रास्तीर्णकुशेषूत्तानंपात्रद्वय
मासादयेन्नदुपरिद्विकुशंकूर्चमेकैकंनिधायतत्रसर्वस्मात्याश्चान्नोदेवीरित्यृचाप्रत्ये
वा कंमंत्रावृत्यापआसिच्ययवोसिधान्यराजोवाँरुणोमधुसंयुतः॥निर्णोदःसर्वपापानां
पवित्रमृषिभिस्मृतमितिप्रत्येकंमंत्रावृत्यायवानोप्यगंधाक्षिभिरभ्यर्च्यदेवपात्रेसंप
न्नेइत्यभिमृश्योत्कासुसंपन्नेइत्यनुज्ञातःसव्यंकरंविप्रजानुनिन्यस्योदग्मुखःपुरूरवा राम
ईवसंज्ञिकान्विश्वाँदेवान्भवत्त्वावा हँइत्ययंप्रश्नःपङ्क्तिषुमूर्द्धन्यमेकंसर्वान्वाप्रतिका १२५
नू
यिष्ये

र्यएवंपित्रेप्युक्त्वावाहयेत्यनुज्ञातोयवहस्तोविश्वेदेवासआगतश्रृणुतामइमंहवं॥एदंबर्हि
र्निषीदतेति॥प्रतिविप्रंदक्षिणपादादिसुग्मक्रमेणपादजान्वंसमूर्द्धानंदेवार्चायांयवा
न्विकीर्यविश्वेदेवाःश्रृणुतेमंहवंमेयेअंतरिक्षेयउपद्यविष्ठायेअग्निजिह्वाउतवायज
त्राआसद्यास्मिन्बर्हिषिमादयध्वमित्यक्पतिष्ठतहेमा द्युक्रेवैश्वदेविकोत्पत्तिविशे
षनामभिस्तेनात्राप्यागछंतुमहाभागाइतिचोपस्थायतत्समीपेभूमौस्थिण्डिलान्यवा
न्विकीर्यदेवार्घ्यपात्रेसंपत्तिरस्त्वितिहस्तोजलंदेवविप्रान्प्रछेदोंअस्तुदेवार्घ्यपात्र
संपत्तिरितिप्रत्यक्त्रआस्तीर्णदर्भसहितमेकैकंपात्रमुत्थत्यस्वार्घ्याइत्यक्त्वैकैकंवि हा
प्रपुरतःस्थापयेत्संतवर्घ्याइत्यक्त्वोपोदत्वापात्रस्थंकूर्चंप्रागग्रंविप्रकरेदत्वाकराभ्यांद
क्षिणेनैववाकरेणक्षीरदधिघृततिलतंडुलसर्षपकुशाग्रपुष्पाण्येतद्व्याप्तकयुतं

प्रागेवसंभृतमर्घ्यपात्रमुद्धृत्यप्रागुक्तप्रमाणोक्तेःयादिव्याआपःपृथिवीसंबभूर्याअंतरि
क्ष्याउतपार्थिवीर्याः॥हिरण्यवर्णोयज्ञियास्तानआपःशंस्योनाभवंत्वितिमंत्रमुक्त्वापु
रूरवाइवसंज्ञिकाविश्वेदेवाअर्घ्यंस्वाहा॰नमइतितदुदकंदेवतीर्थेनदत्वाअस्त्वर्घ्यमि
त्युक्त्वैवंद्वितीयेपितृतःप्रतिविसंप्रत्युपचारमपोदत्वागंधद्वारांदुराधर्षांनित्यपुष्टां
करीषिणी॥ईश्वरीसर्वभूतानांतामिहोपह्वयेश्रियमितिमंत्रमुक्त्वापुरूरवदेवा
अयंगंधःस्वाहानमोन ममेत्यर्घ्यप्रमाणोक्तरेकवचनांतेनगंधशब्देनोक्तसिक्तो
दकेविप्रकीर्णेगंधद्रव्येनैवप्रदायसुगंधइत्युक्त्वैवमग्रेपितृतःस्तेर्गंधैर्विगतपैत्रकरःक
र्त्तोभालग॰लवक्षकुक्षिकक्षाघंगेषुलिंपेत्कंधादुपवीतमुत्तरीयंवाऽनवतार
यन्ब्राह्मणाश्चेत्परस्परमनुलेनंसपवित्रकरनियेधनियमःप्रशस्तंकुसुमाद्युपा

दायौषधीःप्रतिमोदध्वंपुष्पवतीःप्रसूवरीः॥अश्वाइवसजित्वरीर्वृष्णःपवित्रमुःइत्या
यनेतेपरायणेदूर्वारोहंतुपुष्पिणीः॥क्रदाश्वंपुंडरीकाणिसमुद्रस्यगृहाश्मेइतिवामंत्र
मुक्त्वाप्रागुक्तवत्संनुध्यापुरूरवाइदंवःपुष्पमितिहूंदत्वासुपुष्पमित्यृक्त्वःपुनरपोगृ
ह्यप्रभृतिद्रव्यदाहप्रसृत्यधूर्यंधूरसिधूर्वधूर्वंतंयोस्मांधूर्वतिंतंधूर्वयं वयंधूर्वा
मइतिमंत्रेणपुरूरवाअयंवोधूपइत्यृक्त्वापादशेषंधूपात्रमाघ्रापनादिनातेनवि
प्रघ्राणंप्रापयेन्नहस्तवातेनसुधूपइत्यृक्त्वःपुनरपउद्दीप्यस्वजातवेदोघृतेनेतिं
ममपशूंश्चमह्यमावहजीवनंचदिशोदशेतिमंत्रमुक्त्वापुरूरवाइदंवोज्योतिरित्य
क्त्वामुखसमीपेप्रदर्शयेत्सुरीपइत्यृक्त्वःपुनरपोयुवंवस्त्राणिपीवसावसाथेयुवोरछि
द्रामंतवोहसगाःअवातिरंतमनृतानिविश्वऋतेनमित्रावरुणासचेथेइत्यृक्त्वापुरू

रु वाऽइदंवआछादनंसाछादनमित्यक्तोयज्ञोपवीतंदत्वार्चनंसंपूर्णमस्त्वितिदैविकानु
ल्कास्त्वर्चनंसंपूर्णमितिप्रत्यक्तः संकल्पसिद्धिरस्त्वितिप्रत्यक्तोमंत्रहीनंक्रियाहीनंसं
पूर्णतांयातिसघोवंदेतमच्युतंदेवताभ्यः पितृभ्य श्चेतित्रिर्जपेत्॥ ॥इतिश्रीम
न्नारायणभट्टकृतेग्रस्याग्निसागरेसंक्षिप्तपार्वणश्राद्धप्रयोगेतृतीयःखंडः॥३॥ ॥
ततःपवित्रेत्यक्तान्येधृत्वाचम्ययुष्मदनुज्ञयापित्र्यंकरिष्येकुरुष्वेतिप्राचीनावी
त्यन्वाचितसव्यजानुर्द्विर्हस्तेषुप्रत्येकमपस्तदक्षिणहस्तंवामेनधृत्वास्मत्पितुरमु
कशर्मणोमुकगोत्रस्यवसुरूपस्यसपत्नीकस्येदमासनंस्वधानमइतिस्वासनमेवम
न्येपिप्रत्येकंप्रत्यक्पचारंपुनःपुनरपोन्नास्यतांधर्मोसीतिपुनरस्मत्पितुरित्यादिश्राद्ध
क्षणःक्रियतामित्यादिप्राग्नवानित्यंतंप्राग्वदितंतृतीयंनिमंत्रणमथप्रोक्षितायांभु

विद्विजपुरतोदक्षिणाग्रान्प्रतिवर्गंत्रीस्त्रीदर्भानास्तीर्यपूत्वानान्याग्नेयीसंस्थानिप्रतिवर्गं
त्रीणिपात्राण्यासाद्यैकैकस्मिन्पात्रेद्विगुणीकृतकुशत्रयमूर्ध्वदक्षिणाग्रंप्रत्येकंनिधाय
प्रत्येकंतत्तीर्थेनजलमास्तीर्यान्नान्नुनइतिसकृत्यवितेनस्वस्त्रोक्तैःसर्वाआपो
अनुमंत्र्यतिलोसिसोमदेवत्योगोसवेदेवनिर्मितः॥ प्रत्नवद्भिःप्रत्नस्वधयापितॄंमा
न्त्रोकान्श्रीणमाहिनःस्वधानमइतिप्रतिपात्रंमंत्रंवृत्वातिलानावपेन्नात्रोहःपितरप
रे गंधपुष्पादिभिरर्चयःप्रपूज्यपितृपात्रेसंपन्नमित्यादियथालिंगंसर्वान्यभिम
त्र्यसुसंपन्नमितिप्रत्युक्तोहस्तेष्वापोदक्षिणामुखःसव्यंकरंविप्रजानुनिधायास्म
त्पितृपितामहँनमुकशर्मणोमुकगोत्रान्सपत्नीकानेवंमोहादीन्भव त्स्वावाहँष्ये
इत्युक्त्वा वाहयेत्यनुज्ञातउशंतस्त्वानिधीमह्युशंतःसमि धीमहि॥उशन्नुशतआ

वहपितृन्हवि षेअन्नवेइत्यन्नहैनेवप्रतिविप्रशिरःप्रभृतिवामांसादिक्रमेणशिरोजानुपा
दमुग्मक्रमेणपादांतंतिलान्विकीर्यायंवुनःपितरःसोम्यासोअग्निष्वात्ताःपथिभिर्देवया
नैः॥अस्मि न्नस्तेस्वधयामँधिब्रुवंतुतेचंत्वस्मानितिपित्र्यविप्रोंसहस्तप्रितेनोपतिष्ठ न्
तनात्रोहस्तनोहस्तस्थांछिष्टांस्तिलान्विप्राग्रेभ्यःकीर्यॐपित्र्यर्घ्यपात्राणांसंपत्ति
रस्त्वितिहस्तांजलिःपितृविप्रान्प्रछेदोंअस्तु पित्र्यर्घ्यपात्राणांसंपत्तिरित्यृक्तःप्रागुक्ते
रूपवीतीहस्तेघापोदत्वातेषुर्घ्यपात्रेषुधोनिहितदर्भैःसहपाणिभ्यामेकैकमुद्धृत्यॐ
स्वधार्घ्योइतिमंत्रेणपित्रादिविप्राणांयथाक्रमंदक्षिणाग्रतयास्थापनंनिवेदयेत्संत्व
र्घ्योइत्यृक्तोपोदत्वापात्रस्थंकूर्चंदक्षिणाग्रंप्रत्येकंविप्रहस्तेदत्वोभाभ्यांकराभ्यामष्ट राम
द्रव्ययुतमर्घ्यपात्रमुद्धृत्यार्घ्यपात्रोदकंसशंखपात्रंचेत्तस्मिन्नाहीत्वावामान्वारब्धे १२९
षँ

नखङ्गदक्षिणेनास्मत्सपत्नीकपितरिदंतेअर्घ्यंस्वधानमएवंप्रतिविप्रंपितामहेदंतेअ
र्घ्यमित्यादियथालिंगमुद्धृपतितैःप्रत्येकमर्घ्यंदत्वाप्रतिविप्रंयादिव्याःभवंत्विति मंत्रा
दृत्यासूत्रोक्तैर्विप्रहस्तात्स्रवंतीरापोनुमंत्र्यविप्रपाणिघन्याआपोदद्यात्तत्किंचिद्दूरेर
क्षिरभोन्दक्षिणाग्रान्संस्तीर्यतत्रतत्पात्राणिनीत्वासादनस्थानेप्रथमपात्रेवशिष्टपात्र
रूपोदकमेकीकृत्यपुत्रकामश्चेन्मुखमनक्त्यथवार्घ्यस्थानेएवैकीकृत्यमुखमनक्त्यु
त्तरआस्तीर्णेपुकुशेपुकूर्चंत्रयंतर्हितंन्यञ्चिलमुत्तानंवातृतीयेनपिहितंपितृभू।
स्थानमसीत्यासाद्यगंधादिभिरभ्यर्च्यतत्पात्रंघ्राघ्रासमासेनैवात्तयेन्नसंस्पृशेन्मा न्
तामहादीनामप्यादितआरभ्यैवमेवेति॥ ॥इतिश्रीनारायणभट्टकृतेगृह्याग्निसा
गरेसंक्षिप्तपार्वण्श्राद्धप्रयोगेचतुर्थःखंडः॥४॥ ॥अथप्राचीनावीत्युपोदत्वात्म

सित्रपितामहप्रपितामहाँमुकशर्मणेमुकगोत्राःमुकरूपाःसपत्नीकाअयंवोगंधःस्व
धानमोनमआस्मत्पितरमुकशर्मन्नमुकगोत्रवसुरूपायतेगंधस्यादिनावैकवचनां
तेनैवगंधशब्देनप्राग्वदनुलिंपेसुनःपुनःप्रत्यपचारमपोस्मत्पितरित्यादिसंबु
ध्यैवयथालिंगमुक्तापुष्पाद्याछादनांतेतत्तन्मंत्रप्रतिवचनसहितंसर्वंस्वधान
मोनमेतिशब्दसहितंपित्र्यधर्मेणैवप्राग्वत्कुर्यात्तत्रापिपुष्पधूपदीपाछादने
ष्वगोत्रादिमुक्तमेवनामोक्तापवीतंदत्वाहस्तांजलिंपित्रर्णामर्चनेसं
पूर्णमस्त्वितिपित्र्यद्विजान्प्रतिवदेदस्त्वर्चनंसंपूर्णमित्यक्तःसंकल्पसिद्धिरस्त्वि
त्यादिकंप्राग्वदथोपवीत्याचम्यभूमिंसंशोध्यभस्मादिरचितमंडलेरन्योन्यव्यधा
नंकुर्यात्तत्रगोमयेनभस्मनावारिणावादैवेप्रतिविंबचतुरस्त्रंप्राचीनावीतीपि

त्रेवर्तुलमेवंमंडलानिकृत्वातदुपरियथाधर्मंनिहितसयवकुशेषुचोभयार्घ्यसौवर्ण
शैप्यादीनिपात्रौदीन्विाभाजनानिमृन्मयवर्जितानिनिधायतेष्वापोनिषिच्यहस्तेननि
र्मन्थ्यप्रक्षाल्यपुनर्जलेनप्रक्षालयेदथस्मृत्यर्थसारोक्तः सव्यापसव्यविधिनाभ्रमपित्रर्घं
पिंडगंधपुष्पधूपदीपवस्त्रोपवीतांतेपिंडसंमुखं ॥सर्वेरक्षोनिबर्हयारक्षाणोअग्नेतवरक्ष णे
भीरारक्षणःसुमख प्रीणानःप्रतिष्फुरविरुजवीडुहोजहिरक्षोमहिचिद्वावृधान
मितिमंत्राभ्यांसर्वपात्राणिपरितोभस्मक्षिप्त्वाचम्यतथैवपित्रर्घंकरशुद्धिंदत्वाचम्य
करशुद्धिजलंपादप्रक्षालनमंडलेक्षिपेदथाग्नौकरणहोमस्तत्राहिताग्निःसर्वाधानी
दक्षिणाग्नौजुहुयात्पित्र्यविप्रपाणौवार्ध्याधानीत्वौपासनएवद्विविधोपिपाणौवाजु
ह्वादग्नाभावपाणौवेतिस्मृत्यर्थसारोनिरग्निस्कःपाणावेवाथैकाग्नेःपिंडपित्रयज्ञ

वद्यतिषंगेणवाप्रयोगस्तद्वाघृताक्तमन्त्रंघृतंवादायसूत्रस्थमर्थसारोक्तेरुपवीत्ये
वाग्नौकरिष्येकुरु घेत्यक्तोग्निंप्रदक्षिणंपरिसमूह्यपर्युक्ष्याथप्राचीनावीतीपि
त्र्यधर्मयुक्त स्तूस्रुवौमिध्मंपित्तीर्थेनाग्नावाधायमेक्षणेस्रुवेणाज्यमुपस्तीर्यचरो
रुत्तरदेशास्यमध्यात्प्रादेशांगुष्ठपर्वमात्रंमेक्षणेनैवद्विरवदायपंचावत्तीचेत्यश्रा
र्धादग्नेवंत्रिरवदायपात्रस्थमवत्तंचयथाक्रमंस्रुवेणाभिघार्यसोमायपितृमतेस्व
त्वा धानमइतिमंत्रेणदुःसोमायपितृमतइदंनममेतित्यक्त्वापुनःप्राग्वदक्षिणभाग
स्थावदायाग्नयेकव्यवाहनायस्वधानमइतिदुत्वाग्नयेकव्यवाहनायेदंनममेतित्य
क्त्वाप्राचीनावी त्येवाग्नौत्रुवौमेक्षणमनुप्रहरेत्पाणिहोमेतुहे माद्रिमतेपाणि राम
होमंकरिष्येइत्यक्त्वाकुरु घेत्यक्तोविप्रपाणिंपरिसमूह्यपर्युक्ष्यप्राचीनावीतीवा १३०

मेनदर्भेणदक्षिणउपस्तीर्यदक्षिणेनद्विरवदायाभिघार्यपर्युक्षितेसदर्भेविप्रपाणौप्रा
ग्वदुत्वापर्युह्यपर्युक्ष्यैवंसर्वत्रजुह्वादिप्राग्वतदन्नंस्वस्वभाजनेसंस्थापयेयुः॥मे
तश्राद्धेषुपाणिदुतमग्नौप्रक्षिपेयुरितिस्मृत्यर्थसारोभोजनस्थानादन्यत्राचम्यय
थास्थानमुपविशेयुरग्निहोमकेषुश्राद्धेघृग्नोजुह्यात्पाणिहोमकेषुपाणौततउ
पवीतीदेवपूर्वमामासुपक्षमेरयआसूर्यंरोहयोदिवि॥घर्मन्नसमंतपतासुहृक्ति
भिर्जुष्टंगिर्वणसेहृदितिपात्राण्युपस्तीर्यौभमत्रापिसव्येनैवसतिलकुशहस्तःप
त्नीवानियुक्तःपुत्रादिःमन्नास्तद्धविष्यान्नपूर्वंदेवपूर्वकमेवपरिवेषणंकुर्यान्नापवि
त्रेणहस्तेननायसेननैकहस्तेनतृणपर्णाद्यंतर्हीनंनदोषःसर्वेषांपात्रेष्वन्नादिकंवि
षममकुर्वन्समभेवद्यान्नदैवसर्वेमन्नंपिंडार्थमुत्सृत्यान्नेषुपरिवि ष्टेषुपाणि

होमपक्षेग्निहोमपक्षेवाकृतशेषंकिंचित्पिंडार्थेसंस्थाप्यशेषंपित्र्यभाजनेषुदद्यान्नदै
वभाजनेषु॥ ॥इतिश्रीनारायणभट्टकृतेगृह्याग्निसागरेसंक्षिप्तपार्वणश्राद्ध
मोगेपंचमःखंडः॥५॥ ॥ततउपवीतीदेवपात्रेषुकुशायवाक्षित्वादक्षिणंजान्वा
च्यदैविकमर्थंविप्रपात्रंगायत्र्याभ्युक्ष्योत्तानाभ्यांपाणिभ्यांपात्रमालभमानःपृथि
वीतेपात्रंद्यौरपिधानंब्राह्मणस्त्वामुखेमृतंजुहोमिब्राह्मणानांत्वाविद्यावतांप्रा
णापानयोर्जुहोम्यक्षितमसिमेधांक्षेत्रायअमुत्रामुष्मिंल्लोकइत्यभिमंत्र्यातोदेवा
अवंतुनोयतोविष्णुर्विचक्रमे॥ पृथिव्याःसधस्थादग्निमन्नादंनाकायत्वाविष्णोहव्यंरक्ष
स्वेत्यनेनयजुषान्यूंखेनदक्षिणकरेणन्यूंखमेवद्विजांगुष्ठंगृहीत्वानखमन्नेनिवे
श्यप्रदक्षिणंगुष्ठंभ्रामयेत्ततोयवकुशान्वितमुदकंगृहीत्वावामकरेणपात्रंस्पृ

शन्पुरूरवाईवसंज्ञिकाविश्वेदेवादेवताइदमन्नंहव्यमयंब्राह्मणआहवनीयार्थेऽयंभ्र
मिर्गोप्तायंभोक्तागदाधरइदमन्नंब्रह्मेदंसुवर्णपात्रंअक्षय्यवटश्छायेयंपुरूरूभ्योदेवे
भ्यइदमन्नंसोदकुंभमृतरूपंपरिविष्टंपरिवेक्ष्यमाणं चातत्तेःस्वाहाहव्यंनमोन
मऽतत्सदितितदुदकंदेवतीर्थेनदैविकपात्रस्यवामभ्रमावेवनिक्षिपेदेवम
ग्रेपितृतोदैविकविमा[illegible]न्युगपत्सकृत्पवित्रेनोपतिष्ठतयेदेवासोदिव्येकादशस्थ
पृथिव्यामध्येकादशस्थ॥ औक्षितोमहिनैकादशस्थतेदेवासोयत्तमिमंजुषध्व
मितितनःपित्र्यधर्मयुक्तःपित्र्यपात्रेषुसकुशातिलाक्षित्वाप्रथमपित्र्यपात्रंगायत्र्या
भ्युक्ष्यात्तभ्मपृथिवीतेऽनोकइत्यभिमंत्र्येदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥समूल्ह
मस्यपांसुरेऽस्यचंस्कावित्लोकंरक्षस्वेत्यनेनयजुषाप्रागुक्तवदंगुष्ठमन्नेनिवे

ग्याप्रदक्षिणमन्त्रोपरिभ्रामयेद्दिगुणभुग्नकुशत्रयसहितंसतिलंजलंदक्षिणेनगृह्णीत्वा
सव्येनपात्रमादायास्मत्पितामुकशर्मामुकगोत्रःसपत्नीकोवसुरूपोदेवताऽदमन्न
कव्यमयंब्राह्मण०।इत्येदंराजतंपात्रमक्षय्यवटछायेयमस्मत्पित्रेमुकशर्मणे
मुकगोत्रायसपत्नीकायवसुरूपायेदमन्नममृतरूपंपरिवि०स्वधाकव्यंनमोनम
मऽइतत्सदितितदुदकंपितृतीर्थेनपित्र्यपात्रस्यदक्षिणे भ्रमावेवनिक्षिपेदेवमग्रेपि
अथवास्मत्पितृ०महाशर्मणोगोत्रासपत्नीकारूपादेवताऽदमन्नंकव्यं० छा येयम
स्मत्पि०महेभ्यःशर्मेभ्योगोत्रेभ्यःसपत्नीकेभ्योवसुरुऽआदित्यरूपेभ्योऽदमन्नम॰
वातृप्तिमित्यादिशाग्वतन्नःस्वधीन्पित्र्यविप्रान्सुगपत्सहत्वृतिनोपतिष्ठतयेच राम
हपितरोयेचनेहयांश्चविद्मयांउचनप्रविद्म।त्वंवेत्थयतितेजातवेदःस्वधाभिर्यं १३२

थि ह्रंकुरुतंजुषस्वेतिनात्रोहोतिँरागतश्चेतंदेवधर्मेवदर्चयेत्त्वेषदेवतारूपान्नंत्यक्त्वाये
देवासऽत्यपस्यायापसव्येनदेवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच॥नमस्वाहायै
स्वधायैनित्यमेवनमोनमः॥सप्तव्याधादशारण्येमृगाःकालंजिरेगिरौ॥चक्रवाकाःस
रोद्वीपेहंसाःसरसिमानसेतेपिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः॥प्रस्थितादीर्घम
ध्वानंयूयंतेभ्योवृणीदथ॥अमूर्त्तानांचमूर्त्तानांपितॄणांदीप्ततेजसां॥नमस्यामिस
दातेषांध्यायिनांयोगचक्षुषां॥चतुर्भिश्चचतुर्भिश्चताभ्यांपंचभिरेवच॥ऋषतेच
पुनर्द्वाभ्यांसमेविप्रःप्रसीदतु॥इतिजपित्वासकुशाक्षतंजलंगृहीत्वाएकोविप्रुर्महऋ
न् तेप्रथमभूतान्यनेकशः॥त्रीन्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः॥अन्नहीनंक्रि
याहीनंमंत्रहीनंचयद्भवेत्॥तत्सर्वमखिलंजायतामितिविप्रान्संप्रार्थ्यविप्रैर्जोय

तांसर्वमछिद्रमित्यक्तः॥ॐतत्सद्ब्रह्मार्पणमस्तु॥येषामन्नमुद्दिष्टंतेषामक्षय्यतृप्ति
रस्तुपितृस्वरूपीजनार्दनवासुदेवःप्रीयतामितिसकुशाक्षतमुदकंभूमौविसृज्यनम
स्कृत्यईशानविष्णुकमलासनकार्त्तिकेय वन्हित्र्यार्करजनीशगणेश्वराणां॥क्रौंचाम
रेंद्रकलशोद्भवकश्यपानांपादान्नमामिसततंपितृमुक्तिहेतून्॥गयायैनमः।गदाधरा
यनमः।पुंडरीकाक्षायनमः।ततउपवीतीपितृपूर्वमपोशानंदत्वासप्रणवव्याहृति
कांगायत्रीत्रिःसकृद्भावदेत्॥ॐभूर्भुवस्वःतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियो
योनःप्रचोदयात्॥इतिमधुमतीःसकृद्देवंवदेत्मधुवाताऋतायतेमधुक्षरंतिसिं
धवः॥माध्वीर्नःसंत्वोषधीः॥मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः॥मधुद्यौरस्तु
नःपिता॥मधुमान्नोवनस्पतिर्मधुमांअस्तुसूर्यः॥माध्वीर्गावोभवंतुनइतिमधुमधु

मध्वितित्रिवारंजपित्वा॥ॐतत्सद्यथासुरंजुषध्वमितिविप्रान्ब्रूयाद्विप्रास्त्ववलिदानव
म जेनित्यवत्पोशानंकृत्वावौहस्तेनपात्राणिधृत्वाप्राणाहुतिपूर्वकंमौनिनऊर्ध्वनियम
युक्ताःसंतोभुंजीरन्॥॥इतिश्रीमन्नारायणभट्टकृतेरत्नाग्निसागरेसंक्षिप्तपार्व
णश्राद्धप्रयोगेषष्ठःखंडः॥६॥अथयजमानःसव्येनैवसप्रणवव्याहृतिकांगायत्री
मुक्त्वाभुंजानान्यथाशक्तिश्रावयेत्ततोभोजनांतेमाचीनावीतीतृप्तास्थेतिविप्रान्पृ
च्छेत्तृप्तास्मेतिप्रत्यूचुःमधुवाताइतित्रयंश्रावयित्वाऽन्नमीमदंतयवप्रियाअधू
षत॥अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विंद्रतेहरीइतिचसंपन्नमिति
पृष्ट्वासुसंपन्नमितिप्रत्यूचुस्ततःपूर्वमनुक्तचेत्सर्वस्मादन्नात्किंचित्पिंडार्थंतथा
सर्वमन्नंविकिरार्थंचोद्धृत्यान्नशेषःकिंक्रियतामितिशिष्टमन्नंद्विजेभ्योनिवेद्यतै

रिष्टैःसहोपभुज्यतामितिप्रत्युक्तेनेंनेंगीकृतेवोच्छिष्टभाग्भ्योन्नंदीयतामित्युक्त्वाविप्रा
स्वपात्रस्थभुक्तावशिष्टैर्दैविकंदक्षिणभागेपैतृकंवामभागेबहिःकृत्यपात्रेषुमु
क्तेषूत्तरापोशानंपितृपूर्वंविप्रकरेषुदद्यात्ततोद्विजैर्नित्यवदपोशानेकृतेआचां
तेष्वनाचांतेषुवापिंडान्निदध्याद्विप्राभ्यनुज्ञातोवादीमुखपूर्वंहस्तादीक्षात्रयेपूर्न
कांस्यताम्रपात्रयोस्ततोविप्राःकयानश्चित्रआभुवदूतीसदावृधःसखा॥कया
शचिष्ठयावृता॥कस्त्वासत्योमदानांमंहिष्ठोमत्सदंधसः।दृढाचिदारुजेवसु।
अभीषुणःसखीनामविताजरितॄणां॥शतंभवास्यूतिभिरितित्रचैपेषुः॥१॥ इ
तिश्रीमन्नारायणभट्टकृतेरत्नाग्निसागरेसंक्षिप्तपार्वणश्राद्धप्रयोगेसप्तमः
खंडः॥ ॥अथपिंडदानेतत्राग्निहोमपक्षेऽग्निसमीपेपाणिहोमपक्षेद्विजोच्छिष्टं

ज
राम
१३४

के तिंउत्तरतःप्रसारितभुजांतरमात्रेरत्निमात्रेवांगोमयेनोपलिप्तेदेशेप्राचीनावीत्येव
ज्ञ दक्षिणामुखोन्वाचितसव्यजानुःपिंडपितृयज्ञवत्सूत्रोक्तःसव्येनैववापितृतस्य
र्थंपिंडदानंकरिष्यइतिविप्राननुज्ञाप्यकुरुष्वेत्यनुज्ञातोबद्धचानांकरेणैकेनान्ये
न षांकराभ्योस्प्येनखादिरेणकाशैर्दर्भमूलेनवाऔहतासुरारक्षांसिवेदिषदइति श्र
मंत्रंपठित्वेवंपवन्हेमाद्रिमतेपारिजातोक्तेश्वाग्नेय्यायकंप्रत्यगपवर्गेत्रिखात्रय
मुत्रिख्यप्रत्येकमङ्गिरश्युक्ष्यतत्रदक्षिणाग्रंसकृदाछिन्नंबर्हिर्द्वयमास्तीर्योग्नौ
करणशेषयुतेनपाणिहोमशेषयुतेनमधुसर्पिस्तिलमिश्रितेनसर्वत्रवर्णिकेना
न्नेनोक्तप्रमाणकंपिंडमादायपूर्ववेरेखायांप्रंधंतांपितरःसपत्नीकाःप्रंधंतांपि
तामहाःसपत्नीकाःप्रंधंतांप्रपितामहाःसपत्नीकाःइतित्रिभिर्मंत्रैस्त्रिषुपिंडस्थाने

LIBRARY OF THE ROYAL ASIATIC SOCIETY BOMBAY BRANCH

षुपितृतीर्थेनतिलोदकंनिनीयैवमेवपश्चिमरेखायांश्रुंधंतांमातामहःसपत्नी
काःश्रुंधंतांमातुःपितामहाःसपत्नीकाःश्रुंधंतांमातुःप्रपितामहाःसपत्नीकाःइ
तित्रिभिर्यथाक्रमंरेखयोःपराचीनपाणिःपितृतीर्थेनपित्रादिभ्यः
पिंडान्दद्यादेतत्तेअस्मत्पितरमुकशर्मन्नमुकगोत्रवसुरूपसपत्नीकयेचत्वामत्रा
नुअस्मत्पित्रेअमुकशर्मणेमुकगोत्रायवसुरूपायसपत्नीकायायंपिंडःस्वधान
मइत्येतत्तेअन्नंस्वधानमइतिवैवमग्रेपितॄंस्मत्पितामहःपितामहायःप्रपितामहः
प्रपितामहायःमातामहःमातामहायःमातुःपितामहःपितामहायःमातुःप्रपितामहः
प्रपितामहायःस्वधानमइत्येतेसर्वगयायांरुद्रपादे दत्तमस्तिसुक्तलेपभाकृत्प्र
येहस्तलेपंपिंड दर्भमूलेषुनिमज्याथात्र पितरोमादयध्वंयथाभागमावृषा

रात्र १३५

यध्वमितिसर्वान्पिंडाननूहेनसक्रदेवानुमंत्र्यसंव्यपार्श्वे नोदगादस्त्वयथाशक्तिप्रा
णं नियम्यासिक्ताभिपर्याहृत्यामीमदंतपितरोयथाभागमावृषायीषतेतिपिंडाननू
हेनसक्रदेवानुमंत्र्योपवीतीपिंडशेषमवघ्रायहस्तधृतदर्भोत्स्फक्कान्यांधत्वाचम्यप्रा
चीनावीतीपूर्ववल्लुंधंतामित्यादिभिर्जलंनिनीयास्मत्पितरमुकशर्मन्नमुकगोत्रव
सुरूपसपत्नीकाभ्यक्ष्वेतियथालिंगंमंत्रावृत्यापिंडेष्वभ्यंजनंतैलंघृतंवादर्भेणद
त्वाअमुकेत्यादितथैवाक्ष्वेतिमंत्रावृत्यांजनंदत्वैतेपितरोवासोमानोतोन्यत्पित
रोयुष्मित्यनूहेनसक्रत्पवित्रेनपिंडेषुवासएवंदद्यात्प्रतिपिंडंवासोवाततःक
शिप्रभृतैर्बर्हणंनिवेद्यास्मत्पितृभ्यःपिंडेभ्योवेतिचतुर्थ्योविसृज्याक्षतगंधपुष्पधू
पदीपसार्वर्णिकान्नंनिवेद्यतांबूलदक्षिणासर्वभोगांश्चप्रतिपिंडंसिधूक्ते

र्द्दद्यादत्रनीवीविस्रस्याग्नेय्यभिमुखःपिंडानुपतिष्ठेतैर्मे त्रैनेमोवःपितरइषेनमोवः ते
पितरऊर्जेनमोवःपितरःश्लोकायनमोवःपितरोघोरायनमोवःपितरोजीवायनमो
वःपितरोरसायस्वधावःपितरोनमोवःपितरो नमएतायुष्माकंपितरइमाअ
स्माकंजीवावोजीवंतइहसंतःस्यामप्रमोन्वाद्धमहेनाराशंसेनसोमेन॥पितृणांचम वा
न्मभिः॥अतएतुमनःपुनःक्रत्वेदक्षायजीवसे॥ज्योक्चसूर्यंदृशेपुर्नःपितरोम न
नोदद्यातुदैव्योजनःजीवंव्रातंसचेमहीत्यथपिंडानाग्नेय्याभिमुखमुत्तानेनहस्तेन
पितृशद्वान्हेनयुग्पत्न्यवाहयेत्परेतन पितरःसोम्यासोगंभीरेभिःपथिभिःपूर्वि
णेभिः॥दत्वायास्मभ्यंद्विणेहभद्रंरयिंचनःसर्ववीरंनियछतेति॥इतिश्रीमदारडो राम
पनामकनारायणभट्टकृतेगृह्याग्निसागरेसंक्षिप्तपार्वणश्राद्धप्रयोगेअष्टमः १३६

खंडः॥॥ततोदक्षिणाग्निहोमपक्षेतमेवमंत्रमग्नेतमद्याश्वंनस्तोमैःक्रतुन्नभद्रंह
दिस्पृशंक्रध्यामतओहैत्यथगार्हपत्यंप्रत्येत्यादग्नेतमद्यांयन्मातरंपित
रंवाजिहिंसिमंअग्निर्मातस्मादेनसःप्रमुंचतुक्रोतुमामनेहसं॥इत्यथोपासना
ग्निहोमपक्षेत्वोपासनमग्नेतमद्येतिगत्वायदंतरिक्षमितिगार्हपत्यपरेहितंजपि द
त्वापाणिहोमेत्वग्ने तमद्यादिकंमंत्रद्वयंनास्त्येवततोवीरंमेदत्तपितरित्यनुहन र
मध्यमंपितामहंपिंडमादायमातुःपितामहपिंडमप्यनेनैवादायाधत्तपितरोगर्भं
कुमारंपुष्करस्रजं॥यथायमरपाअसदितिसत्कृत्य त्रितेनैवमंत्रेणपिंडद्वयंप
त्नीप्राशयेदयंमंत्रःपत्याएवपत्न्यनेकत्वेगुर्विण्यादित्वेवाश्वोक्तमनुधेयमथ. सं
पिंडानुद्वासयिष्यन्नुद्वासयेत्यनुज्ञातइतरान्पिंडानप्स्वतिप्रणीतादिकं

वाक्षिपेदथ द्विजान्पित्र्यपूर्वमाचम्य विकिरंदद्यादथोचांतेषुपिंड दानपक्षेपिपिं ना
डोघासनानंतरमेवविकिरंदद्यान्नत्रोपवीतीवैश्वदेविकद्विजसन्निधौसयवान्कु
शान्निधायविकिरार्थान्नैकदेशंसयवजलंहस्तेनादायतन्नाहिकिरेदसोमपाश्च
येदेवायज्ञभागविवर्जिताः॥तेषामन्नंप्रदास्यामिविकिरंवैश्वदेविकमितिप्राची
नावीतीपित्र्यसंनिधौसतिलकुशेषुपितृतीर्थेनावशिष्टमन्नंतिजलंविकिरेद्ये ल
अग्निदग्धायेअनग्निदग्धाजीवाजाताःकुलेमम॥भूमौदत्तेनतृप्यंतुतृप्तायो
तुपरांगतिमित्यपवीतीद्विराचम्यहरिंस्मरेन्नोदेवद्विजहस्तेघापोगंधयवकु
शांश्चदत्वाताभ्यांभूमौतिषु तेषुपुनरपोदर्भानाक्षीरार्थमक्षतांश्चदत्वाप्राची राम
नावीतीपित्रादिद्विजेवंकृत्वोपवीत्येवामुकगोत्रोमुकशर्माहमभिवादयेइति १३७

द्विजानभिवाद्यास्मद्गोत्रंवर्द्धतामितियाचयित्वास्वस्तिवर्द्धतांगोत्रमितिप्रत्यृक्तआशी
र्गृहीत्वादन्नाक्षतान्मूर्ध्निधृत्वास्वयमेवशिष्यादिभिर्वोछिष्टभाजनानिचाल
यित्वाचामेत्सव्येनैवदेवपित्र्यहस्तेषुयवोदकंतिलोदकंचदत्वादेवेभ्यःस्वस्तीति
ब्रूयात्पित्रादिभ्यःस्वस्तीतिब्रूतेतियथाऋंमयथालिंगमुक्तविप्रैःस्वस्तीतिप्रत्यृक्ते
पुरूरुकानांविश्वेषांदेवानांयदत्तंप्राह्यंतदक्षय्यमस्त्वितिब्रूतमितिब्रूतेति वा
हस्तयोःसयवमुदकंदत्वाक्षय्यमस्तितिप्रत्यृक्तेप्राचीनावीत्यस्मत्पितृपितामा
हप्रपितामहानांसपत्नीकानांमातामहमातृपि॰त्नीकानांदत्तंप्राह्यमक्षय्यंस्त्वि म
तिब्रूतेतितिलानापश्चदत्वाक्षय्यमस्तितिप्रत्यृक्तेर्घ्यपात्रंप्रयंमुत्तानंकृत्वाप्ये म
पवित्राणिविस्रस्यातःपरंसर्वमुपवीत्येवकुर्यादेवपित्र्यद्विजेभ्यःसकृदेरंतां

वूत्वेदत्वापित्रूर्वेदक्षिणांदद्यादमुकगोत्रोमुकशर्माहमित्यत्कायथानामगोत्रसप
त्नीकास्मत्पितस्थानोपविष्टब्राह्मणायश्राद्धसाङ्गुण्यार्थंरजतदक्षिणांप्रतिपादया
मीत्येवमग्रेपियथालिंगंदक्षिणांदत्वापुरू॰ कोविश्वेदेवस्थानोपविष्टब्राह्मणाय
श्राद्धसाङ्गुण्यार्थंसुवर्णेदक्षिणांप्रतिपादयामीत्यशक्तौयज्ञोपवीतंवादत्वादक्षिणाः
पांत्वित्यत्कापांतुदक्षिणाइतिप्रत्यक्षेस्वधांवाचयिष्यइतिपृष्टावाच्यतामितिप्रत्य
क्षेत्रगोत्रादिसहितमेवास्मत्पितृपितामहप्रपितामहेभ्योमातामहेभ्यःस्वधोच्यता
मित्युक्तोस्वधेतिप्रत्यक्षेपिंडोपरिपिंडसमीपेवाजलंनिषिच्यस्वधांसंपद्यतामि
त्यत्कासंपद्यतांस्वधेत्युक्तेदैविकान्प्रतिविश्वेदेवाःप्रीयंतामित्यत्कात्रीयंतांविश्वे
देवाइतिप्रत्यक्षेपित्र्यान्प्रतिपितरःप्रीयंतामित्युक्तात्रीयंतांपितरइतिसवैज्ञोभनं

स्क॰

राम
१३८

हविरितिचप्रत्यक्षेवाजेवाजेवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाः॥अस्यमध्वः
पिबतमादयध्वंतृप्तायातपथिभिर्देवयानैरित्यत्कोत्तिष्ठतपितरोविश्वेदेवैःसहेति
युगपद्दर्भेणविप्रान्स्पृशन्पितृपूर्वंविसर्जयेदत्रवाब्राह्मणाःकपानश्चित्रआभुवद्दे
वीसदाहधःसखाकयाशचिष्ठयावृतेत्यादित्यंजपेयुःततःकर्त्तापादप्रक्षालनदेशे
द्विजानुपवेश्यमावाजस्यप्रसवोजगम्यादद्यावापृथिवीविश्वशंभूः॥आमागंतांपि
तरामातरावामासोमोअमृतत्वायगंम्या इतिमदक्षिणीकृत्यहस्तेघृतपुष्पादिद
त्वातानभिमुखोस्मदाख्यातोपेतोमंत्रोपवेदातारोनोभिवर्द्धतांवेदाःसंततिरेवच।
श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्त्विति॥अन्नंचनोबहुभवेदतिथींश्चलभेमहि।
याचितारश्चनःसंतुमाचयाचिष्मकंनेत्यत्कोविप्राश्चयुष्म न्मध्यमपुरुषोपेतावे

तावेवपवंतःप्रत्यक्षरमेवंब्रूयुर्दातारोवोभिवर्द्धतांवेदाःसंततिरेवच॥श्रद्धाचवोमा
व्यगमद्बहुधेयंचवोस्त्वितिं॥अन्नंचवोबहुभवेदतिथींश्चलभेध्वं॥याचितारश्चवः प्र
संतुमाचयाचिष्टकंचनेति॥ततःकर्त्तास्वाङुषंसदःपितरोवयोधाःकृच्छ्रेप्रितःश्रा
स्त्रीवंतेगभीराः॥चित्रसेनाइबलाअमृधाःसतोवीरउरवोव्रातसाहाः॥ब्राह्मण
सःपितरःसोम्यासःशिवेनोद्यावापृथिवीअनेहसा॥पूषानःपातुदुरितादृतावृधो
रक्षामाकिर्नोअघशंसईशते सुत्कातनोविभेरिवत्तंमावियोष्टंविश्वमायुर्व्यश्नुतं॥ है
क्रीळंतोपुत्रैर्नप्तृभिर्मोदमानास्वेगृहे॥आयुःप्रजांधनंविद्यांस्वर्गमोक्षंसुखानि
च॥प्रयच्छंतितथाराज्यंनृणांप्रीताःपितामहाः॥प्रीतास्तुष्यंपितामहाइतिवा॥एताः राम
सत्याआशिषःसंविनिपत्युक्तेदत्ताक्षतपुष्पाणिशिरसिधृत्वामंत्राभ्यांपादाभ्यं गा १३९

दिनाविप्रान्परितोष्यप्रणिपत्यप्रसादयेदद्यमे संफलंजन्मभवत्पादाभिवंदनात्॥अद्य
मेवंशजाःसर्वेयातावोनुग्रहाद्दिवं॥पत्रश्राद्धादिदानेनक्लेशिताश्रयमीदृशाः।
तत्क्लेशजातंचित्तेतुविस्मृत्यक्षंतुमर्हथ॥मंत्रहीनंक्रियाहीनंभक्तिहीनंद्वि
जोत्तमाः॥श्राद्धंसपूर्णतांयातुप्रसादाद्भवतांममेत्युक्त्वासर्वेसंपूर्णमस्त्विति वाचयित्वा
विसृज्यस्मृत्वाक्षमतामित्युक्त्वा ष्टौपदानिबंधुवर्गैर्भार्यासमन्वितोनुव्रज्यपूर्वसंकल्पि
तमासनालंकारादिकमस्मिन्काले दत्वाप्रदक्षिणीकृत्यगृहमागत्यदीपंपाणिनानिवी वि
प्यपवित्रेसृज्यपादौप्रक्षाल्यद्विराचम्योच्छिष्टपात्रोद्वासनंकारयित्वाशुद्धदेशेप्रक्षिप्या
गारंगोमयेनोपलिप्यानाहिताग्निरत्रैववास्याद्यश्रोपेणपाकांतरेणवावैश्वदेवादिकंनि
र्वर्त्यात्रनित्यश्राद्धस्यप्रसंगसिद्धिस्तत्रइष्टैःसहश्राद्धशेषंबलिदानादिनित्यधर्मयुक्तंभुं

जातनिमंत्रणाहेएतद्ब्राह्मौचब्रह्मचारीभूत्वोक्तनियमयुक्तएवैतद होरात्रमतिवाहयेदनु
पनीतस्त्रीशूद्राःश्राद्धमद्विजाकारयेयुः॥स्वयंवामंत्रकंनामगोत्राभ्यांकुर्युर्देवेभ्योनमःपि
तृभ्यःस्वधानमइतिमंत्राभ्यांवाकुर्युःपितरोयत्रपूज्यंतेतत्रमातामहाअपीति॥९॥इतिश्री
मन्नारायणभट्टकृतेग्रह्याग्निसागरेपार्वणश्राद्धप्रयोगेनवमःखंडः॥श्राद्धप्रयोगःस
माप्तः॥ ॥अथपिंडपितृयज्ञव्यतिरेकेणसंक्षिप्तपार्वणश्राद्धप्रयोगः॥अत्रैवंकारिका।
कुर्वीतपार्वणंश्राद्धंदर्शेतद भिधीयते॥कामयोगेनवान्यस्मिंतिथावित्यपरेब्रुवन्॥१॥
ब्राह्मंचेदसंपन्नांदांतांछांतानतोलुपान्॥अक्रोधनानरोगांश्चपार्वंडकुलनिस्पृहान्॥ ण
२॥विहितानामनुष्ठातॄन्निषिद्धानांचवर्जकान्॥एवंभूतद्विजाभावेसत्येकेनगुणेनवा॥ राम
३॥युक्तान्त्रिमंत्रयीतार्हान्सदुणविवर्जितान्॥शुचीनिमंत्र्यदेवेद्यौत्रीन्विप्रान्पितृकर्मे १४०

णि॥देवेपित्र्येथवैकैकंसपिंडीकरणंविना॥सायंमीमांसनंकृत्वासायंभुक्तवतोद्विजान्॥५॥ स
उपागम्यस्वयंशिष्यःसुतोवाश्रद्धयान्वितः॥श्राद्धंश्वोभूतेनात्रभवद्भिर्दीयतांक्षण
॥एवंनिमंत्र्यनियतोमनोवाक्कायकर्मभिः॥भोक्तुर्भोजयितुश्चैवब्रह्मचर्यमतःपरं॥७॥
कृत्वेध्माधानपर्यंतंपित्र्ययज्ञमथद्विजान्॥तांस्तान्कृतपदौचानांतानुपवेशये स्ना
न्॥८॥द्विराचामंतितेविप्राःकर्त्रीक्षात्वयितांघ्रयः॥द्यौदेवेभ्यइतिपित्र्येत्रीन्विप्रानुद
गाननान्॥ध्यायन्ममैतेपितरइतितानुपवेशयेत्॥अर्चयित्वोपविष्टेतुदेवेस्मृत्यक्त
मार्गतः॥१०॥येपक्षाःकथिताःपिंडयज्ञेजीवमृतान्प्रति॥श्राद्धेपिवेदितव्यास्तेपक्षाइत्याह
वृत्तिकृत्॥प्राचीनावीत्यपोदद्यात्पित्रकर्मोपदक्षिणंदर्भोन्द्विगुणभुग्नांस्तदत्वेषामास
नेघथ॥१२॥आपोदत्वाथदर्भेषुपात्राण्यासादयेत्क्रमात्॥तेजसेभ्यमयेपात्रेमन्मयें

तर्हिनेकुर्य्यः॥१३॥एकद्रव्येषुचाग्नेयादिकंस्थंस्थेषुचतेष्वथ॥निषिच्यापोनुमंत्र्यर्चोरंनो
देवीरभिष्टयेः॥१४॥अनुमंत्रःसकृत्कार्यस्तिलोसीत्यावपेत्तिलान्॥आवृत्तिःप्रतिपात्रंस्या
न्मंत्रस्योहस्तकेषुते॥१५॥गंधपुष्पाणिचैतेषुपात्रेषुप्रक्षिपेदथ॥स्वधार्घ्याइत्यपोध्या
स्ताउपवीतीनिवेदयेत्॥१६॥अन्याआपःप्रदातव्याविप्रपाणिषुतःपरं॥अर्घ्यसंश
षमादायदक्षिणेनतुपाणिना॥१७॥सव्यहस्तगृहीतेननिनयेत्पितृतीर्थतः॥त्रिःपि
तरिदंतेर्घ्यमितिपाणिष्वनुक्रमात्॥१८॥दत्वादत्वानिगीतास्तायादिव्यार्चानुमंत्रतु॥पि
तृपात्रेप्रसिच्यार्घ्यशेषंपात्रद्वयेस्थितं॥अनक्तिपुत्रकामस्तेमुखमेकाकितैर्जलैः॥न्य
क्तेपितृपात्रेस्यादसमाप्तेतुकर्मणः॥२०॥उन्नानंवातृतीयेनपिहितंतन्नचान्नयेत्॥ यम
प्राचीनावीत्यथोदग्नीगंधमाल्यंसधूपकंदीपंवस्त्रंयथाशक्तिदेयंवार्घ्यंतरांतरा॥पित्र १४१

यत्तचरोरन्नमुद्धृत्याभ्यज्यसर्पिषा॥अग्नौकरिष्येतान्दृष्ट्वोक्तः क्रियतामिति॥२३ मेक्षणा तेरु
नुप्रहृत्यैनंपितृयज्ञंकरोत्यथ॥२३॥अन्नेषुपैंडेषुकृतशिष्टंदद्यात्यथ॥उद्दिश्यवा रि
न्विप्रेभ्यःपितृभ्यःश्रद्धयान्वितः॥२४॥भुंजानान्छ्रावयेद्विप्रान्क्षोद्यान्पितृतिंगकान्॥
पुराणानिपवित्राणिऋषिगीतांपितृस्तुतिं॥२५॥अन्नंभोजनपर्याप्तंदेयंकिंचिन्ततो
धिकं॥तृप्तेषुश्रावयेत्तिस्रोमधुवाताऋतायते॥२६॥अस्मिन्नितिचतान्विप्रान्संपन्न
मितिपृच्छति॥तेपिसंपन्नमित्येवंप्रतिब्रूयुरतःपरं॥२७॥यद्यैभुक्तंततःकिंचित्पिंडार्थंमंन त्
मुद्धरेत्॥ पितृयज्ञचरोरन्नमुद्धृतंप्रक्षिपेदथ॥२८॥अन्नंप्रकिरणार्थंचसर्वस्मा
दन्नमुद्धरेत्॥ब्राह्मणेभ्यस्ततःशिष्टंसर्वमन्नंनिवेदयेत्॥२९॥तेपिस्वीकुर्युरिष्टंचेद्
नुजानंतितेपुनः॥पिंडदानमनाचांतेष्वाचांतेष्वथवाप्यवेत्॥३०॥अंभोनिनयनार्घं

तंपितृयज्ञंसमापयेत्॥अन्त्रप्रकिरणार्थंयत्तदानीयजलकुंभं॥३०॥आवांतानांसमी
पेतुत्वयतःप्रकिरेजुवि॥उन्नानंप्रथमंपात्रंकृत्वायज्ञोपवीत्यथ॥दत्वाचदक्षिणांश्रा
त्पाविसृजेदोंस्वधेत्यंतं॥ॐस्वधेतिप्रतिब्रूयुर्याचतेमान्वरान्पितॄन्॥३३॥दक्षिणांदि
शमाकांक्षंनियतोवाग्यतःशुचिः॥दातारोनोभिवर्द्धंतांवेदाःसंततिरेवच॥३४॥श्र
द्धाचनोमाव्यगमद्बहुदेयंचनोस्त्विति॥अन्नंचाऽतिथिभवेन्नस्यांरजन्यांब्राह्मणैःसह॥
इतिपार्वणश्राद्धं॥तत्रयोनाहिताग्निरौपासनाग्निमान्मृतपितृकःसपार्वणश्राद्धंपिं
डपितृयज्ञंचव्यतिषंगेणकुर्यात्॥व्यतिषंगोनामद्वयोःकर्मणोर्विलिख्यविलिख्यसहानु
ष्ठानात्मकस्तत्रविशेषः॥तत्रामावास्यायामपराह्णेस्नातःसपवित्रआचम्यप्राणानायम्य राम
एवंगुणविशेषण·तिथौप्राचीनावीतीअस्मत्पितृपितामहप्रपितामहानांमातामह॰॥ १४२

धा

किं

पार्वणश्राद्धंपिंडपितृयज्ञंचव्यतिषंगेणकरिष्यइतिसंकल्प्याग्नेय्यभिमुखोग्निंप्रा
नतःसमस्तसंपदित्यादिभिःप्रदक्षिणंश्राद्धक्षणेःकर्त्तव्यइत्यंतंयथालिंगंकृत्वावि
प्राग्निंप्योपवीत्यग्निंपरिसमूह्यतेनाग्नेयाग्नेयैर्दर्भैःपरिस्तीर्येत्यादिपूर्वोक्तवदिध्माधा
नांतंअविलुप्तंपिंडपितृयज्ञंकृत्वाततोविप्रपादप्रक्षालनादिभोजनपात्रपरितोभू
म्यप्रक्षेपकरम्युद्धृत्यंतंकृत्वासर्वस्मादन्नात्किंचित्किंचित्स्थालीपाकाच्चपिंडार्थंसर्व
स्मादन्नाद्दिकिरार्थंचपृथगुद्धृत्यशेषमन्नंकियतामितैःसहोपभुज्यतांप्राचीनावी
त्येवशुंधंतांपितरइत्यादितद्वशुंधंतांमातामहाइत्यादिदित्वात्राप्युत्सृज्यावशि
ष्टंतृणेनसहेत्यंतेपरिस्तरणानिविसृज्याग्निमंतंकृत्वेवंपितृयज्ञंसमाप्यब्राह्मणानु
ज्ञाप्यसर्वस्मादन्नाद्दिकिरदानाद्यासीमांतमनुव्रजेदित्यंतंसर्वंपार्वणश्राद्धंसमापये

दितिपिंडपितृयज्ञव्यतिषिक्तपार्वणश्राद्धप्रयोगः॥ ॥अथाहिताग्निरुक्तसर्वौधा
न्यर्धाधानीवासंपूर्णेदर्शेश्राद्धदिनेएवश्राद्धान्सर्वेखंडदर्शेपरेद्युरिष्ट्वानंतरंदक्षिणाग्रा
वेर्वपिंडपितृयज्ञंकुर्यात्॥ततःश्राद्धदिनेएवसायाह्णेपिपार्वणश्राद्धंएथगेवकुर्यान्न
तत्रसायान्हेश्राद्धनि षेधःपिंडपितृयज्ञकरणदिनेसायान्हेपिपार्वणमनुज्ञायतइति
स्मृत्यर्थसारे श्राद्धकाल विधिस्थलोक्तेः॥ ॥आहिताग्निरुक्तपिंडपितृयज्ञंसमाप्यत
तःपार्वणंकरोतिपितृयज्ञंतुनिर्वर्त्य तिमनुः॥तत्रहोमोब्राह्मणसमीपेभुक्तशेषेण मां
त्रेणपिंडदानंकाम्येचपाणिहोमोभुक्तशेषेणपिंडदानंनास्त्येवमासिश्राद्धस्यपार्वणस्य
चएककार्यत्वादन्यतरेणैवान्वमित्युक्तंतत्रमासिश्राद्धंकृतवांश्चेत्पर्वणिकेवलंपिंडपि रात्र
तृयज्ञःकार्यएव॥काम्यश्राद्धंकृतंचेन्नैवान्वं॥नपुनर्मासिश्राद्धंकार्यं॥कामश्चतिरुक्त १७३

ति यिविशेषमपेक्ष्यकृतार्थोनपुनरावर्त्तेयं तुंशक्नोति॥अग्निहोत्रवदितिहृत्तिः॥
॥आहिताग्नेरनाहिताग्नेरन्येषांपार्वणश्राद्धादिसर्वश्राद्धप्रयोगःसप्रमाणः सविस्त
रोस्म कृतश्राद्धसागरेउक्त्वान्नात्रपुनर्ग्रंथविस्तरभियोक्तः॥ ॥अथाष्टका
श्राद्धप्रयोगः॥अत्रतावदष्टकाश्राद्धनिर्णयादिकंसर्वंविस्तरेणोक्तंयत्तन्म कृतेन
श्राद्धसागरेज्ञेयं॥प्रयोगस्त्वुच्यते॥सचसप्तपाकसंस्थात्वेनगृह्याग्नेर्नित्यत्वेनानु
ष्ठेयत्वादत्रवक्तव्यत्वाच्चात्राष्टकाप्रयोगउच्यते॥हेमंतशिशिराख्येषुमार्गशीर्षादि
चतुर्षुमासेषुकृष्णपक्षादिसप्तम्यादित्र्यहसाध्यमष्टकाश्राद्धंकुर्यात्॥अत्यशक्तौ
माघमासएवकुर्यात्॥ ॥अत्रैवंकारिका॥हेमंतशिशिराख्यतोःकृष्णपक्षचतुष्ट
ये॥अष्टमीष्वथवैकस्यामष्टम्यामष्टकाभवेत्॥॥प्रत्यष्टकंचपूर्वेद्युःश्राद्धंकुर्यात्तु

व्यते॥कार्यंयत्कर्मसप्तम्यांतत्कुर्यात्पित्रयज्ञवत्॥२॥ओदनंक्षसरंचैवपायसंश्रपयेदिह॥गृहस्थिस्त्राउपादेयाअपूपांजुहुयाद्यदि॥३॥पूर्वोक्तानेभ्यःपाथसंख्यंड्व्याणांचेतिकेचन॥ओदनस्तिलमिश्रस्तक्षसरःपरिकीर्त्यते॥तिलकल्कंविनिक्षिप्यश्रपोवाक्षसरोभवेत्॥स्त्वेध्माधानपर्यंतंपित्रयज्ञंविधानतः॥५॥वासःप्रदानपर्यंतंश्राद्धपार्वणवद्भवेत्॥ओदनाद्यैर्मुहुत्पर्ण्टोक्तःपूर्ववद्विजैः॥६॥सोमायेत्येतयास्थानेकृत्वाष्टाभिरुदीरता॥अंनदानादितृप्त्यर्थंउक्तःसंपन्नमित्यथ॥७॥उद्धृत्यभुक्तशेषान्नंनिदधानिचरुत्रये॥स्यात्यात्रोत्सर्गपर्यंतंश्राद्धशेषंसमापयेत्॥८॥तत्रषष्ठ्यांसायंहोमोत्तरंसप्तम्यामेववाप्रातर्हो मोत्तरंदेशकालौसंकीर्त्यास्मत्पितृणमाक्षयतृप्तिद्वारकानांनित्यनैमित्तिकरूपमष्टकाश्राद्धंकर्तुकामःपूर्वेद्युः श्राद्धंकरिष्येइतिसंकल्प्यक्षणःकर्तव्यइतिशि

म२

तीयसंकल्पांतंकृत्वाविप्रान्संनिधाप्योपवीत्याग्नेयाद्यकैर्दर्भैःपरिस्तीर्यैत्यादिस्थालीत्रयंशूर्पादीनिचपिंड पित्रॅवत्याज्याप्यासाद्यस्थालीषुव्रीहिपूर्णादितंडुलपक्षेपणांतंकृत्वातंडुलान्नंतिलसहितस्थालीषुविभज्यशुद्धोदनंतिलमिश्रोदनंपायसंचश्रपयित्वातिप्रणयनादिघृतवायाज्यनिषेचनांतेचरुत्रयंक्रमेणाग्नेयाद्यर्दक्षिणस्याग्नेःपश्चिमतोदक्षिणसंस्थंक्रमेणोद्यतदक्षिणताभ्यंजनांजनकशिपूपवहणाभ्यासाद्यदर्शश्राद्धंसप्तम्या मंगीकृताग्नेःपश्चिमतउपविश्यप्राचीनावीत्यभिघारितमिध्मंपित्रतीर्थेनाग्नाधायेतावत्सर्वंत्रयंत्रपिंडपित्रयज्ञप्राप्तिस्तत्रैवेध्माधानांतंकृत्वाविप्रपादप्रक्षालनादिकर्मनिवृत्तिः॥कारिकाचभट्टैरपिप्रयोगरत्नेपित्रयज्ञांतेव्यतिपंगस्थलेएवमेवफक्किकालिखितानंतरंसप्तम्यादिश्राद्धेषुविपर्यास तेखेवर्नाकंमणंदृष्टमितिएवप्र

पंचावत्तीचेत्सर्वत्रापिपश्चार्धादध्यवदायरुसरान्नात्पायसाच्चतथैवावदाय४

पृथ्याःततोविप्रपादप्रक्षालनादिपात्रपरितोभस्म क्षेपोत्तरकरशुध्यंतंरुलोदनाद्यन्न
मुरुत्येतिकारिकोक्तेःचरुत्रयंपात्रांतरेषुपृथगुरुत्यघृताक्तंरुलाप्राचीनावीत्यग्नौ
करिष्यक्रियतामित्यृक्तेधौवाज्येनमेक्षणेनोपस्तीर्येषु ओदनमध्यादंगुष्ठपर्वमात्रम
न्नंमेक्षणेनावदायपूर्वोर्द्धाच्चतथैवावदायशिष्टमन्नंपृथक्पृथगभिधार्यमेक्षणस्यु
मवत्तंचैकवारमेवाभिधार्य॥उदीरतामित्यष्टर्चस्यशंयवऋषिः।पितरोदेवतात्रिष्टुछं
दः।पूर्वेद्यर्होमेविनियोगः॥उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः॥असुं
यईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु स्वधानमस्त्यंतेमेक्षणेनकृत्वापितृभ्य
इदंनममेतिसर्वत्रत्यागःपुनःपुनरेवमेवचरुत्रयावदायजुहुयात्सोमायेत्येतयोस्था रा
नस्यृक्तेःस्वधानमोंतेनहोमः॥ ॥ॐइदंपितृभ्योनमोअस्त्वद्यपूर्वोसोयउपरासई १४५

द

सुः।येपार्थिवेरजस्यानिषत्तायेवानूनंसुवृजनांसुविक्षुस्वधानमः॥२॥आहंपितॄंस्सु
विदत्राँअवित्सिनपातंचविक्रमणंचविष्णोः॥बर्हिषदोयेस्वधयासुतस्यभजंतपि
त्वस्तइहागमिष्ठाःस्वधानमः॥३॥बर्हिषदःपितरऊत्यर्वागिमावोहव्याचक्रमाज
ुष्ध्वं॥तआगतावसाहंतमेनाथानःशंयोररपोदधात स्वधाऽउपकृताःपितरः
सोम्यासोबर्हिष्येषुनिधिषुप्रियेषु॥तआगमंतुतइहश्रुवंतुतेवस्मान्स्व
धा॥५॥आच्याजानुदक्षिणतोनिषद्येमंयज्ञमभिगृणीतविश्वे॥माहिंसिष्टपितरः
केनचिन्नोयदआगःपुरुषतांकरम स्वधाऽआसीनासोअरुणीनामुपस्थेरयिंध
त्तदाशुषेमर्त्याय॥ पुत्रेभ्यःपितरस्तस्यवस्वःप्रयच्छतऽहोर्जदधातस्वधा॥७॥येनः
पूर्वेपितरःसोम्यासोनूहिरेसोमपीथंवसिष्ठाः।तेभिर्यमःसंरराणोहवींष्युशन्नुशा

द्भिःप्रतिकाममन्त्रं स्वधा॥एवमष्टाकृत्वोदकृत्वासर्वत्रापिविश्वेभ्योदेवेभ्यइदंनममेति
वात्यक्त्वाप्राचीनावीत्येवमक्षण मनुमन्त्र्यकृतशिष्टचरुत्रयेकिंचित्पिंडार्थंसंस्था
प्यचरुत्रयपरिवेषणादिसंपन्नवचनांतंसर्वंहुत्वाचरुत्रयशेषंजनार्थंपाकान्नंचपिं भो
डपटकार्थमुद्धृत्यशेषंनिवेद्यशुंधंतांपितॄइत्यादिपिंडषट्कंहुत्वापात्रोत्सर्गांतेप र
रिस्तरणंविसृज्यविप्रानन्वार्भ्यकिंकरदानादिपावैवैच्छ्राद्धशेषंसमाप्यसङ्कल्पहालये म
स्वस्यादष्टकास्वंतएवहीतिगर्गवाक्यंतदहरेवश्राद्धांतेपितृमातामहवर्गद्वयश्राद्धं
गतिंलतर्पणंकृत्वायथोक्तनियमनदिवैशेषंनयेत्॥ ॥इतिसप्तमीश्राद्धप्रयोगः॥ स
इदानीचतुर्दश्यवापानितिसूत्रेणोक्त्वादर्शपक्षअनुष्ठानसौक र्यार्थंसप्तमीश्रा ग्रा
द्धप्रयोगमकारउच्यते॥आहिताग्निस्तूनित्रेणाच्छादनांतंकृत्वादक्षिणाग्निसमिंध १४६
पू२ मं

नादिहविरासादनांतंकृत्वापूर्ववद्ब्राह्मणाननुज्ञाप्यदक्षिणाग्नाविध्ममुपसमाधायोदी
रतामित्यादिभिरणाकृतीकृत्वामेक्षणानुप्रहरणहोमशेषपरिवेषणादिब्राह्मणविस
र्जनांतमनाहिताग्निवत्कुर्यात्॥ ॥अत्रस्मार्तस्यसप्तम्यादिश्राद्धस्यश्रौतेदक्षिणाग्नौ
कथंहोमइतिनत्रैवहेमाद्रिणासिद्धांतितंतत्रश्राद्धहेमाद्रावग्नौकरणप्रकरणग्रंथप
रिशिष्टेअन्वष्टकंचपूर्वेद्युर्मासिश्राद्धंचपार्वणंकाम्यमप्युदये ष्टम्यामेको
द्दिष्टमथाष्टमं॥चतुर्ष्वेतेषुसाग्नीनांवन्होमोविधीयते॥पित्र्यब्राह्मणहस्तेस्याद्धस्तरेषु
चतुर्ष्वति॥अत्रकिलाष्टौश्राद्धानिभवंति॥अष्टकानामुपरितनानवम्योन्वष्टकाः॥त
न्निमित्तंश्राद्धमन्वष्टक्यं॥अष्टकापूर्वेदिनरूपासुसप्तमीपुक्रियमाणंश्राद्धंपूर्वेद्युः॥मासि
मासिनियस्यांकस्यांचिन्निथौप्रतिकृष्णपक्षेक्रियमाणंश्राद्धं॥अमावास्यानिमित्तकश्रा

र्द्धपार्वणं॥मुख्यएकोद्दिष्टे ग्नौकरणाभावादेकोद्दिष्टपार्वणोभयात्मकत्वात्सपिंडीकरण
स्यैकोद्दिष्टशब्देनलक्षणयासपिंडीकरणमुक्तं॥तत्राद्येषुचतुर्ष्वाद्येषुसाग्नेरग्नावे
वहोमः॥तत्रयद्यपिकस्यचिदाहिताग्नेरष्टकादिषुश्रौतकर्मार्थंवि हूतदक्षिणाग्नि
सन्निधानंविद्यते॥सर्वाधानेनोपासनाग्निसन्निधिश्चनास्ति॥तथाप्यग्नौहोमविधा
नात्तदर्थमेवविहरणंकृत्वाहोमःकार्यः॥येषामिदंपरिशिष्टंतेषामेवायंविधिर्वेदित
व्योनसर्वेषामिति॥ ॥स्मृत्यर्थसारेतु॥अमावास्यापार्वणश्राद्धप्रकरणेसाधारण्येनैवमु
क्तं॥अथाग्नौपाणौहोमः॥निरग्नेःपाणावेवआहिताग्निःसर्वाधानेदक्षिणाग्नौजुहुया
त्तापि च्यविप्रपाणौवा॥अग्न्यभावेपाणौहोमइति॥तदपिअत्रत्यपूर्वोक्तहेमाद्र्यनु
सारेणसाधितंभवतीतिप्रतिभाति॥ ॥अथाष्टमीश्राद्धप्रयोगः॥अत्रैवंकारिका॥

ष्टकैः कर्मकथितमष्टमीकर्मकथ्यते॥अष्टम्यांपशुनाकार्यः स्थालीपाकेनचाष्टकाः॥
१॥स्थालीपाकप्रयोगस्तुतत्रतावन्मयोच्यते॥पूर्णेपात्रनिधानांतमन्वाधानादिपूर्ववत्
२॥मंत्रोक्तदेवताभ्यस्तूष्णीमेवतुनिर्वपेत्॥चतुरश्चतुरोमुष्टीप्रोक्षणंचतथाभवे
त्॥३॥सहैवश्रपयेदत्रनास्तिवोदरणंतथा॥आदिष्टमंत्रहोमेतु सर्वत्रैवंप्रतीयते॥
४॥कृत्वाज्यभागपर्यंतंजुहुयात्सप्तसिष्विष्टं॥अग्नेनयेतृचौपंचग्रीष्मश्चस्यादयस्त
था॥५॥अविज्ञातस्वरोमंत्रःसौत्रएकश्रुतिर्भवेत्॥ततःस्विष्टकृतंकृत्वाहोमशेषं
समापयेत्॥६॥अथाच्छादनपर्यंतंश्राद्धंपार्वणवत्रवेत्॥श्रुत्यभोजनार्थान्ब्राह्मणान्कृ
त्वाथपाणिषु॥७॥सोमायेतितुमंत्राभ्यांमेक्षणेनकरेणवा॥एकैकामाहुतिंकेचिद्वि
प्रास्तेवप्रजुह्वति॥८॥प्राश्नितेषुहुतेघ्नेघ्नेघ्नन्दन्नंददात्यथ ॥उदीच्यांप्राङ्मुखस्तैवनप्रा

श्नीयात्करेध्रतं॥९॥निधायतच्चतंपात्रेषाचम्योपविश्यदुर्वीति॥संपन्नवचनांतंस्या
छेषंपिंडार्थमुद्धरेत्॥ब्राह्मणानांसमीपेतुपिंडनिर्वपणंक्वेत्॥नकार्यमग्निंप्रत्येया
दित्या---त्रेतुकर्मणि॥१०॥प्राशयेन्मध्यमंपिंडंस्त्राङ्शेषंसमापयेत्॥अन्वष्टक्यंच
पूर्वेद्युर्मासिमासिचपार्वणं॥१२॥चतुर्ष्वग्निहोमस्यात्पिंडाश्चाग्निसमीपतः॥काम्य
मप्युदयेष्टम्यामेकोद्दिष्टमथाष्टमं॥१३॥चतुर्ष्वपकरेहोमःपिंडदानंद्विजोत्तिके॥
पिंडनिर्वापणंकेचिन्नेच्छंत्यस्मिंश्चतुष्टये॥१४॥तत्रसप्तम्यांसायंहोमानंतरमष्टम्यां
वाप्रातर्होमोत्तरंदेशकालौ॰अत्रकामकालौवैश्वदेवेअष्टम्यांकामकालाविनिशंरव
स्मृतेः॥अस्मत्पितृ॰कानांमातामह॰कानांनित्यविधिरूपमष्टकाश्राद्धंकरिष्यइतिसं राम
कल्प्यब्राह्मण निमंत्र णादिश्राद्धक्षणकर्तव्यइतिद्वितीयसंकल्पांतं कृत्वोपासनाग्नि १४८

ना प्रज्वाल्यप्राणायम्याष्टकाश्राद्धांगहोमंकरिष्येतत्रदेवतापरिग्रहार्थमन्वाधानमित्या
दिचक्षुष्पतेद्विवारमग्निंग्रीष्महेमंतनर्तुवर्षाशरत्संवत्सराहोरात्रान्पृथिव्यंतरिक्षद्यु
दिक्प्रदिगुद्दिगश्विद्युतःअग्नीरीचिधानसमुद्भूतपविष्यद्भ्यांआदित्यवसु
विश्वेदेवरुद्रमरुत्प्रजापतीन्प्रजापतिंचएताःप्रधानदेवता अरुद्व्येणास्विष्टकृतम शेषेण
ग्निमित्यादिपूर्णपात्रनिधानांतेग्नेःप्रत्यक्सपवित्रेभ्रपे चतुरश्चतुरामुष्टीन्नाकृति
संख्यासप्रचारंतांतांदेवतांध्यायन्तूष्णींनिरूप्यतथैवमोक्ष्यावहननाद्यंज्यभागा
तंचरोरव्युद्धारंसप्तभिर्मंत्रैःसमाकृतीर्जुहुयात्॥अग्नेनयेतिमंत्रद्वयस्यागस्त्योग्नि
स्त्रिष्टृ॥अष्टकाहोमेविनियोगः॥अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिवि
द्वान्॥युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम स्वाहाअग्नयइदं॰अग्ने

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH

लंपारयानव्योअस्मान्स्वस्तिभिरतिदुर्गाणिविश्वा॥ पूश्चपृथ्वीबहुलानउर्वीभवातो
कायतनायशंयोः स्वाहाअग्नेऽइदं०ग्रीष्मोहेमंतऋतवःशिवानोवर्षाःशिवाअभ
याँरंनः॥संवत्सरोधिपतिःप्राणदानोहोरात्रेऽहणुतांदीर्घमायुःस्वाहाग्रीष्म हेमंत
तुवर्षाशरसंवत्सराहोरात्रेभ्यऽइदं०॥शांतापृथिवीशिवमंतरिक्षंधोनोदिव्यभयंनो
अस्तुशिवादिशःप्रदिशः उद्दिशोनआपोविद्युतःपरिपांतुसर्वतः स्वाहा॥पृथिव्यंतरि
क्षद्युदिक्स्वादिगुदिगह्विद्युऽइदं०॥आपोमरीचीःप्रवहंतुनोधियोधातासमुद्रोवहंतुपा
पं॥भूतंभविष्यदभयंविश्वमस्तुमेब्रह्माधिगुप्तःस्वा राक्षणोस्वाहाअम्मरीचिधा
तृसमुद्रभूतभविष्यब्रह्मण्यऽइदं०॥विश्वआदित्यावसवश्चदेवारुद्रागोप्तारोमरुतःस
दंतु॥ऊर्ज्जेप्रजाममृतंपिन्वमानः प्रजापतिर्मेयिपरमेष्ठीदधातुस्वाहा॥आदित्यवसु

विश्वेदेवरुद्रमरुत्प्रजापतिभ्यऽइदं०।एतैरेकश्चत्यापविनैहोमः।प्रजापतेनत्वण्यीणास्वा
हाप्रजापतयऽइदं०।एवंसंस्रावाहुतीर्हुत्वास्विष्टकृदादिहोमशेषंसमाप्यस्वागतोक्त्यादि
अर्घ्यशेषसमानयेत्।तंहुत्वाभोजनार्थादन्नाहुरुत्यघृताक्तंकृत्वापित्र्यसमीपेउ
पविश्यतत्पाणिंपर्युक्ष्यतत्रप्राचानावीतीदक्षिणाग्रान्दर्भानास्तीर्यमेक्षणेकरेवोपस्तृ
यैकारिकोक्तेमेक्षणेनकरेणवाद्विस्त्रिर्वोदायपात्रस्थमवत्तंचाभिघार्यसोमाय
पितृमतेस्वधानमोग्नयेकव्यवाहनायस्वधानमश्नितदर्शवत्सिद्ध्यविप्रपाणिषुजुहु
यात्केचिदाभ्यामेवमंत्राभ्यामेकैकामाहुतिंगृहीत्वाविप्रहस्तेवप्रजुहुतीतिकारिकोक्ते
रेवंकृत्वोद्देशत्यागौकृत्वेवंसर्वत्रपित्र्यविप्रपाणिपुजुहुयान्नात्रश्राद्धचतुष्टयेनावृत्तौ
करणहोमः।काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमेचतुर्धेषुकरहोमः पिंडादानंद्विजांति

कश्चित्वृत्तिकारिकोक्तेः पित्र्यब्राह्मणहस्तेस्यादुत्तरेषुचनुर्षु पीतिहे माद्रोपरि
श्रिष्टोक्तेः॥ ॥पाणिहोमेत्विध्मप्रक्षणविप्राभ्यनुज्ञानसंतीतिस्मृत्यर्थसारस्त्रपि
त्र्यविप्रपाणिंप्राचीनावीतीपरिसमूह्यपर्युक्ष्यवामेनदक्षिण मुपस्तीयेदक्षिणेना
वदायप्रत्यग्निघार्यपर्युक्षितेसदर्भे विप्रपाणौप्राग्दुलापरिसमूहनपर्युक्षणे
स्तइतिसएवनानुज्ञा पाणिहोमेस्यान्नस्तः पर्यूहनोक्षणेनाग्नेतमधतिचैनस्याता वै
मे मिर्भोक्षणेइतिस्मरेत्तावत्स्या॥पाणिहोमहेमाद्रोयमः॥अग्नौकरणवन्नत्रहोमोवि
प्रकरेभवेत्॥पर्युक्ष्यदर्भोनास्तीर्यतोत्यग्निसमोद्विजइतिपाणिहोमप्रकरण
दत्रापिसर्वंस्पष्टमुक्तं॥ ॥आशितेषुकृतेघन्नेष्वन्नंददात्यथ॥उदीच्याःप्राकूर १५०
त्रैवंनप्राश्नीयात्करेकृतंनिधायतदुनंपात्रेष्वाचम्योपविशेदुवीतिकारिकोक्तेर्विप्रा
नि४

ङ्गैमन्त्रंभाजनेषुनिक्षिप्याचंम्यपूर्ववदुविशेयुः ततः कर्तान्नंपरिविष्य कृतशेषमन्त्रंभो
जनार्थेषुपात्रेषुनिहितेघन्नेषुददात्यग्निहोमेपाणिहोमेसमानमिदमितिवृत्तिःएथि
वीतेपात्रमित्यादिपिंडदानकालेयत्रस्यात्पाकोविहितस्तत्रतेनचभुक्तशेषेणपिंडु
निर्वपणंभवतियत्रतुस्यात्पाकविधिनोक्तितत्रभुक्तशेषेणैवकेवलेनपिंडनिर्व
पणंभवतीतिवृत्तिर्ब्राह्मणानांसमीपेनुपिंडनिर्वपणंभवेत्।नकार्यमग्निंप्रत्येत्याघत्र
कर्मणीत्यक्तेःसर्वत्रपाणिहोमेग्नेतमधं यदंतरिक्षमित्येतद्यमकृत्वैवमाशयेन्मध्य क्ष
मंपिंडंश्राद्धशेषंसमापयेन्नदहरेववर्गद्वयस्यश्राद्धांगतिलतर्पणंकुर्यादेकास्त्वेन
एवहीत्यक्तेः॥ ॥अत्रगृह्यसूत्रेभ्योभूतेएकापशुनास्यात्पाकेनवेति विकल्पा
भिधानेपि॥लोकविद्विष्टत्वात्पशुपक्षेप्रयोगोक्तः॥इत्यष्टमीश्राद्धप्रयोगः॥आहिमि

स्ल॥अन्वष्टक्येपित्र्यस्तवदित्यत्रवृत्तौअग्नित्र
णयनंपात्रंसोमायेत्यादिमंत्रकोउपस्थानंप्रवहनंनिनयाद्यंतिदिश्यते॥तत्रकर्त्तो
प्रवेद्युःपरेद्युर्वाप्राग्वद्दैश्वदेवार्थंवर्गत्रयार्थंब्राह्मणान्निमंत्र्यापरास्तेप्राणानायम
देशकालौसंकीर्त्यप्राचीनावीतीअस्मत्पितृणा॰॥पाणंअसपत्नीकानांनिर्दिश्यास्मन्मा
तृपितामहिप्रपितामहीनांदत्तनामस्त्रीणामित्युक्त्वरमुकामुकदानंगोत्राणांवसुरू
पा॰।दर्शवन्मातामहानांसपत्नीकानांनित्यविधिरूपमन्वष्टक्यश्राद्धंनवम्यांपित्र्य
स्तवदित्यृक्तेः।पिंडपित्र्यज्ञव्यतिरिक्तपार्वणविधानेनान्नेनहविष्यासघृःकरिष्यइ
तिसंकल्प्यश्राद्धेक्षणःकर्त्तव्यइतिद्वितीयसंकल्पांतंकृत्वास्त्रवृन्निकारिकोक्तेर्नित्या
यतनाग्नौपासनाग्निसंवेनिष्काश्यप्रयत्नेनसंपादितेदक्षिणप्रवणेदेशेशुचिस्थ

लेतमौपासनाग्निमुपलेपनोल्लेखनविधिवत्संनिष्ठाप्यप्रदक्षिणमेवपरिसमूह्यप्राग्द
क्षिणाग्रैःसमस्तैर्दर्भैःसत्राद्युक्तेरकंपर्यस्त्रिवार मप्रदक्षिणंपरिस्तीर्यपात्रासा
दनार्थंदर्भानास्तीर्यचरुस्थालीत्रयस्रूपादिपित्र्यस्तव दासादयेत्॥तत्रसकृदाछि
न्नत्रयमितिविशेषः॥तंडुल प्रक्षालनांतेस्थालीषुतंडुलान्विभज्यस्रुक्षौदनंतिलमि
श्रौदनंपायसंचस्रपयित्वाकिंचिदोदनाग्रदर्वंमंडकाख्यंपात्रांतरेणादायसभ्रत्याग्नि
मतिप्रणीयातिप्रणीतवद्दैश्यभवेदेवंपरिस्तृतिरित्युक्तेस्तमपिपूर्ववत्परिस्तीर्यस्रुवेन
पश्चिमापवर्गेपित्रादिवर्गत्रयार्थंत्रेखात्रयमुल्लिख्यप्रत्येकमग्नि
रभ्युक्ष्यसकृदौन्नेनैकैकेनैकां रेखामास्तीर्यध्रुवायामाज्यंहुत्वोपासनाग्नेर्दक्षिणतः
कुशंघासौस्रुवेणाज्यमादायचरुत्रयंप्रत्येकमभिघार्याग्नेरु दगुद्वास्याग्नेःपश्चिमतो

दर्भैपुञ्जमेणदक्षिणसंस्थ मासाद्यदधिमिश्रभ र्जितयवपिष्टरूपसक्तून्दधिमंथसंज्ञिकान्
मधुमिश्रताद्दृशयवसक्तून्मधुमं थान्पात्रद्वयेसंभृत्यदधिमंथसक्तूनोपासनेधि
श्रित्याभिघार्योरगुद्वास्यपायसादक्षिणतआसाद्याभ्यंजनांजनकङ्गिपूपबर्हणानांस्वा
गतवचनादिप्राप्नोतुभवान्प्राप्नवानीत्यंतेअर्घ्योसादनकालेनवार्घ्यपात्राण्यासादये
त्तत्रमात्रादिद्वित्वेबहुत्वेवातावत्संख्याकान्पात्रासाद्यप्रोक्ष्योत्तानानिकृत्वाप्रत्येकंनिरि
तदर्भत्रयाणिजलेनापूर्यशन्नोदेवीरित्येकैकवर्गपात्रस्थंजलंसकृदनुमंत्र्यतिलोसी
तिमंत्रेणयथापठितेनमातृमातामहश्राद्धवर्जितेनसतिपात्रेमंत्रावृत्यातिलान्निक्षि
प्यगंधपुष्पाणिप्रक्षिप्यपितृपात्रंमातृपात्रंसपत्नमित्यादियथालिंगमभिमृश्यदर्शवत्स
मगोत्ररूपमित्याद्युक्तपूर्वमावाहनार्चनेकृत्वोपवीतीसर्वेषांनामगोत्राण्युच्चार्यसंपादि

तावःस्वधार्घ्योऽस्तितत्पात्रंतन्नसुरतःक्रमेणसंस्थाप्यदर्शवत्पितृवर्गस्यार्घ्यंदत्वामा
तरिश्वंतेअर्घ्यंस्वधानमोनमेत्यादिनामातृवर्गस्यदत्वामातामहवर्गस्यचदर्शवद्
त्वापितृपात्रेसंस्रावपूरणादिपाणिशोधनांतंकृत्वापात्रचतुष्टयेक्रमेणचत्रया रु
द्दधिमंथाञ्चषष्ठ्यविरुद्धृत्यघृतान्कृत्वाग्नौकरिष्यइतिपित्र्यर्थविमाननुज्ञा
प्यक्रियतामितितैरनुज्ञातोमेक्षणेऽपस्तीर्यतेनोगुष्टपर्वमात्रंक्रमेणहविश्चतु
ष्टयस्यमध्यात्पूर्वार्धाच्चषष्ठ्यक्ष्यथगवदायपात्रस्थंहविश्चतुष्टयंषष्ठ्यक्ष्यथगृभि
घार्योवत्तंचाभिघार्यसोमायपितृमतेस्वधानमइतिप्रथमाहुतिंहुत्वापुनःपूर्ववद्
वदानादिपूर्वंअग्नयेकव्यवाहनायस्वधानमइतिद्वितीयाहुतिंहुत्वामत्साहुत्यु
शत्यागौहत्वाप्राचीनावीत्येवतूष्णींमेक्षण मनुप्रहृत्यपूर्ववत्परिषिच्यहुत

शिष्टपात्रचतुष्टयस्थितंकिंचिल्लिंचिद्गंत्रयस्यविप्रभोज नभाजनेषुपरिविष्या
न्नत्यागादिसंपन्नवचनांतंकृत्वापिंडार्थीकृतश्राद्धीयसर्वान्नमध्येस्थालीचतुष्ट
यस्थितंसर्वंहविश्चतुष्टयंमधुमंथांश्चनिक्षिप्यपुनर्विकिरार्थंसर्वान्नात्किंचिदु
द्धृत्यशेषंनि वेद्यद्विजैरुत्तरेपोशानेहस्तप्रक्षालनेचकृतेस्वयमाचम्यपूर्वोत्तीर्णै
पुवर्हिर्भूमिषुशुंधंतांपितरःशुंधंतांपितामहाःशुंधंतांप्रपितामहाःशुंधंतांमात
रःशुंधंतांपितामह्यःशुंधंतांप्रपितामह्यःशुंधंतांमातामहाःसपत्नीकाःशुंधं०इति
मंत्रैःसतिलकमंडलुजलंनिनीयाद्बीमलकप्रमाणान्मधुसर्पिस्तिलयुतान्न्वपिं
डान्कृत्वाघ्रवाद्येनाभिघार्यएतन्नइत्यादियथालिंगंपिंडान्दत्वास्त्रीपिंडेषूर्वसंभृ
तमोदनाग्रइवंनिपिच्यात्रपितरइत्याचम्युपस्थानांतंकुर्यान्नत्रात्रपितरोमीम

दंतपितरइत्यनुहेनमंत्रद्वयेनसर्वेषांपिंडानांसकृदेवानुमंत्रणंकार्यंएतद्वःपितर
इत्यनुहेनयथार्थस्त्रीणांपथग्वासोदद्यादसंसर्गित्वादितिवृत्तिर्नमोवःपितर०म
नोन्वाजुवामहे०॥परेतनपितरः०इतिमंत्रेर्यथापठितैःपित्र्याद्धोहरहितैस्तन्न
ल्कर्मयथाक्रमंकुर्यात्प्रवाहणंसर्वेषांचोपदेवेतिवृत्तिर्वीरंमेदत्तपितरइत्यनुहेन
त्रिरावृत्तेनमंत्रेणवर्गत्रयस्यमध्यमपिंडानादायाधत्तपितरइत्यनुहेनमंत्रेणपत्नी
प्राशयित्वापिंडोद्वासनादिपात्रोत्सर्गंकृत्वाविप्रविसर्जनादिश्राद्धशेषंसमापयेन्न
दहरेवगोत्रयस्यश्राद्धंगतिलतर्पणंकुर्यात्॥ ॥मातृद्वित्वेपिंडदानकाले एतद्धा म
स्मन्मातरोयत्तदेश्रीदेअमुकगोत्रेअमुकरूपेयेचपुत्रमत्रान्वित्येकंपिंडंदद्यात्अ
स्मन्मातृभ्यांयत्तदाश्रीदाभ्यामसुकगोत्राभ्यामसुकरूपाभ्यामयपिंडस्वधानमः॥

अभ्यंजनदानेयत्तत्श्रीदेवकार्येअभ्यंजाथामितितैलंएवमभ्यंजनदानेअंजाथामि
तिमंत्रेकंद्विवारमंजनं॥एवंपितामहेप्रपितामहेद्विवेच॥मातृबहुत्वेचपिंडदानेएतद्वो
स्मन्मातरःयत्तदेश्रीदेवदेवेअमुकगोत्राअमुकरूपाःयेचयुष्मानित्येकंपिंडं॥अभ्यंज
नेपूर्ववन्नामान्युक्त्वाअभ्यङ्क्तांअंजनेनैवंअङ्क्तांपितामहीप्रपितामहीबहुत्वेपेवं॥स
र्वेषुपिंडदानादिषुमात्रादीनांत्वेकनामत्वेचद्विवचनांतंतन्नामनिर्देश्यंबहुत्वेबहु
वचनांतंभिन्ननामत्वेतावंतिनामानिनिर्देश्यानि॥ ॥एतच्छ्राद्धकरणेप्रायश्चित्तमृग्वि
धाने॥एभिर्घृतभिर्जपेन्मंत्रंशतवारंतुतद्दिने॥अन्वष्टक्यंयदाश्रुत्यंसंपूर्णंयातिसर्वदे
ति॥अन्वष्टक्यादिश्राद्धेअन्येषुसर्वेश्राद्धेषुवायत्रकुत्रापिसर्वत्रपिंडदानेस्त्रीविषयेयेच राम
त्वामत्रान्वित्यत्रयेदेशाद्वैयथा पत्नितेनपुत्रिंगेनैवप्रयोगः कार्योनात्रयाश्चेति १५४
प न

तस्त्रीलिंगेनेतिदृत्तिः॥केचिन्मतेतुयाश्चेत्यपिकुर्वंतीतितत्त्रैलंत्यभियुक्तं॥दृत्तौइतिप्रा रा
संगिकं॥एतत्तेनतयेचत्वामंत्रानुएतस्मार्थएवहितत्तत्पिंडरूपेमन्नंतुभ्यंयेचान्येत्वा
मत्रानुयंतितेभ्यश्चेत्यमर्थोदृत्तिदृत्तान्वष्टक्यस्थलेत्याख्यातः॥॥इतिश्रीमदार
ुपनामनारायणभट्टकृतेरत्नाग्निसागरेअन्वष्टक्यश्राद्धप्रयोगः॥अथमाघ्याव
र्षश्राद्धप्रयोगः॥ तत्रसूत्रं॥एतेनमाघ्यावर्षंप्रोष्ठपद्याअ
परपक्षेएतेनेतिसर्वेद्युःप्रभृतिकृत्स्नकर्मातिदेशःएतदुक्तंभवति॥प्रोष्ठपद्याःसमीपे
योपरपक्षस्तत्राप्यमाघ्यावर्षनामकर्मैकार्यं॥तच्चैतेनाष्टकाकर्मणाव्याख्यातमिति॥
अत्रापित्रिघ्नहस्तुनत्॥माघ्यावर्षंनभस्यकृष्णपक्षेकुत्रचित्॥अन्वष्टक्यवदेवस्यात्पार्वणं
नेतिकेचन॥इतिमाघ्यवर्षं॥प्रतिमासंभवेत्कृष्णपक्षेयुग्मेष्विकुत्रचित्॥इतिप्रतिमासं

कृष्णपक्षेऽयुग्मेहनिश्राद्धं॥पंचमीपुत्रकामस्येत्यादिकाम्यंतदुच्यते॥श्राद्धंयदुक्तमष्टम्यां
तद्दर्शेतद्दिष्यते॥ ॥इतिकाम्यंविकल्पः॥पार्वणा ख्यस्यमासिश्राद्धस्यवेष्यते॥काम्य पार्व णं
श्राद्धंतेनैवकार्यमासिकपार्वणे॥ ॥अष्टमीश्राद्धवत्कुर्यादाहिताग्निस्तुपार्वणं॥पार्व
णश्राद्धमासिश्राद्धकाम्यश्राद्धानामध्येन्यतरस्मिन्कृतेसतिइतरश्राद्धयोस्तेनैवसि
द्धिरितीदंदर्शेश्राद्धप्रकरणंतेप्रस्पष्टमुक्तंपुनर त्रापिसूचिनेकारिकापाठवशात्॥
इतिकारिकाहस्तावप्येवमेव॥॥अथाष्टकाविकृतिभूतंमाघ्यावर्षश्राद्धंतत्रभाद्रपदा
परपक्षेसप्तम्यादित्रिष्वहस्सुअष्टकाकर्मवत्सर्वंकुर्यादिति कारिका॥हरदत्तस्तुभा
द्रपदकृष्णपक्षेमघायुक्तत्रयोदश्यांमाघ्यावर्षाख्यश्राद्धंसांकल्पितविधानंनकुर्यात्।त राम
दाएवंसंकल्पः॥पूर्वेवर्तिन्यनुद्घायेमाघ्यावर्षश्राद्धंकर्तुकामः पूर्वेद्युःश्राद्धंकरिष्येइ १५५

त्येवविशेषोन्यत्सर्वमष्टकावत्॥ ॥इतिमाघ्यावर्षे॥दर्शेवत्पूर्वेनन्वद्यमघात्रयोदशी
घ्या निमित्तंमाघ्यावर्षश्राद्धंसदैवंसांकल्पितविधिनाकरिष्येइतिसंकल्प्यावाहनाग्नौकरणपिं
डदानविकिरदानस्वधावाचनवर्जंसर्वंपार्वणवत्कुर्यात्॥समंत्रकावाहनवर्जमितिके
चित्॥तूष्णींनुभवत्येवेति॥अस्यप्यवर्जमितिकेचित्॥विकिरेतुविकल्पइतिकेचित्॥
एतत्सर्वंसांकल्पलक्षणस्थलेप्रागुक्तं॥इतिसंकल्पविधिः सर्वत्रापिसांकल्पश्रा
द्धेज्ञेयः॥ ॥इतिमाघ्यावर्षश्राद्धं॥इतिकृष्णपक्षेप्रतिपदाद्यैर्गम्यसंख्याकतिथिषुएव युग्मे
कर्तव्यंमातृश्राद्धवर्जंसपत्नीकपितृत्रयस्यतथामातामहत्रयस्यचसुराद्यामवर्जंसर्व
मन्वष्टक्यश्राद्धवत्कुर्यात्॥ ॥इतिप्रतिमासकर्तव्यापरपक्षश्राद्धप्रयोगः॥ ॥अथका
म्यश्राद्धं ॥नक्षत्रपर्व्वसुअन्यस्मिंवातिथौवृतिकादिनक्षत्रेषुफलार्थंविहि

तंयत्काम्यास्यंअष्टमीश्राद्धवत्कर्तव्यमितिवृत्तिकृत्॥काम्यश्राद्धेपाणिहोमोभुक्तशेषेण पिंडदानंवास्त्येवेतिपार्वणश्राद्धस्थलेवृत्तिः॥अत्रधुरिलोग्वनौविश्वेदेवौ॥वृद्धिश्राद्धवत्कर्तव्यमिति॥शौनकः॥अयंप्रकारःप्रागुक्तः॥वृद्धिप्रकारस्तत्तत्करणेवक्ष्यते॥काम्यरविवारश्राद्धप्रकारस्तत्तत्करणेपार्थक्येननुष्ठानवैलक्षण्येन॥७॥ इतिमदङ्गोपनामकनारायणभट्टकृतेगङ्गाग्निसागरेमाघ्यावर्ष्याद्येनवंतश्राद्धनिरूपणं॥॥अथाग्निनाशकानि॥आहिताग्नेर्मैस्यात्सौपासनिकस्यत्रितिपक्षहोमादिप्रकरणंतेस्मृत्यर्थसारेउक्त्वादाहिताग्नेर्यान्यग्निनाशनिमित्तान्यविरुद्धानितान्यत्रौपासनिकस्यापुच्यंते॥॥अनुक्तमन्यतोग्राह्यमितिवचनात्सर्वत्राखाप्रत्ययमेकमेकेतिन्यायात्॥इष्टापूर्तादिकंकर्मस्वशाखोक्तंनविद्यते॥तत्रबौधायनंग्राह्यं बह्वृचा

ऋिभिरादरादियुक्तत्वाच्च।तत्रबौधायनीयःग्रामश्चित्तंमदीपोक्तानिकानिचित्प्रायश्चित्तानिविविच्यलिख्यंते॥यजमानःसपत्नीचोभौउदयास्तमयवेलायामग्निसकाशेवसतः।यजमानस्यान्यपरत्वेपत्न्यवश्यंवसेत्॥पत्न्याःकार्योतरपरत्वेयजमानोवश्यंवसेत्॥यदिपत्नीयजमानश्चसहोदयास्तमयवेलायांवास्फसीमांग्रामसीमांवानिष्क्रम्यवसेतांतदाग्नयोलौकिकाभवंतिअविकृतमग्न्याधेयंकुर्वीत॥तथाचकात्यायनः॥विहायाग्निंसभार्यश्चेत्सीमामुल्लंघ्यगच्छति॥होमाकालात्पतेतस्यपुनराधेयमिष्यते इति॥उदयास्तमयव्यतिरिक्तकालेपितयोर्महासीमातिक्रमणंकेचिन्नेच्छंति॥अत्रबौधायनसूत्रं॥अथयदियजमानश्चैवपत्नीचोभौत्वेवनिष्क्रामतोग्रामांतेग्रामसीमांतेवावसेतेग्निहोत्रमेवलुप्येताविकृतमग्न्याधेयंकुर्वीतेति॥

छूमेयुः यद्युच्छूमेयुरग्नयोलौकिकाभवंतितत्राग्न्याधानंप्रायश्चित्तंग्राम्याप्रासादूर्ध्वंहरणेउ२

गृ. सा १५७ श्रौतेग्निबद्धलशब्दःस्मार्तेएकाग्निपरोज्ञेयः॥अत्रास्पैकत्वात्॥अग्न्याधेयशब्देनपुनः संधानंग्राह्यं॥ ॥अजस्त्रा नग्नीन्हरंतःशंग्राप्रासादर्वाङ्नोच्छ्वासेनदोषः॥सूत्रेपेवमेव। अजस्त्रहरणेसमारोप्यहरणेचयजमानःपत्नीचान्वारभेयातां॥तदभावेग्नयोलौकिका भवंति॥तदाग्न्याधानंप्रायश्चित्तं॥अशक्तविषयेवरूपमन्यतरान्वारंभः कर्तव्यः॥समारो पयकारस्तूसभायेस्यप्रवासस्थेउक्त्वात्रात्रपुनर्लिखितः॥तत्रआत्मनिसमारूढेष्व ग्निषुनाप्सुनिमज्जेन्नमैथुनंब्रह्मचेत्॥मध्येशूद्रादिस्पर्शेअन्त्यचरणेचाग्नयोनश्यंति॥ ॥ अग्निषुदीप्यमानेषुसमारूढेषुचारण्योःशूद्रवायसपतितरासभ रजस्वलासूतिकाचो ग्राम डालक्षपणामेध्यादिभिःस्पर्शेनाग्नयोनश्यंति॥वसाशुक्रमसृक्मज्जामूत्रविट्कर्णवि १५७ ट्नसा॥श्लेष्मासुपूतिकास्वेदोद्दशैतेनृणांमलाः॥एतैश्चस्पर्शेनाग्नीनांनाशः॥तत्राधा

या नंप्रायश्चित्तं॥अग्निरजस्वलास्त्रीचेत्स्पृशेदग्निहोत्रकं॥इष्टिरष्टकपालेनकार्यातुश्चचये ग्नयेइतिमंत्रंतत्रवचनाद्रजस्वलायाग्निसंस्पर्शेइष्टिरेवनाग्न्याधानमितिकेचित्॥अ ग्नयेश्चचयेत्वेतिस्थालीपाकोज्ञेयः॥चिकीर्ष्यं॥असमाधायचेत्स्वामीसीमामुल्लंघ्यगच्छ ति॥असमाधायनामअनुपस्थायेत्यर्थः॥अग्निंतिकंसमाधायतावन्मौनी प्रचक्षते॥ यावच्छरीविदृश्यंतेदृश्यावाहनसद्मनइति॥कात्यायनीयदेवयाज्ञिकग्रंथेप्रवासविष येउक्तारसमाधानंअनुपस्थानं॥अनुपस्थायेवगमनेग्निनाशःपुनस्तेतिसमिंध नंवेत्यग्रेवक्ष्यते॥तत्रयेषांसूत्रेअनुपस्थितगमनेकारांतरमुक्तमस्तिनेत्तत्कर्तव्यं येषांसूत्रेप्रकारांतरमुक्तंनास्तितत्राग्निनाशःसमिंधनंवा॥ तत्रआश्वलायनसूत्रेनुप स्थिताग्निश्चेत्प्रवासमापद्येतेदेवसंवेश्वानरेणोपतिष्ठतइत्युक्त्वातत्सङ्गोडिला

प्र

दामनुपस्थित्याग्निश्चेत्तरात्रैवसमित्तिमंत्रेणोपतिष्ठेतपत्नागमनादिपूर्ववदित्यक्तं॥
एतस्याप्यकरणेत्रिकाङ्गमुक्तत्वादग्निराश॥अथ वातत्रैवमंतरात्पुनस्त्वेतिसमिंध
नं॥मंत्रस्कृद्यागेवोक्त॥ ॥यजमानेग्रामांतरंगतेपुत्रांतेवासीपत्नीवायदग्नीन्ग्रा
माद्बहिर्नयेयुस्तदाग्नयोलौकिकाभवंति॥ यजमानेग्निसमीपस्थेपत्न्यांग्रपिग्रा
मांतरगतायांमाचार्येणोक्तं॥अथयदिप्रवसतियजमानेपत्न्याःप्रवासनिमित्तंस्यादि
या त्तिसूत्रात्॥पत्न्यांश्रोत्रियोमेपियजमानेपत्न्यपिग्रामंवास्तसीम्नोर्बहिर्गत्वाग्नीनांग्रामा
द्बहिर्नयनेलौकिकत्वंस्यात्॥ ॥पत्नीबंधुत्वेपिस्वाम्नित्वाविशेषेणान्यतरस्यांग्रामांतरग
तायामपिअग्नीनांबहिर्नयनेलौकिकत्वंस्यात्॥यजमानासंनिधौएकस्मामपिग्रामवा राम
स्तसीम्नोर्बहिर्गतायांहोमकालात्सर्वमनागतायामग्नीनांलौकिकत्वंनश्यत्॥अथयदि १५८

यजमानश्चैवपत्नीचोभौत्ववनिष्क्रामतोग्रामांतेग्रामसीमांतेवा वसेतेअग्निहोत्रमेलुप्ये व
त्तावित्यतमग्न्याधेयंकुर्वीतेति बौधायनसूत्रं॥अस्यायमर्थोदीपे॥यजमानः॥पत्नीचा
ग्निसकाशाद्बहिर्गत्वाग्रामवास्तसीम्नोर्बहिर्वसेतांतत्राग्नयोलौकिकाःस्युःएतेषुनिमि
त्तेष्वग्न्याधेयमेवप्रायश्चित्तं॥ ॥यदोभावपिग्रामवास्तसीम्नोर्बहिर्गतौहोमकालात्सर्वमा
ति गतौचेन्नाग्न्याधेयमित्येकेचित्॥अत्रसर्वत्रसूर्यास्तमनोत्तरमुदयोत्तरंचास्तमितेहोमए
वंप्रातरुपोदयंयुषितउदितेवेत्यादिसूत्रद्वयोक्तःसायंप्रातश्चहोमप्रयोगपर्यंतएवमु
ख्यःकालःनपुनःप्रदोषांतोहोमकालःसंगवांतःप्रतरित्याश्वलायनोक्तस्तत्सूत्रस्तौ
तस्यपुनःकालविधानेनगौणत्वावगते स्तथाऽऽतराकृतिकालात्सायमाकृतिकालोनातौ
यादित्यादिबौधायनोक्तस्तस्यसाक्षात्तत्रगौणत्वाभिधानात्॥ ॥यजमानःपत्नीचोभौग्रा

मारूहिर्यावद्धोमकालंवसेतांतदाग्न्याधानंकर्त्तव्यं॥तथाछंदोगपरिशिष्टे॥विहाया ग्नीन्स
भार्यश्चेत्सीमामुल्लंघ्यगच्छति॥होमकालात्ययेतस्यपुनराधानमिष्यतइति॥एषपक्षः
शिष्टैरंगीकृतोनुष्ठीयतेच॥तथाजस्त्रपरत्ने॥केवलपत्न्याःसीम्नोबहिर्गमनेउदयास्त
मयेपुनराधानमुक्तं॥तथाचभारद्वाजः॥यदिपत्नीसीमांतेआदित्येभिनिम्लोचेद
भ्युदियाद्वापुनराधेयंतस्यप्रायश्चित्तमिति॥इदमपिसूत्रंऋषितेयजमानेपत्नीसी
मातिक्रमणविषयमितिकेचिद्वदंति॥उभौत्वेवनिष्क्रमतइत्याचार्यवचनेनविहायाग्नी
नितिछंदोगपरिशिष्टवचनेनचैकार्थत्वायभारद्वाजवचनमुदाहृत्ययजमानपत्न्योःस
हप्रवासंप्रकल्प्येत्यंकं॥॥यावत्योग्राममर्यादानद्यश्चसीमाअतिक्रांतानदीश्चसत्तरंतो राम
अग्नीनरणीवान्वारभेयातां॥यदिनान्वारभेयातांतदजस्राःसमारूढावाग्नयोलौकिका १५९
मं

भवंति॥अशक्तविषयेन्यतरारंभःकर्त्तव्यः॥अन्यतरान्वारंभाऽभावेआधानमेवप्राय
श्चित्तं॥नदीलक्षणंकेचिदृणेयंति॥कूलद्वयांतरालेनदीशब्देननोच्यते॥किंतुतद्देशवत्ये च
वजलसंघोनदीभवेत्॥अष्टौधनुःसहस्राणिनप्रस्रवतियज्जलंनदीशब्दाभिधेयत्व
नतस्येछंतिसूरयः॥एकेननामधेयेनदशयोजनगामियत्॥उदकंतन्नदीशब्दाच्य
मित्यपरेजगुरिति॥॥प्रवासादन्यत्रापि॥विनाग्निभिर्यदापत्नीनदीमंबुनिगामिनीं॥अ
तिक्रामेन्नदग्नीनांविनाशस्यादितिश्रुतिः॥नदीसंतरणेग्रामयोःपरस्परसंक्रमणेसर्व सीम
त्राघंतसीम्नोर्वापत्नीयजमानावग्नीनरणीवान्वारभेयातां॥अनन्वारंभणेग्नीनांलौ
किकत्वंस्यात्तथाचत्रिकांडी॥नदीसंतरणेग्नीनांसीमासंक्रमणेतथा॥सर्वत्राघंतसी
म्नोर्वापत्न्यास्मिन्प्रवासेस्युरग्नयः॥प्रत्यक्षंचारणीह्यरमन्यथाग्निविनाशनं॥आत्मारोपण

पक्षेचनान्वारंभणमिष्यते॥ ॥इत्येतदंतेप्राग्दीपोक्तं॥अत्रत्यः अग्निवद्भुत्वश्राद्धः स्मार्त्ते
एकवत्तेयः।अविकृतमग्न्याधेयंअग्न्याधेयंपुनराधानंपदत्रयस्याप्येकएवार्थः स्मार्त्ते
पुनःसंधानपरोज्ञेयः॥अथत्रिकांडमंडनोक्तान्यग्निनाशनिमित्तानिलिख्यंते।केषुचि
दग्निनाशकेषूक्तेष्वपिपौनरुक्त्यमनादृत्येवतत्तदर्थंदृष्टौकर्त्तृपृथक्त्वेनान्यसंमतमप्यु
च्यते॥ ॥त्रिकांडमंडणे॥अग्निहोत्रेणरहितःपंथानंशततयोजनं॥आहिताग्निःप्रयायी
चेदग्निहोत्रंविनश्यति॥अन्यंस्वयमजुह्वानोदायादृत्विगादिना॥तस्यस्यात्पुनराधेयं
पवित्रेष्टिमथापिवा॥ ॥ऊनेषुपक्षहोमेषुपक्षत्रयमनंतरं॥कर्त्तव्यंपुनराधेयमित्ये
वैतद्विषयकं॥वैधंकाष्ठमनिर्मथ्यप्रागेवाग्न्युदकादिकं॥विन्यस्तेप्यग्निनाशःस्याद्दया राम
स्तमयेसति॥॥नाशेत्रांत्यामथित्वाग्निंप्रवोग्निंयदिपश्यति॥मथितामिंसमारोप्यप्रवो १६०

ग्नौवर्त्तयेक्रियाः।मंत्रंविनासमारूढोरण्येवात्मनिवायदि॥तत्रजूलनशांतिःस्यादसमारूढ
शांतिवत्॥एतस्यैवमर्थः।समारोपमंत्रेणविनासमारोपेकृतेपित्राग्नित्वेनास्तितदापू
र्वंसमारोपार्थंग्नौपुनर्मंत्रेणसमारोपःकर्त्तव्यः॥एतस्यान्यथात्वेग्निनाशः॥अकृतेसमा
रोपेतस्मिन्नग्नौनश्येयथाग्निनाशस्तथात्रापि॥अन्यदपिसमारोपमंत्रेणसमारोपोत्तरमव
रोपमंत्रेणविनासमारोपितसमिदारोपणंकृतंअरणीमंथनंवाकृतंपाणिसमारोपविहितं
वाकृतंतत्रचत्रिघपिनाग्नित्वंतत्रसमिधिदग्धायांनष्टायांवाग्निनाशः॥अंत्ययोःपक्षयो
रुक्तअविधिनाउत्पादितमग्निंसमारोपितमंत्रेणसमारोप्यपुनर्मंत्रेणावरोपःकर्त्तव्यः।अ
त्रार्थेतत्रैवमूलं॥आरूढेपियथाशास्त्रंअवरूढोनशास्त्रतइति याज्ञिकानुष्ठानमप्येव
मेव॥तत्रान्योपिविशेषः॥एवमविधानोत्पादितेग्नौहोमकालद्वयोत्तरंतृतीयेहोमकालेप्रा

नेतस्यअकृतप्रायश्चित्तायपुनराधानंकर्त्तव्यं॥तदुक्तंतत्रैवतृतीयेहोमकालेतुसंप्राप्तेयु
नराहितिः॥ ॥अत्रविशेषः प्रायश्चित्तपरीपे॥अग्निहोत्रेषुविधानेनोत्पा
दितेष्वकृतप्रायश्चित्ताकरणेसतिहूयमानेष्वग्निहोत्रे
ष्वग्निहोत्रहोमकालादूर्ध्वंअकृतसमत्वात्पुराधानंकर्त्तव्यं॥चतूरात्रमहूयमा
नोग्निर्लौकिकःसंपद्यतइतिवचनात्॥अष्टमाग्निहोत्रकालात्पूर्वमेवान्यथाकृ
तमितिज्ञातंचेद्विधानेनाग्निमुत्साद्यथोक्तंप्रायश्चित्तंकृत्वाकृतानामग्निहो
त्रानामकृतप्रायत्वाद्धोमकालविछेदप्रायश्चित्तंमनस्वतीकृत्वाप्रतिहोमंचकु
र्यादित्यकृक्तः॥अत्राश्वलायनीयानांयदित्यपशाम्येत्पल्युपवसेदित्येकेएतस्मि
न्नवरुद्धोगृहीतोपिवानश्येद्दशरात्रमतिक्रांतस्तनऊर्ध्वयाक्रिययापश्चाद्गृहीतो

भवतीतिलिखनाद्विधानेनोत्पादितेपिहूयमानेयोपासनहोमेद्वादशरात्रा
दूर्ध्वंअकृतसमत्वात्पुनःसंधानंकर्त्तव्यं।द्वादशादिनहोमकालात्पूर्वमेवान्यथाकृतमितिज्ञातंचे
द्विधानेनाग्निमुत्साद्यथोक्तंप्रायश्चित्तंकृत्वाकृतानामयोपासनहोमानामकृतप्रा
यत्वाद्धोमकालविछेदप्रायश्चित्तंअनुक्त्वासर्वप्रायश्चित्तंअथवानुक्तमन्यतोग्राह्य
मितिवचनाद्धोधायनोक्तंमनस्वतीतदीयपाठेनैवकृत्वाहोमविछेदप्रायश्चित्तंमनस्वतीं
स्वकीयपाठेनचतुर्गृहीतेनजुहुयात्प्रतिहोममेकइत्युक्त्वाप्रतिहोमाअत्रकृताः।अत्रा
ग्न्युत्सादनादिप्रायश्चित्तप्रकारोग्नेप्रायश्चित्त प्रकरणेवक्ष्यतेपुनस्त्रिकांड्यां।भार्यायां
प्रोषितायांचेदुदेत्यकोसमेनिवा।तत्रस्यात्पुनराधेयमन्येत्याहुरिहान्यथा।ज्येष्ठाचेदग्नि
संयुक्तागछेत्स्वन्यायथारुचि।यजमानेनसहितायद्वातएवकेवलाः।एकस्यामप्यतिष्ठं

१६२ स्यामग्निहोत्रसमीपतः॥पतिस्तिष्ठतिचेदग्निनाशोनेत्यपरेविदुः॥अन्येग्रामांतरंगत्वान
त्वनुक्रममात्रतः॥सीमांतातिक्रमादेवकेवलान्नाशमब्रुवन्॥यदोभार्यात्यतिक्रम्यसीमां
प्रत्यागतोपुनः॥उदयास्तमयात्पूर्वंनानाशोत्रेतिकेचन॥अत्रप्रायःपेयवमे वोक्तं॥पु
नस्त्रिरांग्रामेव॥छंदोगपरिशिष्टोक्तहोमकालात्ययेनरः॥सीमातिक्रांतयोर्नश्येन्नो
दयास्तमयादिति॥विनाग्निभिर्यदापत्नीनदीमंबुधिगामिनी॥अतिक्रामेन्नदाग्नीनां
विनाशःस्यादितिश्रुतिः॥तदासीमामतिक्रामेद्विनाभर्त्राग्निभिःसह॥तत्रनाशंपरे
त्याहुर्भर्याद्यानेनदुष्यति॥किंतुसाग्निर्विनाभर्त्रागत्वासंस्कृतसर्पिषा॥हावयेच्चतु
रात्तेनप्राप्तेदेशेमनस्वती॥सायंप्रातस्तनोहोमावेवंस्याद्गमनेन्वहं॥वास्तोष्पतीय
होमेज्याभवत्यत्राप्यशेषतः॥आपद्यपिविनष्टायांविनापत्नीनरांतरैः॥सीमातिक्रम १६२

णेग्नीनांनकथंचिदनुग्रहः॥प्रत्यक्षेणनयन्नग्नीनुच्छ्वासश्चेद्विनश्यति॥यदिवानुच्छ्वस
न्हृत्वानिधायोच्छ्वसतेपुनः॥हरेदनुच्छ्वसन्नेवनश्येत्त्रिर्हरणेनच॥शकटेनातिदूरंवाह
रेद्देशंयथाविधि॥स्वांगेनैवाथवाशय्यापरासात्प्राङ्नयेच्छ्वसन्॥कर्मार्थंहरणेग्नीनां
नानुच्छ्वासादिचोद्यते॥नदीसंतरणेग्नीनांसीमातिक्रमणेतथा॥सर्वत्राद्यंतसीम्नोर्वा
स्वामिस्पृष्टाःस्युरग्नयः॥प्रत्यक्षमरणिद्वारंचान्यथाग्निविनाशनं॥आत्मारोपणपक्षे
नुनान्वारंभणमिष्यते॥नक्ष्याप्यारंभणंकेचिल्लोगाक्ष्यर्थनिबंधनात्॥जलेनहेतुनावद्धि
रुपस्रंतोयदाभवेत्॥कर्तव्यंपुनराधेयंयत्नपार्श्वेनिरूपितं॥तदेवपुनराधेयमग्नाव
नुगतसति॥असमाधायचेत्स्वामीसीमामुल्लंघ्यगच्छति॥असमाधानमुपस्थान
मितिप्रागेवोक्तं॥श्वसूकरखरोष्ट्राजैःकुक्कुटमर्कटश्वभिः॥अन्यैश्चपात

किंभिः कुणपैर्वास्तिकयापिरजस्वलयावा॥रेतोमूत्रपुरीषैर्वापूयाश्रुश्लेष्मभिर्वा
तैः॥दुष्टास्थिमांसमज्जाभिरन्यैर्वानिजुगुप्सितैः॥आरोपितारणिस्पर्शैर्भूतेप्रेतस्पर्शै
नेपिवा॥आत्मारूढेषुमज्जेद्वादेहापतितादिभिः॥अथवायोषितंगच्छेदृतौका
ममोहितः॥वदंत्येषुनिमित्तेषुकेचिदग्निविनाशनं॥तत्रारणिगतेवह्नौदुष्टस्यासुन
राहितिः॥पुनराहितिःपुनराधानं॥इतरेषुनिमित्तेषुलक्ष्याधेयंप्रचक्षते॥अग्न्या
धेयंपुनराधेयं॥तेनस्मार्ते पुनःसंधानं॥यद्वासर्वोपघातेषुनस्त्वितिसमिंधनं॥द्रव्य पु
स्थाग्न्युपघातेतुद्रव्यशुद्धि समिंधने॥इतित्रिकांडमंडनोक्तानि॥ ॥इदानींकानि
चित्संग्रहोक्तानिलिख्यंते॥ ॥अग्नावनुगतेयस्यहोमकालद्वयंव्रजेत्॥उभयो
र्विप्रवासेवालोकिकोग्निर्विधीयते॥इतियज्ञपार्श्वशोनकयोर्वचनार्हंतत्प्रायेण १६३

वृत्तिकारस्यासंमतं॥गृहीतोपिवानष्टोद्वादशरात्रमतिक्रांतस्तत्रउक्तयाक्रिययापश्चाद्गृ
हीतोभवतीतिवृत्ताउक्त्वात्॥एतदीयोविशेषोग्न्यनुगमनप्रायश्चित्तस्थलेवक्ष्यते॥
अतोविनासमारूढऊर्ध्वंशय्यापरासनात्॥हृतोग्निर्लौकिकोज्ञेयःश्रुतौसर्वत्रदर्शना
त्॥कुरुक्षेत्रादितीर्थानांगमनेदेशविप्लवे॥समारोपंविनैवाग्निंनोद्वहेयुर्विपश्चितः॥आ
रोप्याग्नीनरण्योःस्वानुदवस्येत्सहाग्निभिः॥त्रिक्ष्येनोद्वाहयेदग्नीन्पुनराधानमर्हति॥ज्ये
ष्ठाचेद्वहुभार्यस्यह्यतीचारेणगच्छति॥पुनराधानमत्रैकेदृष्टंतिनतुस्मरयः॥विनाग्नि
र्यः पूर्वमुक्तंतत्॥पत्न्यंतरेथवापत्योहुताशनसमीपगे॥तदापत्नीयथाकाममतिक्रामे
न्नदीमपि॥पत्नीसीमामतिक्रांतायजमानोगृहेयदि॥आहोमाद्यदिनागच्छेत्पुनराधा
नमर्हति॥बो० एकत्री॥एकाकिनीयदापत्नीवह्नीनादायगच्छति॥तत्रनाशोपरेत्याद्युर्भ

याधानेनदुष्यति॥रजोदोषेसमुत्पन्नेसूतकेमृतकेपिवा॥प्रवसन्नग्निमान्विप्रःपुन
राधानमर्हति॥बह्वीनामपिचैकस्यामुद्वाह्यायांनतुत्रजेत्॥एतादृशेचतुर्थेङ्गंतुमिच्छ
न्निमित्ततः॥त्रयीमुक्त्वातुयोलोभात्सवसेत्सर्वसंधिषु॥त्रयीमग्नित्रयं॥नविनाचनिमि
त्तेनक्रीडाद्यर्थेनतुव्रजेत्॥पूर्वमन्वारंभणमुक्तेलोगाक्षिमतेतदभावोप्ययुक्तवि
कल्पःप्राप्तस्तत्रविशेषःसः॥उद्वाह्याचेद्गवेत्पत्नीप्रसूताप्रवसत्यपि॥अन्वारंभवि
कल्पत्वात्पुनराधि र्नतन्मतात्॥ज्येष्ठाचान्वारभेतैववबहुभार्यस्यनेतराः॥नरुच्चैका
किनीपत्नीप्रयायादग्निभिःसह॥राष्ट्रभृंगादिसंप्राप्तावुचितंयानमीदृशं॥अन्यथा
हिप्रवसंत्यांवह्नयोलोकिकाःखलु॥राष्ट्रभृंगादिगमनेग्नेर्देशेमनस्विनी॥जुहु
याच्चतुरात्तेनस्मार्तेग्नौसर्वसंज्ञिके॥सायंप्रातर्हुनेत्सर्वमेवंस्याद्गमनेन्यहं॥ हो १६४

मद्यात्ययेदर्शेपूर्णमासत्ययेतथा॥पुनरेवाग्निमादध्यादितिभागैवशासनमितीदंय
त्तदाश्वलायनीयानामसंमतंनित्यहोमेत्वतिक्रांतेसंस्कृताज्यंचतुर्गृहीतमाहादर्शादि
नान्मनस्वत्याजुह्वयादितिकारिकायामुक्त्वात्तदूर्ध्वंविच्छिद्यैतन्नत्वित्युक्त्वादर्शपूर्ण
मासात्ययेपाग्निकृतचरोरुन्नानाच्च॥ ॥पचनाग्नौपचेदन्नंसूतकेपिवा॥अपक्वंतु मृतके
वसेद्यत्रिंपुनराधानमर्हती तीदंप्रायेणकात्यायनादिविषयकंनपुनराश्वलाय
नीयकसूत्रकारिकादावनुक्त्वाकात्यायनादीनामेवंविधानुष्ठानदर्शनाच्च॥भार्या
यांप्रोषितायांचेदित्यादिपूर्वमुक्तंतत्रपत्न्याःप्रवासविषये पुनराधिरुदाहृता॥वाक्यैमे
नीषिभिःप्रोक्तैरेकभार्यस्यसेष्यते॥बहुभार्यस्यज्येष्ठाचेत्स्ववसेत्पुनराहितिः॥ ॥
अथकारिकोक्तं॥तृतीयप्रभृतीनांतुपर्वणामतिपातने॥पुनराधेयमिच्छंतिकेचि

ऽत्यविदोजनाः॥अत्रमेंगौद्यांकेचिदृत्यपदात्पर्वद्वयात्ययेपिपुनराधेयंउक्तं॥तन्नि
र्मूलमन्यशाखीयंवातत्रैवकारिकायामुभयातिक्रमेकार्यश्वरुःपथिहुतोभवेदित्य
क्त्वात्प्रजापतिवचनेनपर्वद्वयातिक्रमेऽर्द्धछ्छ्रायश्चित्तान्नानात्वसूत्रेआपस्तं
बसूत्रेचदर्शपूर्णमासात्यपेपाग्निहुतचरोरन्नानाच्च॥केचित्पदस्यैवमर्थः॥पर्वत्रयातिक्र
मेकेचिदग्निनाशमिच्छंतिकेचिन्न॥॥कारिकायामेवसमारूढसमिन्नाशेपुनराधेयमि य
ष्यतइति॥॥इत्यारडोप नामकनारायणभट्टकृतेप्रयोगसागरेगृह्याग्निनाशक
निमित्तनिरूपणं॥७॥येनकेनापिनिमित्तेनाग्निनाशेजातेसतिनिमित्तानंतरमेवोक्त शे
प्रकारेणाग्निनाशप्रायश्चित्तंपुनःसंधानंवायद्यद्विहितंतत्तत्कर्त्तव्यंतत्रकालोनवे राम
क्षणः॥अग्निविच्छेदकालगणनयास्मृत्यक्तप्राजापत्यादिप्रायश्चित्तंचकुर्याद्धोमयद्रव्यं १६५

चदद्या दित्यक्तंप्रागेव॥॥विध्यपराधेप्रायश्चित्तमितिसूत्रादनुक्तमन्यतोग्राह्यमिति
वचनादप्रायश्चित्तकोयज्ञोयसुरैःसंप्रभुज्यतइतिबोधायनीयसूत्राच्चसूत्रवृत्तिका
रिकाभ्यआपस्तंबबौधायनसूत्रादिभ्यश्चविच्यकानिचित्प्रायश्चित्तानिलिख्यंते॥ वि
तत्रविध्यपराधेप्रायश्चित्तिरित्याश्व लायनसूत्रं॥एतद्याख्यादिकंआपस्तंबीयभाष्या
मुक्तं॥तदेवविधिशब्देनविहितमुच्यतेविहितस्याकरणेअन्यथाकरणेचप्रायश्चित्तिः
कर्त्तव्या॥प्रायोविनाशेश्चितिःसंधानंविनष्टसंधानंप्रायश्चित्तिरितिसूक्तंभवति॥तथा
चविध्यपराधेसतिविहितमस्तिचेत्तदेवकर्त्तव्यंनास्तिचेद्याहुतिहोमःकर्त्तव्यः॥एतदे
वभूर्भुवस्वःस्वाहेत्येवंरूपंसर्वप्रायश्चित्तमुच्यते॥एवंचसतियथाकथंचिद्विधिसंपा
दनेप्रायश्चित्ताभावउक्तोभवति॥प्रायश्चित्तकालस्तुनिमित्तानंतरमेवेत्यलंगेः॥

विहितस्यद्रव्यस्यस्वरूपतोऽभावेप्रतिनिधिःस्वीकार्यः।क्वचित्स्वरूपसत्तायामपिप्रकृ
तकार्यशक्तौप्रतिनिधिरेवस्वीकार्यः॥तथाचार्यद्रव्ययोर्विरोधेऽर्थोबलीयानितिसू
चितंभवति॥इदंचापरंसामर्थ्येसतिगुणसंपादनार्थेनप्रतिनिधिरुपोदातव्यः॥द्रव्य
गुणविरोधेद्रव्यंबलवत्॥एतदुक्तंभवतियत्कार्यार्थतयायद्विहितंतस्यतत्कार्यो
शक्तौतत्प्रतिनिधिरूपंतत्कार्यकरणायस्वीकर्त्तव्यं॥तत्रसएवविध्यर्थःफलितोभ
वतीति॥तथाविनष्टसंधानंद्विविधंप्रत्यक्षमतीन्द्रियंच॥तत्राद्यंयथा॥आयतनाद
पगतस्यवक्रेःपुनःस्थानं॥स्कन्नस्यवाहविषोग्रहणयोग्यस्यपुनर्ग्रहणं॥द्वितीयंतुहो
मजपादिभिः॥यत्रातीन्द्रियेसंधानेहोमादिनविहितंतत्रसर्वप्रायश्चित्तमवश्यंकर्त्त राम
व्यमितिवृत्तिकृदुक्तंयेनीतिः॥ ॥स्थालीपाकंजुहुयाद्दधिसक्तून्जुहोतीत्यादिदृष्टद्रव्ये १६६

तेनतेनहोमः॥अंजलिनाजुहुयाच्छूर्पेणेत्यादिदृष्टेनतेनहोमः॥इध्मादेशेआज्यं
द्रव्यंअनुक्तसाधनेस्रुवःसाधनंयद्देवाऋचान्त्र्याजुहुयाच्चस्रुवाकृतिमित्यादिदृष्टे
कर्त्तरितेनतेनहोतव्यं॥अनादिदृष्टेकर्त्तरिब्रह्माभावेयजमानएवजुहुयात्॥स्मार्त्ते
कर्मणिअनादेशेस्वयंकर्त्तृकृत्वाद्यजमानस्तूजुहुयाद्ब्रह्माभावस्रुवाकृतिमित्यु
क्तत्वाच्च॥यत्रयत्रग्रहणोक्तिस्तत्रतत्रग्रहणसंख्ययादायजुहुयात्।चतुर्गृहीतेन
क्षादशगृहीतेनेत्यादि ग्रहणसंख्ययोक्तिः॥अनादिष्टग्रहणसंख्यास्थानेस्रुवगृही
तेनैवहोमः॥ ॥एवंविचार्यविलोक्यप्रारब्धंकरिष्यमाणंवाकर्मयथासांगफलदंच
भवतितथाकर्त्तव्यं॥तत्रवस्य माणेप्रायश्चित्तादौविधानयागात्पूर्वमुत्तरंवाहवि
र्दीक्षादावित्यादिदृष्टेषुसर्वत्रयागशेषेनअग्नयइदंनममअग्नीषोमाभ्यामिदंनमम सू

र्यायेत्येवंरूपोयाग ३ ऋतेदेवतोद्देशेनद्रव्यत्यागोयागइतिमीमांसकानांसिद्धांतात्॥
याज्ञिकानुष्ठानमप्येवमेव॥एतादृशेयागेदेवतोद्देशेनत्यक्तस्यद्रव्यस्यया गोपक्षेपःस
एवहोमोयागोपलक्षकः॥तस्मिन्यागोपलक्षकेहोमेयेनमंत्रेणहोमःक्रियतेतत्समत्र
स्यहोमागत्वंनपुनःप्रधानत्वं॥अतएववत्सादिसर्वश्रौतग्रंथेषुआग्नेययुरोडाशादा
ग्नेययाज्यानुवाक्याभ्यांहोमेकृतेपिअग्नीषोमाभ्यामिदं नममेत्येवंरूपेत्यागेकृतेस
न त्तिसो ग्नीषोमीयंक यागोभवतिनपुरोग्नेययागः॥इदंसर्वंश्रौतसूत्रतत्तीये ध्यायेअथा
ग्नेय्यऽष्टयऽतिखंडसूत्रेदेवतेअनुवाक्येएतस्मिन्स्थलेसएवं॥अन्येष्वपिश्रौतसूत्र
व ग्रंथेष्वेवमेव।तस्मात्सर्वत्राप्यनेनैवन्यायेनयस्मै देवतायैहूयतेतत्साअन्यस्यैवदेवता राम
यैत्यज्ञप्तेः॥अथवाकस्याअपिभ्रमादज्ञानाद्धानस्यज्ञप्तेएतादृशेसर्वत्रापिस्थलेकेवलेन १६७

होममात्रेणैवसयागोनभवतिनत्रसर्वत्रतत्रत्रोक्तप्रकारेणपुनर्यागः॥तत्रत्यहोमांगेमं
त्रेविगुणेसति सम्यक्कृतेनत्यागेनजातेयागेनत्रपुनःपाठादिप्रायश्चित्तेनैवसिद्धिःन
पुनर्होमांगमंत्रविगुणत्वात्पुनरव दानादिरूपायागावृत्तिः॥प्रधानस्यावैगुण्यात्॥गुणा
नुरोधेनप्रधानावृत्तिरन्यायेतिन्यायात्र॥उक्तगुणकेनमंत्रेणोक्तगुणकेनद्रव्यादिनावा
कृतेपिहोमेत्यागेवैगुण्येसतिपुनस्तेनैवमंत्रेण द्रव्यादिनाचपुनर्मंत्रहोमादिगुणो
पेतोयागआवर्त्तनीयः॥प्रतिप्रधानंगुणावृत्तिरितिन्यायात्॥एतादृशस्यप्रधानयाग
स्यअग्निसमिंधनार्थेमन्त्राधानेध्माहरणाद्यंगंआज्यभागादिहोमरूपमितिच॥ ॥
तदंगजानंद्विविधं॥अंगाङ्गोपकारकंसन्निपत्योपकारकंच॥तत्राराङ्गोपकारकस्यांग
स्यलोपेकर्मसमाप्तेःप्राक्प्रायश्चित्तंविधायतत्तदंगंकुर्यात्॥कर्मसमाप्तौप्रायश्चित्त

मेवनोगृहृत्तिः॥सन्निपत्योपकारस्यद्रव्यसंस्काररूपस्यलोपेप्रधाननिष्पन्नेःप्राक्स
र्वस्याधिकरणं॥प्रधानयागोत्तरंप्रायश्चित्तमेवनाहृत्तिः॥ ॥कर्ममध्येपतितानिप्राय
श्चित्तानिसंस्कृताज्येनकर्त्तव्यानि॥तदभावेस्मार्त्तेवदाज्यसंस्कारःस्रुक्स्रुवसंमा
र्गश्चपरिसमूहनपरिस्तरणपर्युक्षणानितंत्रानंतःपातिप्रायश्चित्तेकर्त्तव्यानीतिके
चित्॥ ॥तत्रस्मार्त्तेवदाज्यसंस्कारएवं॥अमुकनिमित्तंप्रायश्चित्तंकरिष्यइतिसंक
ल्याग्निंप्रज्वाल्यपरिसमूह्यपरिस्तीर्यपर्युक्ष्यसपवित्रेआज्यपात्रेआज्यमानीयोद
गंगारेणाधिश्रित्योल्मुकेनावज्वाल्यदर्भाग्रेणप्रत्यस्यत्रिःपर्येग्निकृत्वोल्मुकंनिरस्याज्य
पात्रेआज्यमानीयसवितुष्टेत्यपवित्रेणोष्मानंक्षिपेदग्नेःपश्चादाज्यंसंस्थाप्यस्रुक्स्रु
वौसंमृज्यस्रुवश्चेत्स्रुवमेवतदुक्तंप्रायश्चित्तंकृत्वापरिस्तरणान्तेस्रुचस्पर्युह्यपर्युक्ष्य

वि

विसुत्सरणंच॥ ॥अथाग्नीनामुद्धरणस्यकालः॥पुरादित्यास्तमयात्पुरादित्यस्योदयादिति
बौधायनाचार्येणोक्त्वाहिद्धरणानंतरमस्तमयोदयौयथाभवतस्तथाविहरेत्॥अधि
वृक्षसूर्यआविःसूर्यवेत्यापस्तंबेनोक्तं॥उदयास्तमयात्पूर्वंउद्धरणस्यकालः॥ ॥उद्धरण
कालःसएवप्राडुद्धरणस्येत्येवगम्यते॥यथाश्वलायनसूत्रवृत्तौतूत्सर्गेपराह्णेगार्ह
पत्यंप्रज्वाल्येत्यत्रापिपराह्ण शब्देनाद्यचतुर्थोभागोगृह्यतेविहरणकालेत्वेनंगार्हपत्यं
प्राडुद्धृत्यप्रज्वाल्येत्येवेतुक्तं॥तस्याग्निहोत्रेणप्राडुद्धरणहोमकालोव्याख्यातो॥इत्य
त्रप्राडुद्धरणकालः॥अपराह्णेगार्हपत्यंप्रज्वाल्येत्यनेनव्याख्यातेएवंप्रातर्वीक्षायामु
पस्युदितायामादित्योदयात्तस्मिन्कालेसर्वशाखाप्रत्ययमेकंकर्मेतिवचनाद्बौधायनो
क्तेआपस्तंबोक्तेवाकालेग्नेःप्राडुद्धरणंकार्यं॥प्राडुद्धरणंप्रबोधनं॥तदकरणेसर्वं

प्रायश्चित्तंकार्य्यं॥प्रायश्चित्तविशेषानाम्नात्॥उद्धरणतुल्यत्वादनुद्धरणप्रायश्चित्तं
वाकार्य्यं।नच्चएषत्तेनकर्त्तव्यंहोमेनसहवाकर्त्तव्यं॥होमेसहपक्षेप्रयोगः॥होमकाले
प्राउद्धरणाकरणनिमित्तप्रायश्चित्तपूर्वकंसायंप्रातर्वीहोमंकरिष्यइतिसंकल्प्यहो
मद्रव्यसंस्कारात्पूर्वंसंस्कृताज्येनसर्वप्रायश्चित्तंस्रुवेणहुत्वाहोमद्रव्यसंस्कारादिप्रा
क्तहोमंसमापयेत्॥ ॥अथवाअथैकेषांयस्याग्निमनु हृतंसूर्योभिनिम्नोचेदभ्युदिया
द्यामनोज्योतिर्जुषतांत्रयस्त्रिंशत्तंतवइतिद्वेचतुर्गृहीतेजुहुयादित्यापस्तंबसूत्रात्
मनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञंसमिमंदधातुविराट्छन्दउषसोनिम्नुचश्चतास्सं
दधामिहविषाघृतेनस्वाहामनसेज्योतिषेदंत्रय स्त्रिंशत्तंतवोयेवित स्त्रिरेयइमंयज्ञं
स्वधयाददंते॥तेषांछिन्नंप्रत्येतद्धामिस्वाहाधर्मोदेवांश्चाप्येतुस्वाहा॥देवेभ्यइदंएवं

वाहुत्वापूर्ववत्कुर्यात्॥ ॥दीपे॥अग्निहोत्रहोमस्योदयानंतरमस्तमयानंतरंचमुख्यः सा
यंप्रदोषांतःप्रातःसंगवांतोवामुख्यःकालः॥सायंहोमस्यनिशासर्वागौणःकालःप्रातर्हो
मस्यसर्वमह गौणःकालः॥आप्रातराहुतीकालात्सायमाहुतिकालोनातीयादासायमा
हुतिकालात्प्रातराहुतिकालइतिबौधायनसूत्रं॥आपत्सुगौणकालेपिकुर्वन्नायश्चित्तं
नाचरेत्॥अनापदिगौणकालेनकुर्यात्॥कुर्याच्चेद्यथोक्तंप्रायश्चित्तंकुर्यात्॥रजन्याः
सायंचतुर्थोभागःप्रदोषः।दिवसस्याद्यश्चतुर्थोभागःसंगवः।इतिदीपोक्तं॥ ॥अस्त
मितेहोमः इत्याश्वलायनसूत्रं॥अस्तमितेहोमःकर्त्तव्यःअंगान्यपिप्रधानकालएव
कर्त्तव्यानियतुनरंगंविहरणंस्वकालविशिष्टंतत्स्वकालएवकर्त्तव्यं॥विहरणशब्देनात्र
प्राउद्धरणंएवंप्रातरुपोदयंव्युपितउदितेवा॥उपोदयमादित्योदयसमीपइत्यर्थः॥उ

दितेआदित्येआदित्यमंडलेकृत्स्नउदितइत्यर्थः॥एतेत्रयःप्रातर्होमप्रधानकालाः॥ ॥
तत्रयद्युपोदयमुदितइत्यूच्यतेउदितआदित्येसत्कृदयसमीपइतिद्वाभ्यामेकएवका
लोविहितःस्यात्तज्ज्ञापनिमित्तार्थंत्वृषितशब्दार्थंपूर्वमुपोदयशब्दंपठितवानाचार्यः।
एतेषुत्रिषुकालेषुप्रधानंयथासंपद्यतेतथांगानामेवोत्कर्षोद्रष्टव्यः॥प्रदोषांतोहोम
कालःसंगवांतःप्रातरित्यत्रप्रदोषांतोनामकश्चित्तोर्थःअष्टोनाडिकाःसंगवांतःप्रा
तरित्यत्रदशनाडिकाइत्यर्थः॥अस्तमितेउदितेचविहितोहोमएतावतिकालेक्रियमा ते
णेऽतीतकालोनभवतीतिपुनःपुनःकालविधिः।तमतिनीयचतुर्गृहीतमाज्यंजुहु
यादित्यत्रउक्तहोमकालातिक्रमेप्रायश्चित्तंस्वसूत्रोक्तंऔपासनप्रयोगस्थलेलिखि राम
तंबौधायनसूत्रोक्तंवाकुर्यात्॥तत्रस्वसूत्रेयदिसायंदोषावस्तर्नमःस्वाहेतियदिप्रातः १७०

प्रातर्वस्तर्न्नमःस्वाहेति॥॥अत्रैवंप्रयोगः॥॥उक्तकालातिक्रमनिमित्तप्रायश्चित्तपूर्वं
कसायमौपासनहोमंकरिष्येइतिसंकल्प्यहोमद्रव्यसंस्कारात्पूर्वंस्मार्त्तंवराज्यंसंस्कृत्य
स्रुक्स्रुवौसंमृज्यदर्व्योचतुर्गृहीत्वादोषावस्तर्नमःस्वाहाअग्नयइदंनममहौम्यसंस्कारा
दिहोमंसमापयेत्॥एवंप्रातरुक्तकालातिक्रमनि०प्रातरौ०पूर्ववच्चतुर्गृहीत्वाप्रातर्व
स्तर्नमः स्वाहाग्नयइदंनमम॥पूर्ववद्धोमंसमापयेत्॥बौधायनसूत्रोक्तंकालातिक्र
न मप्रायश्चित्तंप्रयोगस्थलेएवोक्तं॥॥यद्यस्तमितेस्तमितभ्रांत्याग्निहोत्रंजुहोत्यकाले
हुतस्याहुतसमत्वात्तस्मिन्नेवाग्नौसांगोहोमःकर्त्तव्यः।प्राङ्निष्करणस्यकालेहुतत्वान्नपुन
स्तत्॥॥होमानंतरंयजमानोभवतन्नः समनसौस मोकसावरेपसौ॥मायज्ञंसिष्टमा हि २
यज्ञपतिंजातवेदसौशिवोभवतमग्नेऽत्यग्निमुपतिष्ठते॥यदिप्रातरुदयात्पूर्वमुदित

भ्रांत्याचेदेवमेवप्रायश्चित्तं दीपो ऋंइदं०॥अत्रापस्तंबसूत्रं।यदिप्रागस्तमयाज्जुहु
यात्पुनरेवास्तमितेहुत्वाभवतन्नःसमनसाविल्पतिष्ठेनेति॥ ॥प्राङुक्करणादूर्ध्वंहो
मात्पूर्वंयदियजमानोग्नीयाद्यक्षयेद्यातस्मिन्नेवाग्नौयत्तेवयंपुरुषत्रायविष्ठाविद्वांस
श्चरुमाक च्चनागः॥ कृधीस्मान्अदितेरनागान्येनाꣳसिशिश्रथोविष्वग्ग्ने स्वाहा
नायजत्राः। यथाहतद्वसवोगौर्यंचि त्यदिषितामभुंचएवात्वेमत्प्रमुंचाव्यꣳहःप्रतार्यग्नेप म
तरान्नआयुःस्वाहा॥ द्वेस्रुवाहुतीजुहुयात्॥उभयत्रापग्नयेस्विष्टकृतइदंनमम॥
समिधावादध्याद्या॥ ऋचोजपेत्॥उपसमिधनादूर्ध्वंसायमहुतेग्निहोत्रेनाग्नीयादि राम
तिकात्यायनवचनात्॥दीपानुसारेणेदमुक्तं॥अत्रापस्तंबसूत्रंअहुतेष्वग्निषुयज १७१
मानोग्नीयाद्यत्तेवयंयथाहतदित्याहुतीजुहुयात्समिधोवादध्याज्जपेदित्येकइति।

येनकेनचिन्निमित्तेनप्रातर्होमोनलब्धश्चेत्तदानस्मिन्दिभोजनंस्यजेत्तथासायंहोमो
नलब्धश्चेत्तसांरात्रौभोजनंस्यजेत्अत्रैतावद्देवप्रायश्चित्तं॥ ॥अत्रत्रिकांडी॥सा
यंहोमोनलब्धश्चेत्तसांरात्रावभोजनं॥प्रातर्होमोनलब्धश्चेत्तदहर्भोजनंस्यजेत्
॥तावताहोमसिद्धिःस्यान्नतत्रायश्चित्तमित्यनेनछंदोगानांहिकेषांचिदूह्येकथित।
मीदृशमिति॥प्राय०दीपेप्येवमेव॥ ॥अग्न्यनुगमनोत्तरमविधानेनाग्नावुत्पादिते
उक्तप्रायश्चित्ताकरणेसतिहूयमानेपिऔपासनहोमेद्वादशदिनहोमकालादूर्ध्वंअ
कृतसमत्वात्पुनःसंधानंकर्त्तव्यं॥आद्वादशदिनादेवमूर्ध्वंविच्छिद्यतेनलक्षतिकारि
कावचनात्॥द्वादशदिनात्पूर्वंमेवान्यथाकृतमितिज्ञातंचेद्विधानेनाग्निमुत्पाद्य
यथोक्तप्रायश्चित्तंकृत्वाकृतानामौपासनहोमानामकृतप्रायत्वाद्धोमविच्छेदप्राय

श्चित्तंमनस्वतींकृत्वाप्रतिहोमंकुर्यान्नवा प्रतिहोममेकेऽतिसन्धाय।इदंसर्वं
बौधायनदीपानुसारेणोक्तंतत्रचनूरात्रमरूयमानोऽग्निर्लौकिकःसंपद्यतइतिस्थितेअ
त्रस्मृत्यर्थकारिकायांआह।दश दिनादित्युक्तोविशेषःसोत्रलिखितःसनुसङ्क्षिप्तोऽ
वा मुक्तौविचारणीयः॥॥औपासनहोमेहयोराकृत्योःसंसर्गेजातेसतियत्रवेत्तत्रवनस्पतेदे
वानांगुह्यानामानि।।तत्रहव्यानिगामयेतिसमिधमाधायइत्येतत्प्रायश्चित्तं।।अत्रापत्ते
वसूत्रं।यदिवोत्तरयापूर्वमभिजुहुयाद्यत्रवेत्थ॰गामयेतिवानस्यत्ययर्चासमिधमा
धायेति॥॥पूर्वस्यामाकृत्यांकृतायामुत्तराकृतिस्कंदनेप्येतदेवप्रायश्चित्तं।।यदिपूर्वस्या
माकृत्यांकृतायामुत्तराकृतिस्कंदेदितिसूत्रं॥॥यत्नंविना स्वयमेवप्रज्वालितेग्नौ राम
वक्ष्यमाणंकारिकोक्तंप्रायश्चित्तंज्ञेयं॥॥होमविषयेसमारूढेग्नौनप्राङ्प्रकरणप्राय १७२

श्चित्तंअग्निषुसमारूढेषुअनुद्धरणप्रायश्चित्तंनेष्यतेऽतिदीपेउक्त्वाऽनुद्धरणतुल्यंप्रा
ङ्प्रकरणमितिपूर्वोक्तं॥॥सर्वत्रसमारोपेकृतेसतिअवरोपोत्तरंहोमकालेसमारोपनिमित्तंप्रायश्चित्तंबोधायनमतान्मनस्वतींकृत्वाकालप्राप्तंहोमंकुर्यान्न॥॥होमविषयेअनापदिपक्षहोमकरणेअग्नयेतंतुमतेस्थालीपाकमश्रुतोपूर्णाहुतिंवाजुहुयादित्येतत्प्रायश्चित्तं॥अनापदिपक्षहोमकरणंतंतुमतीष्टिःप्रायश्चित्तमितिदीपेउक्तत्वात्॥॥आत्मारोपपक्षेयेनियमाःप्रागुक्तास्तत्रमज्जनमैथुनेविहायअन्यनियमातिक्रमेमनस्वतींमंत्रजपःप्रायश्चित्तमुक्तंदीपे॥॥मज्जनमैथुनकरणेत्वग्निनाशःप्रागेवोक्तस्तत्रपुनःसंधानंप्रायश्चित्तं॥॥अग्नेरन्येनाग्निना संसर्गेवक्ष्यमाणकारिकोक्तंप्रायश्चित्तंज्ञ

यो।तत्रविशेषोवौधायनमतात्केवलंपरस्परंसंसर्गेमतखल्वेवप्रायश्चित्तमि
त्यत्रैंदीपे॥अग्नीनांविष्ठादिष्टिरल्पोपहतौयेनकेनापिकारणेनाग्नीनांदो
र्बल्येसतिसमारोप्यमग्नि त्वात्रिहविःपवमानेष्टिकर्त्तव्येतिदीपेउक्तत्वादग्न
विष्ठायुपहतौअग्नयेपवमानायाग्नयेपावकायाग्नयेशुचयेइतिमधा
नदेवतात्रयस्थेकःस्थालीपाकःपूर्णाहुतित्रयंवप्रायश्चित्तंकुर्यात॥॥सर्वत्रा
ग्नेरल्पोपहतौपुनस्त्वेतिसमिदाधानमेव नस्तुवाहुति रि त्यत्रैकारि
काप्रकरणोक्तस्थलेवक्ष्यते॥॥यजमानःपत्नीवाग्नीन्विहायसंवत्सरम
तिक्रम्यप्रव सेयदितदातयोःपवित्रेष्टिप्रायश्चित्तमिति।खत्रैदीपेचोक्त
त्वात्पवित्रेष्टिदेवताकःस्थालीपाकःकर्त्तव्यः।येएवाहिताग्नेःपुरोडाशास्ते

स एवौपासनिकस्यचरवइत्यूह्यत्वात्॥तत्रसंधानानिदर्शाअग्नयेपवमानायात
त्रयमतृतीयपंचमसप्तमनवमाःएथक्संचचरवः।अथवापंचदेवताको
विंशतिमुष्टिनिर्वापात्मकएकएवचरुःतृतीयचतुर्थषष्ठाष्टमदशमानिआ
ज्यदेवताकानि।तत्रान्वाधानेक्रमः।आज्यभागांतेअग्निंपवमानंचरुद्व्ये
णसरस्वतीमियामाज्येनअग्निंपावकंचरुद्व्यंसवितारंसत्यप्रसवमाज्येनअ
ग्निंशुचिंचरुद्व्येणवायुंनियुत्वंतमाज्येनअग्निंव्रतपतिंचरुद्व्येणद्यावि
पृथिविमाज्येनअग्निंवैश्वानरंचरुंदधिक्राण्णामाज्येनअग्निंस्विष्टकृ
तंऊतश्रोषधीत्यादिनिर्वापकालेअग्नयेपवमानायजुष्टं निर्वपामिअग्नयेपाव
कायजु॥अग्नयेशुचयेजु॥अग्नयेव्रतपतयेजुष्टं॥अग्नयेवैश्वानरायजु

एधप्रोक्षणेष्वेवमेवाप्रधानहोमकालेक्रमः॥अग्नयेपवमानायस्वाहा॥सरस्व
त्यैप्रियायेस्वाहा॥अग्नयेपावकायस्वाहा।सवित्रेसत्यप्रसवायेअग्नयेश्रु
चयेऽवायवेनिभुत्वतेऽग्नयेव्रतपतयेऽविष्णवेशिपिविष्टायेऽग्नयेवैश्वा
नरायेऽधिक्राब्णोस्वाहायथालिंगंत्यागः।चरुहोमोवदानथर्मेणआज्यहोमो
दर्व्योचनुर्गृहीतेनास्विष्टकृतिउपस्तरणाभिघारणेनेवाज्यावदानसिद्धिरा
पस्तंबीयदर्शपूर्णमासयोरुपांशुयागेदृष्ट्वात्तबौधायनीयदर्शपूर्णमासयो
रुपांशुयागेदृष्ट्वान्नथापवित्रेष्टौअध्वर्युर्जुहूमुपस्तीर्यदक्षिणपुरोडा
शस्योन्नरार्द्धात्सकृदवद्यद्धोवाज्यादेकवारमवद्यतिनपंचशःअनेकयागसाध रात्र
नद्रव्यस्यस्विष्टकृदवदानमेकवारमेवकार्यमितिभगवताजैमिनाउक्तत्वात्त ११४
नि

तःपुरोडाशान्नमेवोन्नरार्द्धादवद्यद्धिरभिघारयतीत्यकृत्वादत्रापितन्मतेपूर्वंदर्व्यो
मुपस्तीर्यप्रथमचरुभागान्नरा र्द्धात्सकृदवदायाज्यस्थित्वाएकवारमेवाज्य
णं मादायशिष्टानांचतुर्णांचरूणांसकृत्सकृदवदायद्धिरभिघार्यहोमः।युक्तम
युक्तवासद्भिर्विचारणीयमतत्त्व॥॥इतिपवित्रेष्टिस्थालीपाकः॥॥समारो
पस्थलेअवरोपान्नरमकृतसमारोपेग्निनाशश्चहोमकालहृयमध्येचत्स्मर
णंतदाकारिकोकृत्वक्ष्यमाणमग्न्यनुगमनप्रायश्चित्तंकुर्यात।तर्तीयेहोमका
लेचेत्स्मरणंतदापुनःसंधानेकर्त्तव्यं॥तत्रज्वलनशक्तिस्यादसमारूढशक्ति
वत्।तर्तीयेहोमकालेतुसंप्राप्तपुनराहितिरितित्रिकांड्यामुक्तत्वात्।अव
रोपान्नरंकृतसमारोपेजातोग्निनाशएतस्यप्रामादिकमग्निनाशत्वंपरि

कल्पप्रयोगरत्नेप्रामादिकाग्निनाशेपुनःसंधानमुक्तंतदत्रकृतंचेन्नदासर्वो
ष्यप्यग्निनाशकानिग्रामादिकान्येवजातानितदाअसमा रूढशांतिवज्ज
लेन वह्निरूपशांतायदा भवेद्धोमकालेधार्यानुगतश्चेदित्यादीनामग्निनाश
निमित्तानांनकोपिविशेषस्तथाअसमारूढशांतिवदित्यत्रहेतौयेहोमका
लेसंप्राप्तेपुनराहितिःसमारूढसमिन्नाशेपुनराधेयमिष्यतेइत्यादीनांप्रा
यश्चित्तानामपिनप्रयोजनंतत्रापिप्रयोगरत्नेअयाश्वेत्याहुतिःपत्न्युपवा
सश्चइदंयत्तइत्यंसघृतोमंधेन्यतरत्कर्तव्यमितिप्रतिपत्तिः॥ ॥होमकाले
तरागमनेवक्ष्यमाणंदुर्गाप्रायश्चित्तंज्ञेयं॥ ॥वह्नीनामेकदेशापहारेमन रामं
स्तीत्युक्तंप्रायश्चित्तंचंडिकायां।इदंसर्वत्रापिज्ञेयं।सर्वंपियत्नेविनाप्रज्वा १७५
ला

लितेग्नौ।स्वयमग्निन्वत्तनिमित्तंप्रायश्चित्तंकौथेऽउद्दीप्यस्वजातवेदोपघ्नंनि रि
र्ऋतिंममापशूंश्चमह्यमावहजीवनंचदिशोदशस्वाहा।मानोहिंसीज्जात
वेदोगामश्वंपुरुषंजगत्।अविघ्नदग्नआगहिश्रियामापरिपातयस्वाहा
।घृतेरप्यग्नयइदंनममाऽकेचित्तुस्वाहाकारंनकुर्वंति।स्वयंज्वलेच्चेऽद्दीप्यस्वे
तिघृताभ्यांसमिधमितिकारिकादीपेप्येवमेव॥ ॥अग्निनाशस्थलेउपघाता
ऽभावात्तत्र।अग्न्युपघातनिमित्तंपुनस्त्वेतिसमिधमाधास्यापुनस्त्वादित्यारुढावे
थ सवःसमिंधतांपुनर्ब्रह्मणोवसुनीथयैः।घृतेनत्वंतनुवोवर्धयस्वसत्याःसंतुय
रुद्रेभ्यो जमानस्यकामास्वाहाआदित्येभ्योवसुभ्योब्रह्मभ्यइदंऽआधेयस्योपघातेतुप
नस्त्वेतयासमितिकारिकाबोधायनसूत्रमतादेतयेवऋचास्रुवाहुतिरधि
हु

का॥ ॥कानिचिद्धोमविषयकानिप्रायश्चित्तानिस्थालीपाकादिविषयकप्रायश्चित्त
मध्येलिखितानिकारिकाक्रमभंगभयात्॥ ॥इत्यारडोपनामकनारायणभट्टैरुद्या कृते
ग्निसागरेऔपासनहोमविषयकंप्रायश्चित्तनिरूपणंसमाप्तं॥ ॥इदानींस्थाली
पाकादिविषयकानिप्रायश्चित्तानि। तत्रयेनकेनापिनिमित्तेनदर्शपूर्णमास स्था
लीपाकयोःस्वकालेअनारंभेयेएवाहिताग्नेःपुरोडाशास्तेएवोपासने कस्यचर
वइतिन्यायात्।विभ्रष्टेष्टिवत्स्थालीपाकंपूर्णाकृतिपक्षंस्वाकृतिपक्षंवाकृत्वा
कालांतरस्यकालेआरभेत।इष्टिपूर्णाकृतिस्वाकृतीनांपूर्वपूर्वविधिबलीयास राम
मितिबौधायनसूत्रात्। तत्राग्निरिंद्रःसोमइतिदेवतात्रयं।अन्वाधानानंतरंतिल १३६
रहितंकेशीधान्यंनयेत्। निशयधःशयीतांदंपती।मैथुनंनाश्नीयातांमाषादिनभक्ष
भक्ष१

येत्।स्मृतिचंद्रिकायांपुलस्त्यः।सकृत्पर्वणिसंपीडिहविष्यंलघुभोजनं।न सायं
नोपवासःस्यात्तैलामिषविवर्जितमिति।अत्रविशेषमाहापस्तंबः।अतस्तिश्चान्नस्य
यथैतयोःस्त्रियंस्यान्नदंतस्मिन्नहनिभुंजीयातामधश्वशयीयातामात्मानमिति।
अत्रवर्ज्यान्याहहारीतः।मांसंमसूरंमधुमांसंपरान्नंमैथुनानिहवर्जयेदिति।व्रत्य व्रत्यम
महरन्वाधानदिनोभरद्वाजोपि।वर्जयेत्पर्वकाले तुस्त्रीतैलामिषंक्षौरं।सांख्या
यनोपि।कल्पहक्रीतविक्रीतंप्रहासंबहुभाषणं।तौर्यत्रिकंवृथाशय्यांयश्यमाणोवि
वर्जयेत्।जाबालिरपि।कंथारकान्कुलित्थांश्चवर्जयेत्कोद्रवंस्तथा।अन्नंतबहु
वारंचक्रयविक्रयमेवच।दंतशौचंचपूर्वेद्युर्योगस्यैतानिवर्जयेत्।मसूरंलवणं
क्षारंश्रवणकान्कोरदूषकान्।माषान्मधुपरान्नानिवर्जयेद्दीपवस्तके।बौधाय

ग॰सा॰ १७७

नोपिसर्वमेतदधःकोशोधान्यंवर्जयेदन्यैतिलेभ्यइति।एतन्नियमातिक्रमेकारिकोक्त
मन्नयेव्रतपतयेस्यालीपाकंकुर्यात्॥॥अन्वाधानानंतरंप्रधानयागात्पूर्वंग्रहणं
गा चेन्नदाप्रधानयोत्पूर्वमाज्यभौत्तरं।उदुत्यंजातवेदसंदेवंवहंतिकेतवः।दृशेविश्वाय
सूर्यंस्वाहासूर्यायेदं॰चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः।आप्राद्यावा रु
वापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्चस्वाहासूर्यायेदं॰एतद्यंसूर्यग्रहे।
नवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रं।भागंदेवेभ्योविदधात्यायन्प्रचंद्र
माश्चिरतेदीर्घमायुःस्वाहाचंद्रमसइदं॰यमादित्याअंशुमाप्यायंतियमक्षित
न क्षितयःपिबंति।तेनोराजावरुणोबृहस्पतिराप्यायंतुभुवनस्यगोपास्वाहा।चंद्र राम
मसइदं॰हविरुक्तमापस्तंबीयभाष्यं।अत्रस्रुवेणाज्येनहोमः॥॥अत्रबौधायनीय १७७

सूत्रतोदीपतश्चविशेषः।ससर्वत्रहविर्यज्ञेवितनतेसूर्याचंद्रमसोर्ग्रहणेप्वृग्यंतम
सउदुत्यंचित्रंदेवानामितित्रिभिःस्रुवाऽऽहुतीर्जुहुयात।इत्यक्त्वाऽभयो र्ग्रहणे
ष्वेकमेवप्रायश्चित्तंसूर्यस्येदंनचंद्रस्येदमितिव्यवस्था।उदुत्यंतमसस्परिज्यो
तिष्पश्यंतउत्तरं।देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमंस्वाहासूर्यायेदं॰।उदुत्यंचि
त्रमेतद्यंतुप्रागेवोक्तं॥॥सर्वत्रवितनेयज्ञकर्मणियजमानस्यर्त्विजो वास्त
नेरेतोविसर्गस्यादिमंमेवरुणतत्वायामीतिद्वेस्रुवौंऽऽहुत्वागंधपुष्पोपहारादिभिः हुतो
सूर्यमभ्यर्च्यपुनर्मामेत्तिंद्रियमित्यंजपेत्।तत्रचेनस्रुवाऽऽहुतीर्जुहुयाद्वा।समिधो
वाभ्यादध्यादितिबौधायनसूत्रदीपयोरुक्त्वादन्वाधानंतरंयजमानस्यस्वनेरेतो
विसर्गप्रधानयागात्पूर्वंइमंमेवरुणवक्ष्यमाणतत्वायामीतिमंत्राभ्यांस्रुवाज्याऽऽहु

ती कृत्वागंधपुष्पादिभिःसूर्यमभ्यर्च्यपुनर्मामैत्विंद्रियंपुनरायुःपुनर्भगः।पु
नर्ब्रह्मणमेतुमां पुनर्विष्णमेतुमांयन्मेरेतःपृथिवीनमस्कृत्याग्दोषधीरप्य
सरग्दापः।इदंतत्पुनरादेदे।दीर्घायुत्वायवर्चसे।यन्मेरेतःप्रसिच्यते।यन्मआ
जायतेपुनः।तेनग्रामममंकुरु।तेनसुप्रजसंकुरुहति॥ ॥ब्रुहिप्रवेरेतउत्सर्गे
अग्नयेव्रतपतयेस्थालीपाकंकुर्यात॥॥अन्वाधानानंतरंअथरज्जुंप्रकुर्वीते
त्यादिनिधायोपरिचान्यांश्चपरिस्तृत्यादिसिद्धये।इत्येतदंतेनकारिकायामुक्ते
नइध्मावर्हिषीसन्नह्योपरिनिदध्यातांतच्चोपरिनिधानंश्रोतेमंत्रेणस्मार्तेतूष्णं।
दर्शपूर्णमासादिपुमंत्रेणोपरिनिहितंशाखावर्हिरिध्मादियद्यधोनिपतेद्व
त्रप्रतिष्ठामनसइत्येतयापुनस्थानेतत्प्रतिष्ठाप्येतयैवस्रुवाहुतिंजुहुयाद्धु ९७८

त्वावाप्रतिष्ठापयेदितिसूत्रेदीपेचोक्त्वाबर्हिरिध्मादिउपरिनिहितंयद्यधोनिपतेत्तदा
ब्रह्मप्रतिष्ठामनसोब्रह्म वाचोब्रह्म यज्ञानांहविषामाज्यस्याअतिरिक्तंक
र्मणोयच्चहीनंयज्ञप वैणिप्रतिरन्नेतिकल्पेन्स्वाहाकृताहुतिरेतदेवान्स्वाहाइत्ये
तयापुनःस्वस्थानेतत्प्रतिष्ठाप्यएतयैवस्रुवाहुतिंजुहुयात।ब्रह्मणइदंन्यूनं
गःकृत्वावाप्र तिष्ठापयेत॥ ॥एवमन्येष्वपीतिसूत्रेणएतस्यार्थोदीपे।एवमन्ये
ष्वपिनैमित्तिकेषुसर्वत्रव्यापन्नेअतिक्रांतंकर्मपुरस्ताद्उपरिष्टाद्प्रायश्चित्तानं
तरंकर्त्तव्यं।सामान्यमेतत।अस्यापवादः।अतिक्रांतंकर्मनाड्रियेतमध्यर्थेलुप्त
भवतीतिसूत्रे।एतस्यार्थेदीपे।प्रमादात्पूर्वमंगमकृत्वोत्तरस्मिन्नंगेकृतेपुनःपूर्व
मंगंनकर्त्तव्यंयदिप्रयोजनशून्यंभवतितत्रप्रायश्चित्तमेवायथाशाखाछेदन

मकृत्वाछिन्नशाखयावस्रापाकरणेकृतेपुनःशाखाछेदनंनकर्त्तव्यंप्रयोजनाभावात्
एवंस्रुवस्यस्रवनंखातस्यखननंअवहतस्यावहननंपिष्टस्यपेषणंदग्धस्यदहन
मितिआदिवचनादेतंनकर्त्तव्यंकेचिदर्थलुप्तेघृपिमंत्रोच्चारणमिछंतिछिन्नेल
नेतथापिष्टेसान्नाप्येमार्त्तिकेतथापश्चान्मंत्राःप्रयोक्तव्यामंत्रायत्तार्थसाधकाइति
वचनादेतान्युदाहरणान्यवलोक्यतथास्मार्त्तेप्यानीयते। यथावहतास्तंडुलागृहीता
स्तंषोकर्मणिखकालेसंस्कारार्थमवहननंकर्त्तव्यंतदकृत्वाउत्तरंकर्मकृतंचेन्नदोषा
नं यश्चित्तमेवकर्त्तव्यंनपुनरवहतस्यावहनं॥ ॥श्रवणाकर्मणिपुरोडाशस्यलेपिष्ट
पेषणंदग्धस्यदहनं॥ ॥यथावाऽध्याधानमकृत्वाप्रधानेहोमेकृतेतदुत्तरंतस्यस्म राम
रणेसऽध्नःप्रयोजनशून्योजात स्तत्रप्रायश्चित्तेनैवसिद्धिर्नपुनराधानंतस्यप्रधा १७९

नयागार्थमग्निसमिंधनार्थत्वात॥ ॥आज्यभागोत्तरंतस्यस्मरणेनुविपर्ययप्रायश्चि
धा त्तंप्रधानंकृत्वाप्रधानयागःकर्त्तव्यः।तत्रअथस्रुक्षणोहोत्राचमनेत्यस्मिन्वे मि
दंविपर्यासेंतरितेमंत्रेएतत्सूत्रवृत्तौसर्वप्रायश्चित्तंकर्त्तव्यंइत्युक्त्वात्सर्वप्रायश्चित्त
मत्रकर्त्तव्यमथवावक्ष्यमाणंबौधायनोक्तंविपर्यासप्रायश्चित्तंकर्त्तव्यं।एतादृश
स्थलेसूत्रवृत्तिकारिकोक्तंयद्देवाइतिव्युक्रमनिमित्तंप्रायश्चित्तंनभवतिनिमि
त्तानांपरिमितत्वात्।सर्वत्रद्रव्ये कूर्चे प्रस्तरवि धतिपरिधिवर्हिःपवित्रवेदोप
वेषेध्मद्रव्यसंभारणंछेददाहोपघातेपुनाशेविनाशेवान्यथालिंगंकृत्वायथालिंग
म मुपसाद्यत्वंग्नेअयासिप्रजापतइतिद्वाभ्यांस्रुवाकृतीर्जुह्वादिनिसूत्रात्प्रदीप्ताग्नव
र्हिरिध्मादिछेददाहेविष्मूत्रायुपहतौनाशेवान्यंतद्रूपंतज्जातीयंतत्परिणाहंकृत्वा

तथासादयित्वास्रुवाऽऽज्यौ जुहुयात्। त्वमग्नेअयास्ययासन्मनसाहितः।अयासन्हव्य
मूहिषेऽयानो धेहिभेषजँस्वाहाऽग्नयेअयसेऽइदं॰।प्रजापतेनत्वदेतान्यन्यो
विश्वाजातानिपरिताबभूव।यत्कामास्तेजुहुमस्तन्नोअस्त्वयँस्यामपतयोरयीणाँस्वा
हाऽप्रजापतयेऽइदं॰॥ ॥पवित्रनाशेमिंदादिगणोवाप्रायश्चित्तमित्युक्तंदीपेस मिं
दादिगणोनात्रलिखितःकारिकायांपवित्रनाशेस्यात्पवित्रवतेचरूरितिप्रायश्चित्ता
स्नानात्।सर्वत्रेध्माबर्हिरादीनांसंभाराणांप्रयाजादीनामंगानांचन्यूनकरणेवचना
दृतेवर्द्धनेचयत्पाकत्रेतिस्रुवाऽऽज्यंजुहुयादितिसूत्र दीपाभ्यामिध्माबर्हिषोन्यूना
तिरेकेयत्पाकत्रामनसादीनदक्षानयन्नस्यमन्वतेमर्तासः।अग्निष्टद्धोताक्रतु राम
न विद्विजाँन्यजिष्ठोदेवाँऋतुशोयजातिस्वाहा।अग्नयेऽइदं॰।इध्माबर्हिषोरधिकं त्या १८०

ज्येन्यूनेसंपाद्यं॥ ॥सर्वत्रप्रणीताप्रोक्षण्यादिविधुपात्रज लानांक्रियमाणानांसादिता
नांवाबिंदुपातेचमसादिस्रावेआपोहिष्ठामयोभुवस्तंचमुल्कांनेपात्रंपूरयित्वातत ति
मआपस्तऽइतायतेपुनःस्वादिष्टयाधीतिरूचथायशास्यतेऽअयँसमुद्रऽइहविश्वभे
षजःस्वाहाऽमृतस्यसमुत्पणुतभुर्वःस्वाहाऽऋभुभ्यऽइदं॰आपस्तंबसूत्रंयदिप्रणीताः
यु स्कंदेरूपदस्येयुर्वापोहिष्ठामयोभुवस्तितिसृभिःपुनर्गृहीत्वातंतमस्याऽऽज्यंजुहु
यादितिबौधायनमतस्यसुगमत्वादग्निहोत्रेधिश्रितेमार्जारवराहमूषदिभिरं का
तरागमनेघादशगृहीतेनस्रुचंपूरयित्वाजातवेदसेसुनवामसोमंमनोज्योतिरि
तिघाभ्यांमहाव्याहृतिभिस्तिसृभिरितिपंचभिर्गोदिगणंजुहुयात्।मनस्वतीं
चापुरुषादिभिरंतरागमनेप्येतदेवप्रायश्चित्तमित्यग्निहोत्रस्थलेप्रायश्चित्त

दीपेऽन्वक्त्वात्॥॥प्रायश्चित्तदीपेएवदर्शपूर्णमासस्थलेसूत्रेचहवि र्हियत्रकु
त्रचित्स्कन्नछिन्नभग्ननष्टविपरीतरक्षणस्पंदनस्रावितपतितस्फुटितादि
निमित्तेषुअज्ञाविश्वा न विडालकाकश्वरमृगपशुपक्षिसरीसृपादिषुअ
ग्नीनामंतरागमनेऋत्विजामंतरावागतेषुघादशगृहीतेनस्रुचेपूरयित्वाडुर्गो
मनस्वतीमहाव्याहृतीस्तिस्रोजुह्वयादित्यक्त्वाचातस्मात्तांपिसंभावितनिर्
त्तेषुऋत्विगग्न्योरंतरागमनेघादश गृहीते नस्रुचंपूरयित्वाडुर्गादिगणंजु
ह्वयात्।नात्रपुनःषष्ठीमनस्वतीसातुऔपासनस्थलेएवअग्निहोत्रप्रकरणे
लिखितत्वात्। जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः।सनःपर्षद
तिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निःस्वाहाडुर्गायेऽमनोज्योतिर्जुषता

राम १८१

माज्यंविच्छिनंयज्ञंसमिमंदधातु।याइष्टाउंयसोनिम्रुचश्चताःसंदधामिहविषा
यतेनस्वाहामनसेज्योतिषेडुर्गायेचपृथिव्यैचमहतेचस्वाहा।अग्नयेपृ
थिव्यैमहतेडुर्गायेभुवोवायवेचांतरिक्षायचमहतेचस्वाहावायवेंतरिक्षाय म
य हतेडुर्गायेसुवरादित्यौचदिवेचमहतेचस्वाहाआदित्यायदिवेमहतेडुर्गा
गायं।औपासनहोमकालेंतरागमनेपीदंज्ञेयं।तत्रपुनर्मनस्वतीषष्ठीतिविशे
षः॥॥अत्रपारिजातेविशेषःपाराशरःप्रायश्चित्तकांडे।द्वौविप्रौब्राह्मणाग्नी
वादंपतीगोद्विजोत्तमौ।अंतरेणयदागच्छेत्कृच्छ्रंसांतपनंचरेदिति।एतदकर्म
कालविषयं।कर्मकालेषुविशेषस्त्रेव।होमकालेतयादोहस्थाप्यायेदारंभ्र
हे।अंतरेणयदागच्छेद्विजश्चौदायणंचरेदिति।दोहे सान्नाय्याद्यंगभूतेएतच्चा

भ्यासविषये।आज्याधि श्रयणार्थाग्नावुद्धाते योनितउत्पाद्याहवनीयेमनस्व
तीजुह्वादितिदीपेउक्त्वादग्नेःपुनरंगानपोह्याग्नेोमनस्वतीजुह्वाघृतःपाठे रा
न॥ ॥गृह्याग्निकारिकायांतूतीयाध्यायोक्तानिस्मार्त्तेप्रायश्चित्तानिएवंगृह्योत्पा
रा दिव्याधितत्वपरिहारार्थंषडाहुतिचरुहोमंकरिष्ये।तथैवातुरत्वपरिहारार्थंय
क्ष्मगृहीतत्वपरिहारार्थंचषडाहुतिचरुहोमंकरिष्ये।इतिसंकल्प्याग्निमुपस
न्न माधायतदंगमन्वाधानंकरिष्ये॥अस्मिन्नाहितेग्नावित्यादिचक्षुषीआज्येने
क्षंतमुल्काअत्रप्रधानंयक्ष्महननंचरुद्रव्येणशेषेणस्विष्टकृतमित्यादिसघो
यक्ष्मेपरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वाअग्नेःप्रत्यक्त्रिवृत्रवनिष्पूर्यंच रात्र
नुरोमुष्टीस्तूष्णीनिरूप्यतथैवशोष्यावघाताद्यंचरुश्रपणांतंकृत्वाज्यसंस्कारा १८२

ज्य यांभागंतेवदानधर्मेणावदायमुंचामित्वेतिपंचर्चस्यसू क्तस्यप्रजापतिर्यक्ष्मना
शनस्त्विष्टा।अंत्यानुष्टुराजयक्ष्मनाशनप्रधानचरुहोमेवि॰मुंचामित्वा॰नेत्वा
हा।यदिक्षितायुर्यदिवापरेतोयदिम॰त्यस्वाहा।सहस्राक्षेण॰पारंस्वाहा।शतंजी
व॰नदेःस्वाहा।आहार्षं॰विदंस्वाहा।पंचसुयक्ष्मनाशनायेदं।षष्ठंस्विष्टकृतंतत
षं स्विष्टकृदादिहोमशेषंसमापयेत्॥ ॥अथाशुभस्वप्नदर्शनसूचितारिष्टपरिहारा
र्थंप्रायश्चित्तंकरिष्ये।अद्यानइतिमंत्रद्वयस्याश्वावाश्वःसवितात्रिष्टुप्।अशुभ
स्वप्नदर्शनसूचितारिष्टपरिहारार्थंसूर्योपस्थानेविनियोगः।अद्यानो॰सुव।यच्च
नोद्यितिपंचर्चस्यत्रितऋषिःउषस्पंदेवतापं क्तीछंदः।सूर्योपस्थानेविनियोगः
।यच्चगोपु।निष्कंवाघा॰तदन्नाय॰यथाक लो॰अजैष्माद्या॰यद्वायोमेराजन्वि

त्स्यगत्समदोवरुणस्त्रिषुपृअश्वभस्वन्नर्यसूर्योपस्थाने०।योमेराज०॥ ॥क्षुता
दिनिमित्तक दोषपरिहारार्थंसुचक्षाइतिमंत्रजपंकरिष्ये०स्नात्वापीत्वाक्षुतेसुप्ते
भुक्तारथ्योपसर्पणे॥आचांतःपुनराचामेद्वासोविपरिधायचेतियाज्ञवल्क्य
वचनात्द्विराचमनपूर्वकंमंत्रंजपेत्इतिक्षुते॥ ॥जृंभितेनुजृंभादिनिमित्त
क दोषप०अमनोज्ञ दर्शननिमित्त०पापगंधाघ्राणनिमित्त०अक्षिस्पंदन०
न कर्णध्वनिनिमित्तकदोष०तस्मिंस्तस्मिन्निमित्तेसंकल्पाज्ञेयाःसुचक्षाअहमक्षी
सु भ्यांभूयासंसुवर्चामुखेनेश्रुत्कर्णाभ्यांमयिदक्ष क्रतूइतिषंणांनिमित्तानामय
मेवमंत्रः॥ ॥अगमनीयागमने।अगमनीयागमननिमित्तकदोषपरिहारार्थं राम
पुनर्मामैत्विंद्रियंपुनरायुःपुनर्भगःपुनर्ब्राह्मणमैतुमांपुनर्ब्राह्मणमैतुमांस्वाहाग्नयइ १८३
दंइमेयेधिष्यासोअग्नयोयथास्थानमिहकल्पंतांवैश्वानरोवाहधानोंतर्येछतु
मेमनोहृयंतरममृतस्यकेतुःस्वाहेति॥ ॥अव्याधितस्वापकालीनादित्यास्तम

समिधोद्रोष्यामीति।जपपक्षेतुजपंकरिष्यं।अगमनीयागमनंतुरजस्वलाभार्यागम
मनं।निषिद्धतिथ्यादौस्वभार्यागमनंवा।अयाज्ययाजननिमित्तकदोषप०अया
ज्ययाजने।अयाज्यस्तुन्यस्तार्त्विज्यः।अभोज्य भोजननिमित्तकं०।अ
भोज्यभोजनंतप्तनादिगणिकान्नादिच।अप्रतिग्राह्येतुअप्रतिग्राह्यप्रतिग्र
हनिमित्तक०अप्रतिग्राह्यंशस्त्रविषादि।चैत्यपूपोपघातेतु।चैत्यपूपोपघात
निमित्तश्चैत्यपूपोपघातोग्निचयनस्थपूपस्यर्शः।एतेषुनिमित्तेषु।पुनर्मामैत्विं
द्रियंपुनरायुःपुनर्भगः।पुनर्ब्राह्मणमैतुमांपुनर्ब्राह्मणमैतुमांस्वाहाग्नयइ
दंइमेयेधिष्यासोअग्नयोयथास्थानमिहकल्पंतांवैश्वानरोवाहधानोंतर्येछतु
मेमनोहृयंतरममृतस्यकेतुःस्वाहेति॥ ॥अव्याधितस्वापकालीनादित्यास्तम

अव्याधितस्वापकालीनादित्यास्तमयजनितप्रत्यवायपरिहारार्थंप्रायश्चित्तंकरिष्येइति१
यन्निमित्तेकर्मणिनुॐअव्याधितस्वापकालीना दित्योदय निमित्तेकर्मणिनु।
विहितकर्मोश्रांतस्वापकालीनादित्योदयजनितप्रत्यवायपरिहारार्थंप्रायश्चित्तं न
च करिष्यामीतिपंचसंस्थाभितपाआद्याजगतीद्वितीयात्रिष्टुबंत्येदेजगत्योसू
र्योपस्थाने।उदितेनुयस्यतेविश्वेतिचतस्रः॥॥अगारोपरिकपोतोपवेशना
दिनिमित्तकर्मणिनुअगारोपरिकपोतोपवेशनसूचितारिष्टपरिहारार्थंदेवाः
कपोतइतिसूक्तेनप्रत्यचमाज्याहुतीर्होष्यामीतिहोमपक्षेजपपक्षेनुदेवाःसूक्त कपोतइति
जपंकरिष्येइतिविशेषः।देवाःकपोतइतिपंचर्चस्यसूक्तस्यकपोतोविश्वेदेवाज
गतीअगारो०र्थेहोमेजपेवाविनियोगः।कपोतस्यागारसमीपगमनेनुकपोता राम
गारसमीपगमनसूचितारिष्टपरिहारार्थेमितिविशेषः।अगारंगृहं॥॥अर्थो १८५
म

र्थेगमननिमित्तककर्मणिनुअर्थसिध्यर्थंवयमुत्वापथस्यथइतिप्रत्यचमाज्याहुती
र्होष्यामीति।जपपक्षेनुवय मुत्वेति सूक्तजपंकरिष्येइतिविशेषः।वयमुत्वेति दो
दशर्चस्यसूक्तस्यभरद्वाजःपूषागायत्रीअष्टम्यनुष्टुप्।अर्थसिध्यर्थेहोमे०श्लो
सागः॥॥नष्टलाभाद्यर्थेकर्मणिनुनष्टलाभार्थेसंपूषन्विडुयेतिसूक्तेनप्रत्य
चमाज्याहुतीर्होष्यामीतिजपपक्षेनुसंपूष न्विडुयेतिसूक्तजपंकरिष्यइति
विशेषः।संपूषन्विदुयेतिदशर्चस्यसूक्तस्यभरद्वाजःपूषागायत्रीनष्टलाभार्थे
होमेवि०।प्रज्ञाहीनत्वेनुप्रज्ञाकामोहंसंपूषन्नित्यादिहोमोजपोवापूर्ववत्।महा
ध्वादिगमननिमित्तकर्मणिनुमहाध्वादिगमनसंभाविन डुःखपरिहारार्थे
संपूषन्नध्वनइत्यादिपूर्ववत्।संपूषन्नध्वनइतिसूक्तस्यकंण्वःपूषागायत्रीमहा

ध्वपरि०होमे०भ्यंकरमार्गगमनेनुमार्गेभयनिरूत्यर्थमितिविशेषः।व्याधितत्वप
रिहारार्थंचरुहोमाद्येतदंतानांप्रयोगाणांमूलेकारिकातृतीयाध्यायेआदितआ
रभ्यज्ञेयंसूत्रतृतीयाध्यायेप्येवमेव॥॥अथौपासनाग्न्यनुगमनप्रायश्चित्तं।तत्रा
ग्न्यनुगमनोत्तरमाचम्यप्राणानायम्यऔपासनाग्नेरनुगमन निमित्तप्रायश्चि
त्तंकरिष्यइतिसंकल्प्यात्रप्रायश्चित्तस्यपक्षत्रयं पत्न्युपवासःयजमानोपवासः
आज्याहुतिश्चेति।तत्रसुगमत्वादादावाज्याहुतिरेवोच्यते।आयतनादस्मापोह्या
यतन मुपलिप्योल्लिख्यश्रोत्रियागारादग्निमाहृत्यभूर्भुवस्वरोमितिप्रतिष्ठाप्य
परिसमूह्यपरिस्तीर्यपर्युक्ष्यज्वंसंस्कृत्यस्रुवंसंमृज्यायाग्नेतिविमदोयाल्लग्निः पं राम
क्तिः।औपासनाग्न्यनुगमन निमित्तप्रायश्चिताज्यहोमे०अयाश्चाग्नेस्यनसिश्चा १८५

स्तीश्चसत्यमित्वमयाअसि।अयासावयसांकृतोयासन्त्व्मूहियेयानोधेहिभेष
जंस्वाहाग्नयेपसइदं•सर्वंप्रायश्चित्तंकरिष्येभूर्भुवस्वःस्वाहाप्रजापतयेइदं
नममा।परिस्तरणानिविसृज्यपर्युह्यपर्युक्ष्यकालप्रासंहोमंकुर्यात्।इदंप्रायश्चि मे
त्तंएकादशदिनपर्यंतमग्निनाशोपिसमानंवैतदूर्ध्वंत्वाज्याहोमादियुक्तंपुनःसं
धानंपत्न्युपवसपक्षेतुऔपासनाग्न्यनुगमननिमित्तमुपस्थे तमौपासनाग्निं
पत्न्युपवसप्रायश्चित्तेनपुनरूत्पादयिष्यइतिसंकल्पपूर्वंवदग्निंप्रतिष्ठाप्यका
लप्रासंहोमंकुर्यात्। पत्नीतुतस्माद्धोमकालादारभ्यान्यहोमकालपर्यंतमुप
वसेत्।यजमानोपवासपक्षेप्येवमेव।अत्रद्वादशरात्रपर्यंतमिदमेव प्रायश्चित्त
मित्युक्तं तन्मूलभूतंसूत्रं।नित्यानुगृहीतस्याद्यदित्यपशोम्येपत्न्युपवसेदित्येके

ते

एतत्सूत्रस्थोयदिप्राऽध्वरणउद्घायेत्तत आन्यस्माद्धोमकालात्सत्युपवसेदित्येके।एक
ग्रहणाद्य जमानउपव सेदित्येके।अथाश्वाग्न इत्येकामाहुतिंजुहुयादित्येके।
अतःशास्त्रांतरदर्शनात्।अन्येतुपूर्वसूत्रमेवव्याचक्ष्युः।नित्यश्चेदुक्तकार्यनित्य
माचमनमितियथा।अनुशब्दःपश्चाद्वचनः।एतदुक्तंभवति।यदिवैवाह्योनगृही
तःदायविभागकालेगृह्यते।गृहीतोपिवानष्टोद्वादशरात्रमतिक्रांतस्तदुक्त या
क्रियायापश्चाद्गृहीतोभवतीति।तत्रविवाहाज्याहुतयोलाजाहुतयोगृहप्रवेशनी
य याज्याहुतश्चोदयांजनंचभवति।नान्यत्।कन्यासंस्कारत्वात्।होमद्वयंचात्रस
मानतंत्रंस्यात्।लाजाहोमेत्रपत्न्यंजलिनाकार्यः।तद्धोमेतस्यसाधनत्वेनदृ राम
त्वात्।लाजावपनंतुस्वयमेवकरोतिनभ्रातेति॥प्रायश्चितविषयेकारिकापि। १९६

पा औपासनानुगछेच्चेदुपलेपादिपूर्ववत्।आहृत्यश्रोत्रियागारात्रतिष्ठाप्यहविर्भुंजं।आ
न्यस्माद्धोमकालात्स्त्रीनाश्नीयाद्यदिवागृही।पर्यूहनादिवाग्नौसंस्कृत्याज्यंचपूर्वे
या वत्।अथाश्वेत्यनेनहुत्वाऽपूर्वंजुहुयाद थेति।सर्वप्रायश्चितंतुपरिभाषाप्राप्तंसर्व
त्रसमस्तव्याहृतिभिरेकाज्याहुतिःसर्वप्रायश्चित्त मितिसंज्ञा।अग्नावनुगतेय
स्होमकालद्वयंव्रजेत्।उभयोर्विप्रवासेवालौकिकोग्निर्विधीयतेइति।यद्यग्नपार्श्वे
श्रोनकमोर्वचनात्पूर्वोक्तंत्रायेणवृत्तिकारस्यनाभिमतंगृहीतोपिवानष्टोद्वा
मतिक्रांत दशरात्रैस्तदुक्तयाक्रियायापश्चाद्गृहीतोभवतीतिवृत्तावुक्तत्वात्।उक्तयाक्रिय
यानामलाजहोमादीसुक्तपुनःसंधानेनेत्यर्थः।औपासनेरनुगमनप्रायश्चि ना
तंवृत्तिकृदभिप्रायेणेदंलिखितं।अथग्रंथांतराद्यभिप्रायेणतुस्वयुक्त्याचान्य

देवात्रविचार्यते।तदेवऔपासनाग्नेरनुगमनस्थलेनित्यानुगृहीतस्याद्यदित्पशाम्पे
त्पत्युपवसेदित्येकेइत्येतत्सूत्रस्थोगृहीतोपिनष्टोद्वादशरात्रमतिक्रांतस्ततउक्त
माकियतापश्चाद्गृहीतोभवतीतिअनयावृत्तिरूपकृच्छ्रेणाद्वादशरात्रैर्यतमया प
श्राग्नेत्मनेनेवपक्षे णयत्प्रायश्चित्तमुक्तंतदग्नावनुगतेयस्यहोमकालद्वयं
व्रजेत्।उभयोर्विप्रवासेवालौकिकोग्निर्विधीयतेइतिस्मृतिचंद्रिकायांशौनकव
चनस्यऋषिदृष्ट्वादेवलस्यैववचनस्यमूलपार्श्वेलिखित्वाद्वहूनामनुग्रहोन्या
म्यइत्याधानवृत्तिरूपकृच्छ्रकामाःघोरयमत्वेनदुर्बलत्वाद्भूयस्कारिकायामेकरा
त्रादिदिनपर्यादानुक्तत्वात्।द्वादशरात्रमनेनैवप्रायश्चित्तेनसिद्धिरित्यतिप्रसंगे णम
नलोकविरुद्धत्वाच्चोपेक्षणीयं।। अत्रकश्चिदापस्तंबीयानांसुदर्शनभाष्यकार १८७

मतेसार्वकालिकमयाश्चेतिपाक्षिकंप्रायश्चित्तमुक्तंतदेवशास्त्रांतरीयत्वादिदम
स्तिचेद्वदिष्यतितर्हिसर्वदाएतावदेवप्रायश्चित्तंभवतुद्वादशरात्रमित्येवम
र्यादानकार्यैतिममतुप्रतिभाति।सद्भिर्युक्तमयुक्तंविचारणीयमेतत्।अस्मि
न्पक्षेअग्न्यनुगमनोत्तरंहोमकालद्वयपर्यंतमेवअयाश्चेतिप्रायश्चित्तंतदूर्ध्वं
लाजाहोमादियुक्तंपुनःसंधानंकार्यमितिविशेषः।पत्युपवासस्वयमुपवासप
म क्षयोस्तुसुतरामयंनियमइत्यलंप्रसंगेन।इत्यौपासनाग्न्यनुगमनप्रायश्चित्तं।।
अन्वाहिताग्न्यनुगमनप्रायश्चित्तं।। ।।अन्वाहिता ग्नेश्चा ग्न्यादेर्गोनुगमनेतु
एवेवदग्निमुत्पाद्यअन्वाहिताग्नेःप्राग्गादनु गमननिमित्तंपुनरन्वाधानं
करिष्यइतिसंकल्प्यव्याहृतिभिः समिधावाधायभूर्भुवःस्वरितिउपस्थायसर्वेश

यश्चित्तंकृत्वास्थालीपाकंकुर्यात्। अत्रकारिका। अन्वाधानेकृतेयागात्माङ्क्तेदनु
गतेभवेत्। प्रायश्चित्तमिदंकृत्वापुनरन्वाधात्यथाव्याहृत्याख्येरुपस्थेयइति द
त्र वौधायनाश्रयं। आज्याकृतिंचजुहुयाँभूर्भुवस्वरितीहनुइति। अन्वाधानोत्तरं
प्रयाणनिमित्तकर्कर्मणितुअन्वाहिताग्निप्रयाणनिमित्तेतुभ्यंताइत्याज्याकृतिं
करिष्येतुभ्यंतेतिमंत्रस्यअंगिराविरूपाऋषिःअग्निर्देवतागायत्रीछंदः। अन्वा
धानोत्तरप्रयाणनिमित्तकाज्याकृतिहोमेविनियोगः। ॐतुभ्यंताअंगिरस्तम
विश्वाःसुक्षितयःपृथक्। अग्नेकामायेयिरेस्वाहा। अग्नयइदंनमम। इतिकृ
त्वाउक्तविधिनाग्निंसमारोप्यगच्छेत्अत्रसूत्रं। अन्वाहिताग्नेःप्रयाणोपपत्तौ राम
पृथगग्नीन्नयेयुस्तुभ्यंताअंगिरस्तमेतिवाज्याकृतिंकृत्वासमारोपयेत्। अत्र १८८

कारिका। अन्वाधानेकृतेपश्चादग्निमारोपयेद्यदि। तुभ्यंताइत्येकृत्वावह्निमारो चा
पयेत्तत इतिएवमन्वाहिता ग्नेःप्रयाणोपपत्तौतुभ्यंताइत्यंकृत्वासमारोप्यगच्छे
न त्। एवमन्वाहिताग्निरकृत्वेतिसूत्रात्। सर्वत्राज्यहोमेआज्यसंस्कारःस्रुवसंमा
र्गश्चज्ञेयः। श्रौतसूत्रेप्रवासोपस्थानखंडवृत्तौआज्याकृतिंजुहुयादित्यत्रआज्य
ग्रहणादाज्यसंस्कारस्योक्तत्वात्। औपासनहोमलोपनिमित्तेतु। औपासनहो
मलोपजनितप्रत्यवायपरिहारार्थंमनसाचतुर्गृहीतंहोष्यामीतिसंकल्प्य
स्रुचिचतुर्गृहीतंगृहीत्वामनोज्योतिर्जुषतामाज्यैर्विलिम्पंयज्ञंसमिमंदधातुयाऽ मे
मि इष्टाउषसोयाअनिष्टास्ताःसंतनोंहविषाघृतेनस्वाहा। मनसेज्योतिषइदंनमम
। सर्वेषांजातानांहोमलोपानामेकैवाकृतिःइत्येकेचित्प्रतिहोमंवा। अत्राप्यती

तहोमानोऽनुष्ठानंकृताकृतं। द्वादशादिनपर्यंतमेवदंतदूर्ध्वंचेदग्निनाशः।तत्र
नित्यहोमेत्वतिक्रांतेसंस्कृत्याज्यंचपूर्ववत्। चतुर्गृहीत्वाज्यंमनस्त्वाजुहोत्यथे हुतो
तिकारिका।अग्निहोत्रहोमेचप्रतिमामेकेइतिसूत्रं।आद्वादशादिनादेवमूर्ध्वंविच्छि
द्यतेनतः।प्रायश्चित्तंतु यत्प्रोक्तमग्नित्यागेपपातके।मनुनातत्समुद्दिष्टंतत्का त्त
लानुसारतः।त्रैमासिकंगोवधोक्तंयत्काग्नेर्निष्क्रि तिर्भवेत्।चांद्रायणंवाहो
म्यस्यदानंवापिसमाचरेत्।संवत्सरंतुत्यक्ताग्निःकुर्याच्चांद्रायणंव्रतमित्यादि
कारिका।विच्छिन्नाग्नौतुतत्रयावत्कालंविच्छिन्नाग्निः नजनितप्रत्यवायपरिह राम
रंज्ञातदिनसंख्योक्तंप्रायश्चित्तंहोमदानंचकृत्वाविच्छिन्नस्यगृह्याग्नेःपुनः १८९
संधानंकरिष्येइत्यादिपुनःसंधानप्रकरणेऽप्युक्तमपिप्रकरणादत्रोक्तं।स्थाली

पाकत्रयातिपातननिमित्तेनुस्थालीपाकत्रंयातिपातेनविच्छिन्नस्यगृह्याग्नेःपुनरुत्प
त्यर्थेपुनराधेयंकरिष्येतथासमारूढसमिन्नाशेपिसमारूढसमिन्नाशेनविच्छिन्न
स्यगृह्याग्नेःपुनरुत्पत्यर्थेपुनराधेयंकरिष्यइतिसंकल्प्यउभयत्रापीदंपुनरा
धेयंपुनःसंधानात्कर्मांतरं।तस्यविधिर्जैयंतमतेनोच्यते।पूर्वोक्तवत्संकल्पा
ग्न्याधेयिकसंभारान्यथासंभवमाहृत्यतेषुसंभारेषुश्रोत्रियादिगृहादाहृत
मग्निंप्रतिष्ठाप्यपर्यूहनादिकंकृत्वोक्तवदाज्यंसंस्कृत्यस्रुवेणाज्यश्वेत्यनयैक
याज्यंजुहुयात्।अत्रकारिका।तृतीयप्रभृतीनांतुपर्वणामतिपातने।पुन
राधेयमिच्छंतिकेचिदत्रविदोजनाः।एतन्मूलंहिरण्यकेशिगृह्यसूत्रं।यदि
पार्वणोविच्छिद्येततस्मिन्याग्निकृतेनयाजयेद्यदिद्वौवैश्वानरयाग्निकृतौय

दिवद्भूत्पुनराधेयइति।समारूढेसमिन्नग्नौपुनराधैमिष्यते।वक्ष्यामिपुनराधे
यंजयंतस्वामि नोमतं।अग्न्याधेयिकसंभारान्यथासंभवमाहरेत्।उपलेपादि
कंकृत्वासंभाँन्निदधातितान्।संभारेष्वादध्यात्यग्निंश्रोत्रियादिगृहाद्धृतंपर्यू
ह्नादिकंकृत्वासंस्कृत्याज्यंचपूर्ववत्।स्रुवेणजुहुयादाज्यमयाश्चेत्यनयैक
येति।तत्रोभयातिक्रमेउभयातिक्रमनिमित्तंअग्नयेपथिकृतेस्थालीपाकं
करिष्यैतिसंकल्प्याग्नयेपथिकृतेत्वाजुष्टंनिर्वपामीतिपर्वस्थालीपाकव
त्।तत्रकारिका।उभयातिक्रमेकार्यश्चरुःपथिकृतोभवेदिति।स्थालीपाका
तिक्रमणेतुपौर्णमासस्थालीपाकातिपत्तिज्ञानेतदोषपरिहारार्थंदर्शस्था
लीपाकातिपत्तौविशेषः।अन्याग्नौस्वयंयजनेतुअन्याग्नौस्वयंयजननिमित्तमि

तिविशेषः।स्वाग्नावन्ययजनेतुस्वाग्नावन्ययजननिमित्त मितिविशेषः।चतुर्ष्वपिनि
मित्तेषुअग्नयेपथिकृतेस्थालीपाक मितिसर्वमुभयातिक्रमवत्।तत्रकारिका
।स्थालीपाकेत्वतिक्रांतेयद्यन्याग्नौस्वयंयजेत्।स्वाग्नावन्योयजे द्वापिकार्यः
पथिकृतश्चरुरिति॥यद्यमावास्यांपौर्णमासींवातीयाद्यदिवान्यस्याग्निंयय
जेतयदिवास्यान्योग्निंयजेतेतिसूत्रे।अग्निपथिकृतस्थालीपाकस्थानेपूर्णा
हुतिपक्षेतुपथिकृतस्थालीपाकस्थानेपूर्णाहुतिंहोष्यामीतिसंकल्प्यस्रुचिघा
दाग्रहीतेनाज्येनाग्नयेपथिकृतेस्वाहेतिपूर्णाहुतिंजुहुयात्।स्रुवपूर्णाहुतिप
क्षेतुस्रुवपूर्णेनाज्येनाग्नयेपथिकृतेस्वाहेतिजुहुयात्।तत्रकारिका।आज्यघाद
दाग्रहीत्वास्रुग्गृहीत्वापूरयेत्स्रुचं।तयावाज्याहुतिःकार्यासापूर्णाहुतिरिष्यते।स्रुव

ति
पूर्णाहुतिर्वोस्यादिहेकेयाज्ञिकाविदुरितिशिष्टपूर्णाहुतिस्त्रुवाहुतीनांपूर्वंपूर्ववि
धिंबलीयांसमितिबौधायनसूत्रं।अत्रान्यत्रापिचअपिवाप्रायश्चित्तेष्टीनांस्या
नेतत्तेतत्स्पदेवतायैपूर्णाहुतिंजुहुयादितिविज्ञायतइतिसूत्रं।एतत्सूत्रस्य
वृत्तिकारमतेनारब्धदर्शपूर्णमासस्यैवपूर्णाहुतिः।अन्यग्रंथकारमतेनु।यथा
श्रुतएवार्थः।अनुष्ठानमप्येवमेव।अतस्यादिनापूर्णाहुतायामिष्टिपर्याप्त हुतौ
माज्यंवीहयश्चतत्रोक्तादक्षिणाचावश्यंदेयमितिसायंप्रातरि त्यकर्मभाव्यं॥
अर्वाक्शाम्यापरासादग्नेरायतनाद्बहिर्गमनेअर्वाक्शाम्यापरासादग्नेराय
तनाद्बहिर्गमननिमित्तंप्रायश्चित्तंइदंतइत्यस्यबृहदुक्थोविश्वेदेवास्त्रिष्टुप् राम
अग्नावग्निक्षेपणेविनियोगः।इदंतएकंपरऊतएकंतृतीयेनज्योतिषासंवि १९१

रास्वसंवेशनेतन्वश्चारुरेधिप्रियोदेवानांपरमेजनित्रेइत्यग्नौप्रक्षिप्यसर्वप्रा
यश्चित्तंजुहुयात्।तत्रकारिका।अर्वाक्शाम्यापरासात्तुबहिरायतनाद्यतः।प्राय
श्चित्तसमाप्त्यंतंसमर्थोजीवितुंयदि।इदंतइत्यृचास्यस्थानेग्नौक्षिपेत्पुनः।आ प्र
ज्याहुतिंचजुहुयाद्बृहत्साख्येश्चपूर्ववदिति।आहवनीयमवदीप्यमानमर्वाक्
शाम्यापरासादिदंतएकंपरऊतएकमितिसंवपेदितिसूत्रं।।शाम्यापरासोनामउ
पविष्टेनपुरुषेणक्षिप्ताशाम्यायांव तिरश्चंगलतितावान्देशइतिहौत्रात्लोकेनो
क्तं।तस्मिन्क्षिप्तेध्वर्युराहवनीयसमीपेस्थित्वाप्यस्तंशाम्यांप्राप्स्यतीतिऋतावु
क्त्वात्।शाम्यापरासात्परस्ताद्बहिर्गमनेतुशाम्यापरासात्परस्ताद्बहिर्गमननि
मित्तंप्रा०।इदंतएकमित्यृक्चाग्निप्रक्षेपंकृत्वाग्नयेपथिकृतेस्थालीपा

कंकुर्यात्।पूर्णोऽतिर्वाग्नयेपचिकृतेस्वाहेयेवंरूपा।अत्रकारिका।अतिक्रांतो
यदाशाम्यापरास मनलोभवेत्।चरुःपचिकृतःकार्यःपूर्णाऽतिरथापिवा।य
दित्वतीयादितिसूत्रं॥।।इध्माधानोत्तरंहविर्दोषेऽहविस्थानेआज्यंप्रति
निधिंकृत्वास्थालीपाकंसमाप्यऽष्टंहविरभ्युक्षिप्याग्नाधानादियागःपुनः
कर्तव्यस्तत्रेध्माधानोत्तरंतद्देवतास्थालीपाकेनयक्ष्येइतिसंकल्प्यतद्देवताकं
स्थालीपाकंकुर्यात्।अत्रकारिका।इध्माधानेहुतेऽष्टंप्रधानहविरत्रचेत्तत्स्या
नेजुहुयादाज्यमऽष्टंचजुहोत्यथ।एवंसमाप्ययद्दुष्टंतदभ्युक्षिपेदग्नया।अग्नाधा
नादिकोयागःपुनःकर्तव्यएवेतिप्रागावह नाङ्गदोषेपीतिसूत्रं।अत्रत्यो राम
विशेषोग्रेवक्ष्यते।इध्माधानात्पूर्वंतद्देवताकहविर्दोषेतुइध्माधानात्पूर्वंतद्दे १९२

वताकहविर्दोषनिमित्तंतद्देवताकंहविःपुनरुत्पाद्यपूर्ववत् तत्समापयेत्।अत्रका
रिका।प्रागिध्माधानतोऽष्टेप्रधानहविषित्वथ।तद्धविःपुनरुत्पाद्यपूर्ववत्तत्स
मापयेदिति।नात्रपुनःस्थालीपाकः।अत्रपूर्वोक्तमेवसूत्रं।अंगहविर्दोषेतुनि अंगहविर्दोष
मित्तमंगहविःपुनरुत्पादयिष्यइतिसंकल्प्याज्यंपुनरन्यद्गृहीत्वोत्पूयांगहोमंस
मापयेत्।अत्रकारिका।अंगानांचेद्धविर्दुष्टंतदप्युत्पादयेत्पुनरिति।अत्यंतंगु
णभूतानामितिसूत्रं।स्विष्टकृदर्थदोषेतुस्विष्टकृदर्थदोषनिमित्तमाज्येनस्वि
ष्टकृद्यागंकरिष्यइतिसंकल्प्याज्येनस्विष्टकृतंजुहुयात्।स्विष्टकृद्धविषोदो
ष आज्येनैवसमापयेदितिकारिका।दोषाख्या।प्रच्युतेस्तूनरेवःकेशोःकीटैर्वा
पेध्यसंविभिः।वसासृक्शुक्रमज्जास्थिमूत्रस्वेदपुरीषकैः।श्लेष्मांद्यैरपिवा

भक्षैर्दग्धानिस्युर्हवींषितुभिन्नानिचैवसिक्तानिदुष्टानिस्युःक्षिपेज्जले॥ ॥
स्रुग्भेदेतुअन्यांस्रुचमाहृत्यतयाजुहुयात्।भिन्नांस्रुचंप्राग्दंडंप्रत्यक्पुष्करा
भ्यांक्षिपेत्।एवमन्यान्यपिवानस्पत्यानिप्राग्दंडान्यग्नौक्षिपेत्।अत्रका
रिका।स्रुक्चेज्जिघ्रेततस्यान्यामाहृत्यजुहुयाद्धविः।वानस्पत्यानिभिन्नानि
प्राग्दंडान्यनलेक्षिपेत्।अन्यगृह्याग्निस्वगृह्याग्निसंसर्गेतुअन्यगृह्याग्नि
नास्वगृह्याग्निसंसर्गदोषपरिंअग्नयेविविचयेस्थालीपाकंकरिष्यइतिसंक
ल्पाग्निद्वयस्वामिनौयुगपद्वेसमिधौगृहीत्वातस्मिन्संसृष्टेनोसमारोपमंत्रे
णप्रताप्यछागिरइतिविभज्यलौकिकाग्निद्वयंप्रतिष्ठाप्यस्वांस्वांसमिधंप्रत्य
वरोहतिनिक्षिप्याग्नयेविविचयेस्थालीपाकंअग्नयेविविचयेत्वाजुष्टंनिर्व

पामीतिसर्वंस्थालीपाकवत्।पूर्णाहुतिर्वा स्रुवाहुतिर्वा।अत्रकारिका।संसृष्टो
यस्यगृह्याग्निरन्यगृह्याग्निनायदिचरुंविविचयेकार्योयद्यपूर्णाहुतिर्भवेत्
अग्निर्गुणीभवेदे षांविविचीत्यादिकागुणाइति।अथाग्नेय्यऋचेतिसूत्रं।मिथ य
श्चेद्विविचयेइतिसूत्रंगृहदाहेतुगृहदाहनिमित्तमग्नयेक्षामायस्थालीपाकं
कर्तव्यइतिसंकल्प्याग्नयेक्षा मायत्वाजुष्टंनिर्वपामीत्यादिस्थालीपाकवत्।अ
त्रकारिका।चरुःक्षामायकर्तव्योगृहदाहेषुवैष्णवेतरइति।अग्निवतेक्षामाया
गारदाहइतिसूत्रं।शवाग्निनागृह्याग्निसंसर्गेतुशवाग्निनागृह्याग्नेःसंसर्गे
निमित्तमग्नयेश्वचयेस्थालीपाकंअग्नयेश्वचयेत्वाजुष्टंनिर्वपामीतिस्थाली
पाकवत्।पूर्णाहुतिर्वा।अत्रकारिका।शवाग्निनातुसंसर्गेकुर्वीतश्वचयेचरुं॥

प्रायश्चित्तवत्स्थानेपूर्णाहुतिरिहेष्यतइतिसंस र्जनेग्निनान्येनेतिसूत्रं।अन्यै
नेतत्रअन्यइतिश्चाग्निरुच्यतइतिवृत्तिः पचँग्निना संसर्गेतुपचनाग्नि ना
नास्वगृह्याग्निसं॰निमित्तमग्नयेसंवर्गायस्थाली॰अग्नयेसंवर्गायत्वाजु
ष्टं॰अत्रकारिका।ग्राम्याग्निनातुसंसर्गेसंवर्गायचरुर्भवेदिति।ग्राम्येण
संसर्गायेतिसूत्रं।ग्राम्यपचनाग्निरितिवृत्तिः।विद्युतेनसंसर्गेतुवैद्युतेन
स्वगृह्याग्निसंसर्गनिमित्तमग्नयेसुमतेस्थालीपाकं॰अग्नयेसुमतेत्वा जुष्ट
मिति॰अत्रकारिकावैद्युतेनाथसंसर्गेकुर्यादसुमतेचरुमितिवैद्युतेनासु
मतइतिसूत्रं।अन्यगृह्याग्निनास्वगृह्याग्निसंसर्गादिवैद्युतांतेषुपंचस्वपि राम
निमित्तेषुसंकल्पोत्तरंतमग्निंसमिधिसमारोप्यलौकिकाग्नौप्रत्यवरोहतंत १९४

न्निमित्तंप्रायश्चित्तंकुर्यात्।अत्रार्थेमूलंप्रायश्चित्तप्रदीपे।याज्ञिकानुष्ठानंच।प
र्वण्यार्त्सोश्रुपातेतुपर्वण्यार्त्सोश्रुपातनिमित्तंअग्नयेव्रतभृतेस्था॰अग्नयेव्र॰
पर्वण्यार्त्सोश्रुपातेनकुर्याद्घृतभृतेचरुमितिपर्वणिव्रतलोपेतुपर्वव्रतलोपनि
मित्तंअग्नयेव्रतपतयेस्था॰अग्नयेव्रतपतयेत्वा॰अथवातत्स्थालीपाकेनसमा
नतंत्रंवाकुर्यात्।तत्रसंकल्पः।पर्वणिव्रतलोपनिमित्तंअग्नयेव्रतपतयेस्था
लीपा कंप्रायश्चित्तपूर्वकंदर्शेस्थालीपाकेनपौर्णमासस्थालीपाकेनवायक्ष्य
ये इतिसंकल्प्यपूर्वंअग्नेव्रतपतेनिर्वपस्तत्रःपर्वप्रधानदेवतायाः।अत्रकारिका।
पर्वणिव्रतलोपेतुकुर्याद्घृतपतेश्चरुं।समानतंत्रंकुर्वीतपार्वणेनतुकर्मणेति
।व्रतातिपन्नोव्रतपतयइतिसूत्रं।पवित्रनाशेतुपवित्रनाशनिमित्तमग्नयेपवि

त्रवतेस्यात्ती० अग्नयेपवित्रवतेत्वाऽस्याद्येत्पवित्रपो
र्नाशःस्यात्पवित्रवतेचरुरिति।सर्वत्रविध्यपराधेतत्तद्विध्यपराधनिमित्तंसर्वेप्रा
यश्चित्तंतच्चभूर्भुवस्स्वःस्वाहेति।प्रायश्चित्तविशेषेयत्रनोक्तोभवेद्यदि।होतव्या स्तु
ज्याकृतिस्तत्रभूर्भुवस्स्वरितीहतुःपूर्वंलिखितमपिकारिकाक्रमादत्रलिखितं।स्व
यमग्निप्रज्वलनेस्वयमग्निप्रज्वलननिमित्तंउद्दीप्यस्वेतिद्वाभ्यांसमिधावा
धास्येइतिसंकल्प्यउद्दीप्यस्वजातवेदोपघ्नंनिर्ऋतिंममापमृष्मँमह्यमावहजी श्व
वनंचदिशोदश।मानोहिँसीर्जातवेदोगामश्वंपुरुषंजगत्।अविभ्रदग्नआ
गहिश्रियामापरिपातयेतिमंत्राभ्यांद्वेसमिधावादध्यात्।जुहोतिचोदनाभावा राम
न्नात्रस्वाहाकारः।केचित्स्वाहाकारमपिपठित्वाग्नयइत्यजंतिातत्रकारिका १९५
दमिति१

स्वयंज्वलेच्चेद्दुद्दीप्यस्वेतिद्वाभ्यांसमिद्वयमिति।अग्न्युपघातेतुअग्न्युप घा
धमा तनिमित्तंपुनस्त्वेतिसमिधास्येपुनस्त्वादित्यावसवःसमिंधतांपुनर्ब्रह्मणोवसु रुद्रा
नीथयज्ञैः।घृतेनत्वंतनुवोवर्धयस्वसत्यासंतुयजमानस्यकामाःइतिकेचित्तु
स्वाहेतिकृत्वाआदित्येभ्योरुद्रेभ्योवसुभ्योब्रह्मणइदमितित्यजंति।आधेय
स्योपघातेतुपुनस्त्वेत्येतयासमित्।अग्न्युपघातकानितुत्रिकांडमंडने।श्व
मर्कट शूकररासभकाकखरगालैःकुक्कुटश्वभूदैः।अंत्यजपातकिभिःकुणपैर्वोसू
तिकयापिरजस्वलयावारेतोमूत्रपुरीषदीर्घयाश्रुश्लेष्मशोणितैः।दुष्टास्थि
जु मांसमज्जाभिरन्यैर्वातिदुष्टितैः।आरोपितारणिस्पर्शेकृतेग्नेस्पर्शनेपिवा।आ
त्मारूढेषुमज्जेषुवदेघापतितादिभिः।अथवायोषितंगछेदनृतौकाममोहि

नः।वदंत्येषुनिमित्तेषुकेचिदग्निविनाशनं।तत्रारणिगते वह्नौनष्टेस्यात्पुनराहि
तिः।इतरेषुनिमित्तेषुअग्न्याधेयंप्रचक्षते।यद्यासर्वोपघातेषुपुनस्त्वेतिसमिं
धनमिति।यदिहविःप्रोक्षन्नग्निमभिप्रोक्षेदृतेनयज्ञेयजतेपुनस्त्वादित्या
दृद्धावसवःसमिंधतामितिपुनरग्निमुपसमिंधति। एवंसर्वेष्व
ग्न्युपघातेषुदृत्यापस्तंबसूत्रं॥ ॥अथबोधायनमतेनुपुनस्त्वेत्येतयैवस्तुवा
कृतिरधिका॥ ॥अकृताग्रयणनवान्नप्राशनेतुअकृताग्रयणनवान्नप्राशन
निमित्तंअग्नयेवैश्वानरायस्थालीपाकं॰द्विषदन्नभोजनेतुद्विषदन्नभोजन
निमित्तंअग्नयेवैश्वानरा॰श्रवणाकर्मणिपुरोडाशश्रपणमारभ्यकपालोपधास राम
नपर्यंतंकपालनाशनेतु।हविःश्रपणात्पूर्वंकपालभेदनिमित्तंप्राय॰गायत्र्या १९६

ज्याहुतीरक्षरयासंदधामीतिमंत्रेणनष्टंकपालंसंधानद्रव्येणसंधायअग्निन्नोघर्मो
जीरदानुर्यतआज्ञेस्तदगत्पुनःइध्मोवेदिःपरिधयश्चसर्वेयज्ञस्यासु रनुसंतरं
तु। त्रयस्त्रिंशत्तंतवोयास्तितन्वतइमंयज्ञंस्वध यायैंतेतेभिष्टिंप्रतिदधोम यजं
जत्रस्वाहायज्ञोअप्येतुदेवानितिद्वाभ्यामस्रुकपालंप्रक्षिपेत्॥ततःकपालांतरं
प्रोक्षणादिकृत्वायोजयेत्।कपालोपधानकालेनिहितांगारेपुरोडाश प्रथनान्पूर्व
मनुगतेआज्यंसंस्कृत्यमनस्वतींकृत्वापुनःकपालेंगारंनिधायप्रत्यूहेदितिदीपो
कंतत्रैवोपासनकालादन्यत्रपुरोडाशपतने डुर्गादिगणःप्रायश्चितंसतुप्रागेवो
स्या क्तः। ॥कपालस्याशुचिसंसर्गेतुकपालेंशुचिसंसर्गेनिमित्तंप्रा॰अशुचिसंसृष्टंक
पालंअभिन्नइतिदृर्वोक्ताभ्यांमंत्राभ्यामस्रुप्रक्षिपेत्।अत्रोक्तानांप्रायश्चित्तानां

कारिकाअक्तायणोश्रीयान्नवान्नंयदिवैतनः।वैश्वानरायकर्तव्यश्चरुःपूर्णो
कुतिस्कवाधिपदन्नंयदाभुंक्तेतत्राप्येषविधिर्भवेत्।कपालनाशेप्येषस्या छ्र
वणाकर्मनामनि।कपालंतञ्चवञ्जिन्नंपागेवश्रपणाद्यदि।तदातत्रोक्तमंत्रेणक
पालंसं दधात्यथा।अभिन्नोयर्मइत्याभ्यांमंत्राभ्यां द्वाभ्या
क्षाभ्यामेवक्षिपेज्जले।सूत्रमप्येवमेवा।मन्मयांतरस्याश्चिसंसर्गनिमित्तं
प्रा॰तस्मेवक्षेदनेतुभेदनिमित्तं॰भूमिर्भूमिमगान्माताभातरमयगात्।भूया
ति स्मपुत्रैःपश्चभिर्योनोद्वेषतिसमिद्यतामिमंत्रेणाश्चिसंस्पृष्टंमन्मयांतरंक्षि
न्नंवाभुनिक्षिपेत्।पात्रांतरंयोजयेत्।तत्रकारिकाअन्यत्राश्चिसंबधंमन्म राम
यंभिन्नमेववाभूमिर्भूमीतिमंत्रेणप्रक्षिपेदेवतज्जले।सूत्रम॰श्रवणाकर्मणि १९७

उरोडाशास्फुटे त्पुरोडाशस्फुटनिमित्तंप्रा॰तस्यैवोत्पतनेत्वुत्पतननिमित्तंप्रा॰
किमुत्पतसिकिमुत्प्लोष्टाःशांतःशांतेरिहागहि।अघोरोयज्ञियोभूत्वासीदस
दनं दनंस्वमासीदसौस्वं।उभयत्राप्यनेनैनंबर्हिषिनिधायमाहिंसीर्देवमेरितआ
ज्येनतेजसाज्यस्वमानःकिं चनरीरिषः।योगक्षेमस्यशांत्याअस्मिन्नासीद
बर्हिषि।उभयत्राप्यनेनाभिमंत्रयेत्।अत्रकारिका॰भिद्येद्यदिपुरोडाशउ
च्छेदथवायदि।किमुत्पतसिमंत्रेणबर्हिष्येनंनिधायच।।अभिमंत्रयतेतंचमा
हिंसारितिमंत्रतः।सूत्रमप्येवं॰यजमानोजीवतिमतस्यादृश्रवणेत्वजीवनःस्व
ग्रा स्यमृतेदृश्रवणनिमित्तमग्नयेसुरभिमतेस्वाहेतीपाकं॰पक्षेपूर्णाहुतिंकरिष्ये
तिअग्नयेसुरभिमतेत्वाजुष्टं॰अग्नयेसुरभिमतेस्वाहेतिहोमः।श्रूयतेमत

शादृश्चेद्यजमानेनुजीवति।अग्नयेसुरभिमतेचरुःपूर्णाहुतिस्कवेतिकारिका
।सूत्रमप्येवमेव।यमलजननेतुभार्यायागोर्वायमलजननिमित्तंमरुद्भ्यःस्वा
लीपाकं०मरुद्भ्यस्त्वाजुष्टं०मरुद्भ्यःस्वाहेतिपूर्णाहुतिर्वाकारिका।अथयस्य
वध्रूर्गौर्वाजनयेतय मोततः।मरुद्भ्यश्चरुं कुर्यात्पूर्णाहुतिमथा
पिवा।सूत्रमप्येवमेवाहूयमानाहुतिस्कंदनेतुबहिराहुतिस्कंदननिमित्तंत्रा
०।देवांजनमगन्यज्ञस्तस्यमाशीरवतुवर्द्धतां।भूतिर्घृतेनमुंचनुयज्ञोयज्ञप तु
तिमंहसः॥भूपतयेस्वाहा भुवनपतयेस्वाहा भूतानांपतयेस्वाहायज्ञस्यत्वा
प्रमयोन्मिमयाप्रतिमयाऽस्मैस्कंद०इत्यंतेनमंत्रेणतामाहुतिमभिमृश्यत् राम
लीमग्नौप्रक्षिप्यसर्वेभ्यश्चित्तंजुहुयादितिवृत्तिकृन्मतं।कारिकामतेतु। १९८

श्व

देवांजनइत्यादिप्रतिमयाइत्यंतेनमंत्रेणतांमाहुतिमभिमृश्यइमंस्कंदत्रथमां
अनुघूनिमंचयोनिमनुयश्चपूर्वेः।समानंयोनिमनुसंचरंतंइमंजुहोम्यनु
सप्तहोत्राः।इतितामाहुतिमग्नौप्रक्षिपेत्।नात्रस्वाहाकारः।आहुतिरूयमाना का
तुबहिस्कंदतिवैयदि।देवांजनमगन्यज्ञमित्यंतेनाभिमृश्यतां।इमंस्कंदत्रथमां
हुतिंकृत्वाप्रक्षिपेदग्नेपुनः।वृत्तिकृन्मतंतु।वृत्तौज्ञेयंसूत्रमप्येवमेव।अना
हुतिरूपहविःस्कंदनेतुस्कंदननिमित्तंत्रा०देवांजनमगन्यज्ञस्तस्यमाशी।
रवतुवर्द्धतां।भूतिर्घृतेनमुंचनुयज्ञोयज्ञपतिमंहसःभूपतयेस्वाहा भुव न पतयेस्वा
हाभूतानांपतयेस्वाहा यज्ञस्यत्वाप्रेमयंप्रतिमयाऽस्मैस्कंदइतिमंत्रेणस्कंदंहविर
भिमृश्यसर्वेभ्यश्चित्तंजुहुयान्नान्यत्।अवशिष्टेनप्रचरेत्तंशेषाभावेपुन

मयोन्मयाभि२

मंत्रनिर्वापादिकुर्यात्सर्वप्रायश्चित्तंचदेवांजनेतिसर्वत्रस्कन्नंत्वभिमृशेद्धविः॥
निमित्तानंतरंसर्वप्रायश्चितंभवेदिह।आज्यसंस्कारात्प्रागेवयद्दोषउत्पद्यते
तदाज्यसंस्कारानंतरंप्रायश्चित्तंकुर्यात्।प्रागेवोत्पद्यतेदोषआज्यसंस्कारतोय
दि।प्रायश्चित्तंभवेदाज्यसंस्कारानंतरंततः।सर्वत्राकृतिमात्रस्यस्कंदनेप्राय
श्चितमिष्यते।आकृतिप्रमाणंचद्रव्याणांस्रुवबिलपूरणपर्यंतं।स्रुवबि
लंचांगुष्ठपर्वप्रवेशनपर्याप्तं।कृतिनद्रव्याणांत्वंगुष्ठपर्वमात्रस्कंदनेप्राय
श्चितं।यदनाकृतिमात्रंविप्रुडेव यदनाकृतिमा
त्रंविप्रुडेवसेत्यापस्तंबसूत्रं।भस्मन्यग्नौहविर्घ्नेवेद्यांस्तीर्णेचबर्हिषि।कू राम
र्चेविप्रस्यपाणौचस्कं नदोषोनविद्यतइतिदीपोक्तं।अग्नौस्कन्नदोषाप १९९

वादःतापसमयेतरविषयःतत्रतापादुत्सेकनिस्तावादौप्रायश्चितान्नानात्।कूर्चो
ग्निहोत्रेप्रसिद्धः।देवतायुक्रमेषुतुदेवतायुक्रमनिमित्तंप्रा·यद्योदेवाइत्यस्या
भितपामरुतस्त्विष्टुप्।तत्तद्युक्रमनिमित्तमाज्याकृतिहोमे०यद्योदेवाअति
पात्यानिवाच्चाचप्रयुतीदेवहेळनंअरायोअस्मांअभिदुछुनायतेन्यत्रा स्म
न्मरुतस्तंनिधेतनस्वाहेतिब्रह्मास्रुवेणाज्याकृतिंजुहुयात्सर्वप्रायश्चित्तंजु
हुयात्।यजमानःस्वगृहमुख्यंद्रव्यंब्रह्मणेदक्षिणांदद्यात्।ब्रह्माभावेय
द्योदेवेतिस्वयंहुत्वान्यस्मैब्राह्मणायद्रव्यंदद्यात्।इदमेवप्रायश्चित्तंमंत्रयुक्र
मेद्रव्ययुक्रमेअवदानयुक्रमेनिर्वापयुक्रमेयागयुक्रमइत्यादितन्नद्युक्र
मेज्ञेयं।देवतेअनुवाकेइत्यादिसूत्रं।कारि०युक्रमोदेवतानांतुसंकल्पादोभ

वेद्यदिमंत्राणांव्युक्रमस्तद्धोमकालेभवेद्यदिमध्यात्पूर्वार्द्धतश्चेवव्युक्रम
श्चभवेद्यदिद्रव्याणांव्युक्रमःस्याच्चेत्तथानिर्वपणादिषुयद्धोदेवाऋचाब्रह्मा
जुह्वयाच्चस्रुवाऽऽहुतिं।यन्मुख्यंस्वगृह्यंद्रव्यंहोमकर्त्रेददातितत्।यजमान
स्तूजुह्वयात्तद्ब्रह्माभावेस्रुवाऽऽहुतिं।

कस्मैचिद्ब्राह्मणायस्मिन्पक्षे
द्रव्यंददातितत्।होतव्यैकाऽऽहुतिश्चात्रव्याहृत्यारव्येसमुच्चयात्।यागात्प्राक्
व्युक्रमेज्ञातेसतियद्धोदेवाइत्याद्यक्तप्रायश्चित्तंकृत्वायागंकुर्यात्।प्राग्यागात्
व्युक्रमेज्ञातेइदंकृत्वायजेत्तनः॥विहितदेवतायागोत्तरंव्युक्रमेज्ञातेसतिय ११म
द्धोदेवाइत्यादिप्रायश्चितमेवकुर्यात्पुनर्यागावृत्तिः।अविज्ञातेविपर्यासेवि २००
न

हितांदेवतांस्मरन्नाऽऽहवांस्तदाऽर्ध्वंतुव्युक्रंमावगमेसति॥प्रायश्चितमिदंकृत्वा
यागंनाकर्त्तयेत्तदा॥यदाविहितदेवतायागोत्तरंविहितदेवतायागाकरणेज्ञा
तेयद्धोऽक्तप्रायश्चित्तंकृत्वाविहितदेवतायागःपुनःकर्तव्यः।यदात्वविहि
तांदेवतांस्मर न्नाहवांस्तदाप्रायश्चित्तमिदंकृत्वायागंचावर्तयेत्तदा।यागात्वा
गित्यादौवृत्तिरप्येवमेव॥ ॥हविर्योऽप्राकेतुःपक्वेनहविषायागंसमाप्ययाग
साधनीभूतहविरपक्वतानिमित्तंचतुःशरावपरिमितव्रीहिनिष्पादितौदने
नचतुरोब्राह्मणान्भोजयिष्येऽतिसंकल्प्योक्तमोदनंकृत्वाचतुरोब्राह्मणा
न्भोजयेत्एकभोजनपर्याप्तमन्नंशरावमिति।कारिका।यदाहविरपक्वंस्या
त्तेनैवहविषायजेत्।चतुःशरावमात्रंतुपचेद्व्रीहिमितौदनं।भोजयेत्तेनचा

न्नेनचतुरोब्राह्मणानथाहविषिडःस्रुतइत्यादिसूत्रेणयद्वाबौधायनमतात्सुरो
ड्डाशादोहविष्मतेरुद्रायत्वाहेतिस्रुवाऽऽहुतिंजुहुयात्।तेनैवहविषायजे
त।हविषोऽवद्यतिवेत्वाहेतिस्रुवाऽऽहुतिंहुत्वाततस्तेनैवयजेत।सूत्रमप्येव
मेवाहविर्दोहेनुयदावदानपर्योसमदग्धंलभ्यतेतदातेनैवयागोन तुवैशे
षिकंप्रायश्चित्तं।यदात्ववदानपर्योघ्नमदग्धंलभ्यतेतदातावन्मात्रेणैवयागं न
हुत्वातंत्रशेषंसमाप्यहविर्दोहनिमित्तंपुनर्योगंकरिष्यइतिसंकल्प्यान्वाधा
नादिपुनर्योगंकुर्यात्। बहुदग्धमदग्धंवाकिंचिदेवयदाहविःशिष्टेनेष्ट्वापुन
र्योगस्यादारभ्यादितस्तदा॥सूत्रमप्येवमेवायद्वाबौधायनमतात्स्रुवाऽऽहुतिः
निर्ऋतयेस्वाहा निर्ऋतयइदंशिष्टेनप्रधानंकुर्यादाज्येनस्रि

एहुत्वाप्रतिपत्तेर्नो पः।बौधा॥सूत्रमप्येवमेव॥॥सर्वहविर्दोहेनुसर्वहविर्दो
हनिमित्तंपुनर्हविरंतरोत्पत्तिंकरिष्यइतिसंकल्प्य तस्मिन्नेवयागे निर्वापादि
पुनर्हविरंतरो त्पत्तिंहुत्वासएवयागःसमापनीयःपुनर्नोक्तरीत्यायागावृ
त्तिः।सूत्रमप्येवमेव।हुत्वेदंदग्धंयदानुस्यात्पुनरुत्पादंहविःसएवयागःक
र्तव्यःपुनर्योगस्तूनेप्यतईतिकारिका॥सूत्रमप्येवमेवायद्वाबौधायनमतादि
दग्धंजलेप्रास्याज्यभागानंतरमिंदादिगणेनस्रुवाज्याऽऽहुतीर्जुहुयात्।यन्म
आत्मनोमिंदाभूदग्निस्तत्पुनराहर्जातवेदाश्चिर्वर्षणिस्वाहाअग्नयेजातवेद
सइदंपुनरग्निश्चक्षुरदात्पुनरिंद्रोबृहस्पतिः।पुनर्नोअश्विनायुवंचक्षुराधत्त
मक्ष्योस्वाहाअग्नीद्बृहस्पत्यश्विभ्यइदंभूःस्वाहाअग्नयइदंभुवःस्वाहा

वायवऽदं॰सुवःस्वाहासूर्यायेदं॰भूर्भुवःसुवःस्वॉप्रजापतयऽदं॰ॐस्वाहाब्रह्म
णऽदंपञ्चऋतेविशोयथाप्रदेववरुणव्रतंमिनीमसिधविधविस्वाहा।य
ल्किं चेदंवरुणदैव्येजनेभिद्रोहंमनुष्याश्चरामसि।अचित्तीयत्तवधर्मायुयोपिम
मानस्तस्मादेनसोदेवरीरिषःस्वाहाकितवासोयद्रिरिपुर्दीवियद्वाघासत्य र्न
मुतयन्नविद्मासर्वोताविष्यशिथिरेवदेवाथातेस्यामवॅणमियासस्वाहा।तिस्र रु
ष्पिवरुणायेदं॰इतितिस्रः तंतुं तन्वन्नजसोभानुमन्विहिज्योतिष्मतःपथो व
रक्षधियाकृतान्।अनुल्बणंवयतजोगुवामपोमनुर्भजनयादेव्यंजनँ स्वा
हा॥उद्बुध्यस्वाग्नेप्रतिजागृह्येनमिष्टापूर्तेसँसृजेथामयंचापुनःकृण्वँस्त्वापि राम
तरंमुवानमवृजाँसीत्वयितंतुमेतँस्वाहा।त्रयस्त्रिँशत्तंतवोयेवितन्निरेयऽमं २०२

यन्नँसवधयादद्रंतेतेषांछिन्नंप्रत्येतद्दधामिस्वाहाघर्मोदेवाँअप्येतुस्वाहाति
रश्चग्नयेतनुमत ऽदं॰।तृतीयायादेवेभ्यऽदंवाअन्यग्निरुषसामय
मस्यद न्वहानिप्रथमोजातवेदाः॥अनुसूर्यस्यपुरुत्राचरन्तमीननुद्यावा
पृथिवीआततानस्वाहा।अग्नयेजातवेदसऽदं॰मनोज्योतिर्जुषतामाज्यं
विछिन्नंयज्ञꣳसमिमंदधातु।माऽएषउषसोनिमुचच्यवताꣳसंदधामिहवि
च घाघृतेनस्वाहाज्योतिषऽदं॰।भूरग्नयेपृथिव्यैचमहतेचस्वाहाअग्नयेपृ
थिव्यैमहतऽदं॰भुवोवायवेचान्तरिक्षायचमहतेचस्वाहा।वायवेन्तरिक्षा
यमहतऽदं॰सुवरादित्यायचदिवेचमहतेचस्वाहाआदित्यायदिवेमहतऽ
व दं॰भूर्भुवःसुवश्चन्द्रमसेचनक्षत्रेभ्यश्चदिग्भ्यॅमहतेचस्वाहाचंद्रम सेनक्षत्रे

भ्योदिग्भ्योमहतश्दंष्सप्तेअग्नेसमिधःसप्तजिह्वाःसप्तर्षयःसप्तधाम
प्रियाणि।सप्तहोत्राःसप्तधात्वायजंतिसप्तयोनीराप्णस्वाघृतेनस्वाहा।अ
ग्नयेसप्तवतश्दं।प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव।
यत्कामास्तेजुहूमस्तन्नोअस्तुवयंस्यामपतयोरयीणांस्वाहाप्रजापतय
श्दंणअयंमिंदादिगणः।अत्रसूत्रंमिंदाहुतीर्हुत्वेव्याहृत्यःप्रणवा
धिकाः।वारुण्यस्तंतुमत्यश्चान्वग्निश्चैमनस्वतीमहाव्याहृतयःसप्तप्रजा व
पत्यंतपैवच।सप्तेतिसप्तेअग्नेइतिमंत्रोक्तिः।एकविंशतिमंत्रोमिंदादि
गणइतिप्रायश्चित्तप्रदीपोक्तं।एवंकृत्वापुनरन्यद्विनिरूप्ययजेदाज्ये राम
नवायजेत्।काम्य नैमित्तकयोःपुनर्निर्वापएवश्रुत्युक्तंप्रायश्चित्तंद्विकायां २०३

अत्रबौधायनसूत्रं।अथयदिसर्वमेवदंध्यंस्यादपोभ्यवहृत्यमिंदाहुतीर्हुत्वा
थान्यंनिर्वपेदाज्येनवाप्रचरेत्सैवतत्रप्रायश्चित्तिरिति॥ ॥चरोश्चप्यमाणेप्रा
ग्दिक्षितापाहुत्यसिक्तेअग्नयेस्वाहेतिस्रुवाहुतिःयदिदक्षिणतःयमायस्वा
हेति।यदिपश्चाद्वरुणायस्वाहेति।यद्धनरतःसोमायस्वाहेति।सुगपत्स
र्वतउत्सेकेसर्वाहुतीर्जुहुयात्।विदिक्षूत्सेकेव्याहृतीर्जुहुयात्।उत्सिक्तंच
रुमाज्येनाप्याययति। आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं।भवा यं
वाजस्यसंगथे।सतेपयाँसिसमुयंतुवाजाःसंवृत्र्याण्यक्षितारिषाहः।आप्याय
मानोअमृतायसोमदिविश्रवाँस्युत्तमानिधिष्व।इतिद्वाभ्यांमिंदाहुतीर्हुत्व
त्मआत्मनःपुनरग्निरितिजुहुयात्।चर्वादीनांनिस्त्वेवंगोदिगणःप्रायश्चि

न्नोऽङ्गादिगणःप्रागेवोक्तः।इतिदीपोक्तं।अत्रबो०सूत्रं।यस्येयस्येदृग्पुत्से
क्तंतस्येतस्येदेवतायैस्रुवाऽऽकृतिंजुहुयात्।यदिप्रागग्नेयंयदिदक्षिणतोयमाय
यदिपश्चाद्वरुणायघृतरतःसोमायेयदिसर्वतएवोसिच्यतेताभ्यःसर्वाभ्यो
देवताभ्यःस्रुवाऽऽकृतीर्जुहुयान्नमाज्येना प्यायस्वसमेतुविश्वतइत्याप्याय स्व
संतइतीति॥॥पाकात्पूर्वंहविषोंऽशाद्युपहतौप्रक्षालनेनैवांक्षणेनवाशुद्धिः न
इस्युक्तमापदेव्यां॥॥अवदानंडपंचेत्तत एवपुनरवदायजुहुयात्।मध्यात्पू
र्वार्द्धतोवत्तंयदि डपंहविर्भवेत्।तस्येवहविषोवद्येन्मध्यात्पूर्वार्द्धतःपुनरिति
कारिका।अवदानदोषेपुनरायतनादवदानमिंसूत्रं॥॥सर्वत्रहविर्देवताया राम
ज्यानुवाक्यानांऽऽकृताऽऽकृतभ्रेषघृतरितेविपर्यासेत्वन्नोअग्नेसत्वंनोअग्नेइत्ये २०५
ति२

ताभ्यांस्रुवाऽऽकृतीर्जुहुयात्।अस्यबोधायनसूत्रस्यविस्तारःऽऽकृतस्यभ्रेषोनाशोअन
अ म्नोपतनंऽऽकृतस्यभ्रेषोनाशोवत्तस्यनाशः।तत्रत्वन्नःसत्वन्नइत्याऽऽकृत्वापुनःस्या हुती
ना दवदायजेत्।एकावदानाद्यकरणेयागात्पूर्वंज्ञातेसतित्वन्नःसत्वन्नइत्याऽऽकृती
ऽऽकृत्वापुनर्विस्मृतावदानमवदायजेत्।एकावदानादियागेऽऽकृतेत्वन्नःसत्वन
इत्याऽऽकृतीपुनर्योगः।हविषामंतरायः।एकावदानाद्यकरणं वाऽऽहविष्कर्मणि
एकस्यहविषोकरणंवा।हविषांविपर्यासःव्यत्यासः।देवतायाज्यानुवाक्याना
मेकस्याविस्मरणमंतरायःविपर्यासस्तूव्यत्यासः।आऽऽकृतिभ्रेषोऽऽकृतेर्नाशःयथा आ
र्ग्विज्ञातदेवताऽऽकृतीर्नेष्यतीतिअयमाऽऽकृतेर्ऽऽकृतभ्रेषःआऽऽकृतेरऽऽकृतभ्रेषस्तूपा
वत्प्रयोगसमाप्तिस्तावदाऽऽकृतेरकरणंतत्रसर्वत्रत्वन्नोअग्नेसत्वंनोअग्नेइति

देस्रुवाऽऽज्यहवींषि जुहुयात्। हविर्देवताधर्मोणांयाज्यानुवाक्यानांपार्वणाद्यंगहोमानां
च व्यत्यासेदेस्रुवाऽऽज्यानि जुहुयात्। याज्यानुवाक्ययोः परस्परव्यत्यासेतथात
देवत्यान्ययाज्य यायागेऽऽते पित्वन्नऽसत्वन्नऽ त्याऽऽज्यानीएवनपुनर्यागः।अं
तरिताम्रचेज्जपेत्। भिन्नदेवत्ययाज्यायागे कृतेत्वन्नःसत्वन्नऽत्याऽऽज्यानी ऽऽ
ज्यापुनर्यागंकुर्यादितिदीपोक्तं। अत्रापस्तंबसूत्रमपि। त्वन्नोअग्नेसत्वन्नोअ
ग्नेसर्वत्रांतरायेविपर्यासेचैते आऽऽज्यानीत्येके॥ ॥पार्वणाद्यंगहोमानामित्यत्र
स्मार्तेभ्याश्चेत्यादयआज्यभागादयोवा॥ ॥पौर्णमासस्थालीपाकेअग्नि
रग्नीषोमोप्रधानदेवतेतयोर्द्वौचरूसहस्रपणपक्षेद्वौचरूभागैर्वातत्राग्न
येचरूभागेनअग्नीषोमीययागेऽऽतेऽऽषोत्तायेततदाअग्नीषोमीयचरू

भागेनअग्नयेयागःकर्तव्यः। तत्रहृत्तोसन्निहितत्वात्तस्यद्रव्यस्यकार्योतरस्य
नि चाभावात्तस्मिन्संहितेसतिद्रव्यंद्रव्यांतरत्वोपपादनमशक्यंस्तितस्मादेवंऽ
ति त्वायद्वोदर्वेप्रायश्चितमेवकुर्योत। अत्रव्याहृतिहोमश्चकार्यः एतद्विपर्यो
सेंतरितेऽत्यत्रैवोक्तमितिवृत्तिः॥ ॥एवंदर्शादिस्थलेपिज्ञेयं॥ ॥अथदीपो
ऽकंसर्वत्रहविषिस्थितेभागेनदृष्टस्थानादवदायपुनर्यागः कार्यः। हविष्यवि
द्यमानेहविरंतरंनिरूप्ययागः कार्यः। प्रक्रांतमाज्येनसमाप्यपुनर्योगोवा॥
ने सर्वत्रावदानेअ ऽऽतेहविषिदोषदर्शेअवत्तेहविरसुशीतभस्मनिवाप्रक्षिप्य
त्वन्नऽसत्वन्नऽस्याऽऽहुतीऽऽहुत्वापुनरायतनादवदाययजेत। ॥अवदानानंतरं
पुरोडाशादौदोषदर्शनेचतेनहविषाप्रधानयागंऽऽत्वाऽऽहुमसुप्रक्षिप्यत्व

न्नःसत्वन्नइतिद्वेस्रुवाकृतीकृत्वाध्रुवाज्यास्विष्टकृदादिकुर्यात्॥पुनर्योगःश्रोते
ध्रुवाज्यौस्मार्तेआज्यस्थाल्यः॥॥अवदानकालेपुरोडाशादोकेशादिदोषद
र्शनेदुष्टंहविरप्रक्षिप्यस्रुवेणादायहविरंतरंनिरूप्यत्वन्नःसत्वंनइतिऊ
त्वातेनयागंकुर्यात्।प्रधानहविषांपरस्परंविपर्यासेमिंदादिगणः।त्वन्नःस
त्वन्नइतिचद्वयोः समुच्चयःमिंदादिगणःप्रागेवोक्तः।प्रधानहविर्धर्मेविप
र्यासेत्वन्नःसत्वंनइतिद्वयंमिंदाकृतिद्वयंवाप्रायश्चित्तं।मिंदाकृतिद्वयं यन्म
आत्मनःपुनरग्निरि।अंगहोमानामकरणेकर्मण्यसमाप्तेपुनर्योगः॥॥समा
प्तेकर्मणित्वन्नःसत्वन्नइत्याकृतीएवनपुनर्योगःप्रधानदेवतांतरायेस्विष्टकृ
तः प्राक्स्मरणेत्वन्नःसत्वन्नइत्याकृतीद्वेस्रुमिंदाकृतीकृत्वाशूर्पोदानादिपुनरु

त्पाद्ययागंकुर्यात्।स्विष्टकृदूर्ध्वंस्मरणेतत्समाप्यपुनर्योगंकुर्यादित्येतदंतंप्राय
श्चित्तप्रदीपोक्तं॥॥प्रयाजाद्यंगयज्ञाकरणेऽष्टेभ्यःस्वाहेत्यादिभिरष्टौस्रुवा
कृतीर्जुह्याद्याहुतीश्चेतिदीपेउक्तत्वात्स्मार्तेआज्यभागाद्यंगयज्ञानामकर
णेस्रुवेणाज्याकृतीर्जुह्यात्॥॥इष्टेभ्यःस्वाहाइष्टेभ्यइदं॰वषडनिष्टेभ्यःस्वा
हावषडनिष्टेभ्यइदं॰मे यजंडुरिष्टेस्वाहाडुरिष्ट्या इदं॰निष्कृत्येस्वाहा
निष्कृत्याइदं॰दौरार्ध्यैस्वाहादौरार्ध्योइदं॰देवीभ्यस्त्वनूभ्यःस्वाहात्वनूभ्यइदं॰
समध्यैस्वाहासमध्याइदं॰।भूर्भुवःस्वःस्वाहाप्रजापतयइदं॰अंगयज्ञानाम
करणेप्रायश्चित्तमेवंपुनर्योगः॥॥प्रधानयज्ञेविभ्रेषेप्रायश्चित्तंकृत्वापुनर्योगः
कर्त्तव्यः॥॥ऋत्विजांमंत्रोच्चारणकालेपांशुप्रभृतिवाचःस्थानानांभ्रेषेउदा

ऋादिस्वरभ्रेषेअक्षरपदमात्राभ्रेषेचाभिर्गीर्भिरितिस्तुवाकृतिंजुकुयात्।आ
भिर्गीर्भिर्यदतोनऊनमाप्याययहरिवोवर्द्धमानः।यदास्तोत्भ्योमह्यिगोत्रा
रूजासिभूयिष्ठ भाजोअधतेस्यामस्वाहाइंद्रायहरिवतइदं॰॥सर्वत्रइदम
त्रकर्त्तव्यमित्यनाज्ञातमायश्चित्तेघनाज्ञातंपुरुषसम्मितंहविस्तुवाकृती
जुकुयात्।अनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथुाग्नेतदस्यकल्पयत्वँ
हिवेत्ययथातथँस्वाहाअग्नयइदं।पुरुषसंमितोयज्ञोयज्ञःपुरुषसंमितः।
अग्नेतदस्यकल्पयत्वँहिवेच्छयथातथँस्वाहाअग्नयइदं॰।दोषदुष्टेनस्रुक्
त देनवाहविषाअङ्गैप्रधानयागेप्रणवव्याहृतीर्जुकुयात्॥॥केचनकारिको राम
क्तहविर्दोषाःप्रागुक्तास्तथापीदानींवोधायनसूत्रोक्ताहविर्दो षदीपानुसा २०७

रेणलिख्यंते॥॥अत्रसूत्रंअथहविर्दोषान्व्याख्यास्यामःयेहविर्दुष्यंतिनात्वक्षा
मःअश्वदेहवर्त्ति नीलमक्षिकागवांमंगवर्त्तिन्याश्वांतिका नत्यवर्तिमत्कु
णःचैलशिरोवर्तिनीयूका।मलपिंडकारिकीटःश्वमार्जारनकुलमर्कटाः
प्रसिद्धाःध्वांक्षःकाकः।आखुर्मूषकः तेषामन्येषां चपुरीषंमलः
त केशःप्रसिद्धःसिकःपरिहिँवस नंचलः।पदंपादः।मृतनखःछिन्ननखः।कु
नखोऽपटनखःपूतिर्दुष्टगंधवहःऽसःमुखजोविसुषःस्वेदःप्रसि
द्धःअसृक्रुधिरंस्नेहोनासिकाकफः।अश्रुनयनांबु।कासःश्लेष्माक्ष
वथुक्षुतं।आई व्रणंचेति।एतैरुपहतं।वसाश्रुक्मसृक्मज्जामूत्रविट्
कर्णविट्नखाः।श्लेष्माश्रुपूर्त्तिकास्वेदाःदशैतेनृणांमलाइति।एतैश्चा

पहतं।रजस्वलासूतिकाभ्यांस्पृष्टंदृष्टं।अप्रपतनाशुचिनादृष्टंस्पृष्टंचभ्रूण
घ्नेनवाभ्रूणाःपंचशिश्युर्यज्वागर्भिणीब्राह्मणान्पशति।एतेषामन्यंमंयो त
हंतिसभ्रूणघ्नः।तेनदृष्टंस्पृष्टंच।अपात्रेणग्रामचंडालादिनादृष्टंस्पृष्टंच
व अजीचरजकोल्लोहकारश्चैश्नुनाधिपः।तक्षकोवागुरिनियामचंडालका रि
स्मृताः।अमेध्येदेशेवास्कंनं।यत्रप्रसूयतेनारी म्रियतेदह्यतेपिवा।चांडा
लाध्युषितेयत्रयत्रविष्ठादिसंगतिः।एवंकृत्वापभ्रयिष्ठाभ्रूरमेध्याप्रकीर्ति
ता।एवंभूतमेध्यदेशेस्कंनं च।एवंडुष्टंहविरप्सुक्षीत भस्मनिवाप्रक्षिप्यमिं
दाकृतीचव्याहृतीश्चकृत्वाशूर्पादानप्रभृतिहविरंतरमुत्पाद्ययजेत।अश्रा राम
क्तोक्षिप्रकर्तव्यताप्राप्तौआज्येनवायजेत।आज्यपक्षेमनस्वतीचप्रायश्चि २·८

त्तं॥क्षुद्रकीटमक्षिकापिपीलिकवर्जं।क्षुद्रकीटोघुणादिःमक्षिकापिपीलि
केतसिद्धे।एषुप्रमादाद्विपतितेपुनर्दोषः।सर्वत्रक्षुद्रकीटमक्षिका
पिपीलिकादीनांआपंचमंउद्धृत्याभ्युक्ष्योत्पूयजुहुयात॥ऊर्ध्वंचेद्दुष्ट त
मेवेतिजे मिनिः॥॥दुष्टेनहविषायागेकृतेपश्चाद्दोषदर्शनेपुनर्यागो
नकर्तव्यः॥तथाहिकात्यायनः।दुष्टेनहविषायागाग्निनृत्तौपश्चाद्दो
षसंवित्तिर्भवतितत्कृतमेवेति।अदुष्टेनद्रव्येणपुनरावृत्तिःकंचित्॥ ॥
आज्यापहृतौतज्जलेप्रक्षिप्यान्यत्संस्कृत्यतेनप्रचारइत्यूर्ध्वमापदेव्यो
नो ॥कृतेहविष्यनग्नोपतितेत्वंअग्नेसत्वंनोअग्नेइत्याभ्यांस्रुवाकृतीकृत्वा
पुनरवदायजेतेत्यूर्ध्वमापदेव्यो।यद्यप्रत्तदेवतंहविर्व्यापद्येतान्यद्य

बिस्तदैवतंनिर्वपेन्नत्रस्रुगादानंघृतयोमं त्राआवर्तेरन्यावदंतंवायंव्याप
द्योतमदिप्रत्तदैवतमाज्येनश्रोषं मापयेद्यस्यसर्वोणिहवींषिनश्येयुर्दुष्येयु
रपरियुक्तोज्येनतादेवताःप्रतिसंख्याययजेत्तन्नामिष्टि मनुल्बणंतन्वीत
यज्ञोयज्ञस्यप्रायश्चित्तिरपोव्यापन्नंभ्यवहरंतीतिविज्ञायतेयदार्योणा
मभोजनीयंस्यान्नतेनयज्ञेनेत्यापस्तंबसूत्रं॥प्रधानहविर्व्यापत्तौआज्येन
प्रयोगंसमाप्यपुनर्व्यापन्नहविर्मात्रस्यान्वाधानादिपुनर्योगः कार्यइत्क
ल्पकारिकायां॥तत्रहविषांव्यापत्तावपिपुनःप्रयोगाज्ञाकौआज्यभागानं
तरंजुहोतियन्मआत्मनोमिदाभूदग्निःस्वाहाअग्नयेजातवेदसेइदं
पुनरग्नि॰॥अग्विभ्यइदं॰मनोज्योति॰मनसेज्योतिषइदं॰॥यदाहभग

१०९

वान्बौधायनः॥आज्येनवाप्रचरेत्सैवतंत्रप्रायश्चित्तिरपि।खलुक्षिप्रसंस्कार
तमाज्यंब्रुवतइतिमिदाकृतीकृत्वामनस्वतीजुहोतिसैवतंत्रप्रायश्चि त्तिरितिवि
ज्ञायतइति।तदेतद्यदाकदाचित्यापदेव्या॥॥एवंव्युत्क्रमेणनिर्वापे यद्योदेवे
तिप्रायश्चित्तमुक्तंतत्रभागिन्यैदेवतायैनिरूप्यप्रोक्षणादिषुअभागिन्युक्ते
खनेअनंतरंविस्मृतस्मरणंचेत्सर्वंवद्योदेवेतिस्रुवाकृतिंकृत्वाविस्मृतदेव
तायैयागंकुर्यात्॥अभागिन्यैनिरूप्यभागिन्याःस्मृतिश्चे न्निरुप्यंअमुष्मैत्वे
त्यग्निमस्यअमुष्मैस्वाहेतिसर्वमग्नौजुहुयात्॥तत्रयद्योदेवाःत्वन्नोअग्नेस
त्वन्नोअग्नेइतिस्रुवाकृतीर्जुहुयात्।विस्मृत्वापुनर्भागिन्यैनिर्वपेत्।एतदा
सहनात्मकं।तदनंतरंस्मरणेविस्मृतदेवतायैनिरूप्यउभयोर्योगः।तत्रमिंदा

कृतीजुहुयात्।यन्मआत्मनः॰पुनरग्नि॰ततोव्याहृतिभिर्हुत्वाऽंस्वाहाऽइत्सुक्
मापदेव्यां॥दर्शपूर्णमासादिषुहविष्वासादितेषुहविषामुपरियदिकाकआ
सीदेन्नदाऽइदंविष्णुर्विचक्रमइतिस्रुवाकृतिंकृत्वातत्रविरमुनिक्षिप्यस्रुपी दा
नादिहविरंतरमुत्पाद्यप्रचरेत्।एवमादि सोमानामपीत्सुक्रंप्रायश्चित्त दी
पे।अत्रापस्तंबसूत्रं तुयदिहवींष्यासन्नानिरुक्षन्नाकुनिरूपर्सुपर्यतिचरेत्पक्षा
भ्यामाधून्वानश्चाभिनिषीदेदिदंविष्णुरित्याकृतिंजुहुयाद्यद्युच्चैःपतेन्नतदा
द्रियेतेति। योयक्ष्येऽत्कल्कान्वाधानादियत्किंचित्कर्मकृत्वायदिनयेतसविष्ट्र
ष्टेष्ट्वायजेतेतिदीपेउक्त्वादेवंसतिविष्टष्टेष्टिदेवताकःस्यात्पाकःकार्यः
सतुप्रागेवोक्तः॥ श्रवणाकर्मणिएककपालपुरोडाशमपर्यावर्तयन्प्रतिष्ठि

जे राम २१०

तमखंडितंसर्वकृतंजुहुयात्।पद्येककपालःपुरोडाशःसर्वकृत्परावर्त्तेतयज
मानःस्वस्थानेप्रतिष्ठा पयेत्।प्रजापतेवर्तनिमनुवर्त्तस्वेतिमंत्रेण।प्रतिक्षत्रेप्रति
ष्ठामिराष्ट्रमिश्रमन्याभिवावृधेऽइत्येताभ्यामनुमंत्रय ते।अस्कांद्यौः पृथिवीम
स्कान्नपोमुवागाः।स्कन्त्रेमाविश्वाभुवनास्कन्नोयज्ञःप्रजनयतु।अस्कानज
निष्यजन्यास्कन्नाजायतेवृषा।स्कन्नात्प्रजनिषीमहीत्येभ्यांस्रुवाकृतीजुहु
यात्।यथालिंगंत्यागः प्रक्रांतंकर्मसमाप्यएककपालपुरोडाशपरावर्त्तेनप्रा
यश्चित्तार्थेअग्नयेवैश्वानरायस्थालीपाकंकुर्यात्।अथवातदेवाकृतिः।दीपा
नुसारेणेदमुक्तं।अत्रबोधायनसूत्रं।अथपद्येककपालःपरावर्त्तेतप्रजापते
वर्त्तनिमनुवर्तस्वेत्यध्वर्युः स्वस्थानेप्रतिष्ठापयेत्प्रतिक्षत्रेप्रतिष्ठामिराष्ट्रेविश्व

मन्यामिवाहधइत्येताभ्यांयजमानोनुमंत्रयेताद्यांद्यौःपृथिवी मस्कानजनी
त्येताभ्यांस्त्रुवाहुतीर्जुहुयात्संस्थितेवैश्वानरीं निर्वपेदिति॥॥दर्शपूर्णमासादिषु
सर्वकर्मसूत्तरपूरस्तात्सौविष्टकृतमितिसूत्रादौपासनहोमस्थलेआप्रधानाहु
तीनांस्विष्टकृत्संसर्गेन॥अथदर्शपूर्णस्थालीपाकयोर्मुख्यकालःपूर्वोक्तः॥
तत्रैधानाहुतीनांस्विष्टकृतश्चैनकार्यःतत्संगेप्रायश्चित्तादेशाम्नानात्सर्वप्रा संगो
यश्चित्तंकर्त्तव्यमितिदिक्॥॥पौर्णमास्याइष्टेरमावास्यातिथेर्वोक्तगौणकालः
अमावास्याइष्टेःपौर्णमासीतिथेर्वागौणकालःअमावास्यस्यपौर्णमासस्यका
लोनातीयादापौर्णमासादामावास्यस्येतिबोधायनसूत्रं।पुनःप्रादीपे।आपत्सु राम
गौणकालेस्यादिष्टिः।अनापदिगौणकालेष्टिंनकुर्यात्कुर्याच्चेद्यथोक्तप्राय २११

इ

श्चित्तपूर्वकमिष्टिंकुर्यात्॥॥अत्रदीपेबोधायनीयद्वैधसूत्रोक्तास्त्रयःपक्षाउ
क्तास्तत्रनखिलितास्तत्रयदाएकैकस्मिन्पर्वण्यतिक्रांतेप्राप्तकालस्यदर्शपौ
र्णमासस्यवायआग्नेयोष्टाकपालस्तमेवाग्निंपथिकृंणविशिष्टंकृत्वायजे
त।आवाहनादिनिगदेष्वग्निंपथिकृतंनिर्दिशेत्।तदानातिपन्नयागःअथवाद
र्शपूर्णाहुतिराज्यभागानंतरंकुर्यात्अयंचतुर्थः पक्षइत्यकृत्वात्मार्तेपिगौण
कालातिक्रमेवक्ष्यमाणंप्रजापत्युक्तंप्रायश्चित्तंकृत्वाप्राप्तकालीनस्थालीपाके
आज्यभागानंतरंअग्नयेपथिकृतेस्वाहेतिपूर्णाहुत्वातत्स्थालीपाकप्रधानहो हुतिं
मादिशेत्संसमापयेत्।मयेदंलिखितंतद्युक्तमयुक्तंवासद्भिर्विचार्यंयाह्यंगौण
कालेपिस्थालीपाकाकरणेप्रजापतिः॥दर्शोवापौर्णमासंवालुप्तोथोभयमेव

वा।एकस्मिन्कृच्छ्रपादेनद्वयोरर्धनशोधनमिति॥॥एतानिदर्शपूर्णमासस्याङ्गी
पाकाद्युक्तानिप्रायश्चित्तानिसर्वेषुप्राकृतवैकृतस्याङ्गीपाकेषुसर्वेघृतहो
मरूढहोमादि क्षपितत्तडुक्तप्रकारेणतत्तन्निमित्तेषुज्ञेयानीत्यलंबहुना॥
कारिकायांपंचमहायज्ञलोपेतु॥तत्तन्महायज्ञलो पनिमित्तंमनस्त्वाच
तुर्गृहीतंहोष्यामीतिसंकल्प्यसंस्कृताज्यंदर्व्यांचतुर्गृहीत्वामनोज्योति॰नस्वा
हामनसेज्योतिषइदं॰ — — — — — — — — बौधायनइदंप्रा
हलोपेपंचमखेषुतु।एतेभ्यःपंचयज्ञेभ्योयद्येकोपितुहीयतेमनस्त्वाऽऽहुति
स्तत्रप्रायश्चित्तंविधीयतइतिकारिका।व्यहंव्यहंवापेतुव्यहंव्यहंवातत्तन्म हा राम
यज्ञलोपनिमित्तंतिस्रभिस्तंतुमतीभिर्होमंच तस्मिंश्चावरुणीनांजपंकरिष्ये २१२
लो२

त तंतुंन्वत्रजसोभानुमन्विहिज्योतिष्मतःपथोरक्षधियाकृतान्॥अनुल्बणंवयतजो
गुवामपोमनुर्भवजनयादैव्यंजनंस्वाहा।उद्बुध्यस्वाग्नेप्रतिजागृह्येनमिष्टापू
र्तेसंसृजेथामयंच।पुनःकृण्वँस्त्वापितरंयुवानमन्वातांसीत्वयितंतुमेतँस्वाहा॥
त्रयस्त्रिँशत्तंतवोयेवितत्निरेयज्ञंयज्ञँस्वधयादधंते॥तेषांछिन्नंप्रत्येतृदधामि
स्वाहाघर्मोदेवांअप्येतुस्वाहा।स्रुवेणहोमःतिसृभ्यएतंतुमतइदं॰।अव
तेहेडोवरुणनमोभिरवयज्ञेभिरीमहेहविर्भिःक्षयन्नस्मभ्यमसुरप्रचेतोराजन्ने
नाँसिशिश्रथःकृतानि॥उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमँश्रथाय॥
अथावयमादित्यव्रतेतवानागसोअदितयेस्याम।इमंवरुणश्रुधीहवमद्याच मे
मृडय॥त्वामवस्युराचके।तत्वायामित्रह्वणावंदमानस्तदाशास्तेयजमानो

हविर्भिः।अहेडमानोवरुणेहवोध्युरुशँसमानआयुःप्रमोषीः।इतिघृतस्रोजपेत्।।द्यूहंवापित्र्यंवापिप्रमादादकृतेषुतु।तिस्रस्तंतुमतीर्दुत्वाघृतस्रोवारुणीर्जँदितिकारिका।। ।।सर्वेषांमहायज्ञानांदशाहंवाद्वादशाहंवालोपेचतस्रभिर्वारुणीभिर्होमंतंतुमतस्यात्तीपाकंचकरिष्येइतिसंकल्प्यान्वाधाने आज्यभागोन्तरंवरुणंचतुर्वारमाज्येनअग्नितंतुमतंचरुणाग्निस्विष्टकृतमित्यादिपूर्णपात्रनिधानांतेग्नयेतंतुमतेत्वाजुष्टंनिर्वपामीत्येवस्यात्तीपाकंश्रपयित्वाआज्यभागांतेअवतेहेडु उडुत्तममिमंवरुणंत्वा मे यामीतितंतृणांअजीगर्त्तःशुनःशेपःसऋत्रिमोवैश्वा मित्रोदेवरातोव राम रुणस्त्रिष्टुप्तत्रतृतीयागायत्रीहोमेविनियोगः।पूर्वोक्ताभिश्चतसृभिरा २१३

ज्यंस्रुवेणऊत्वावरुणायेदमितिज्यजेत्।ततोग्नयेतंतुमतेस्वाहेतिचरुंकृत्वास्यात्तीपाकवत्कर्मशेषंसमापयेत्।दशाहंद्वादशाहंवाविनिहत्तेषुसर्वेशः।घृतस्रोवारुणीर्हुत्वाकार्यस्तु तुमतश्चरितिकारिका॥उपवासपक्षेतु।तन्नमहायज्ञलोपनिमित्तंउपवासंकरिष्ये॥ ।।स्नातकव्रतलोपेतुस्नातकव्रतलोपनिमित्तमुपवासंकरिष्ये॥ ।।एवमष्टकादिकर्मस्वपितन्नकर्मलोपनिमित्तमुपवासंकरिष्ये॥अकृतान्यतमंयज्ञंपंचानांचाष्टकादिषु।उपवासेनशुद्धिःस्यात्सुमंतोर्मतमीदृशं॥स्नातकव्रतलोपेतुप्रायश्चित्तमभोजनमिति।कारिकोक्तानिप्रायश्चित्तानिसमाप्तानि॥ ७ ॥अत्रकारिकातृतीयाध्यायांते।समिदारोपणेपक्षेहोमोविछिद्यतेयदि।आपंचमदि

नादर्वागूर्ध्वंविच्छिद्यतेनलः॥आत्मारोपणपक्षेतुहोमोविच्छिद्यते यदि।आ
घादश्रादिनादर्वागूर्ध्वंविच्छिद्यतेनलइतियद्वाक्यद्वयंकस्मिंश्चित्पुस्तकेलि
खितमस्तितन्निलंबकुपुस्तकेषदृष्ट्वाछोतग्रंथादावप्यदृष्ट्वाच्च॥
अन्वष्टक्याकरणेप्रायश्चित्तांतरमभिधाने।एभिर्द्युभिर्जपेन्मंत्रंशतवारंतु
तद्दिने॥अन्वष्टक्यंयदाभून्येसंपूर्णंयातिसर्वदेति॥अन्वष्टक्याकरणनिमि
त्तप्रत्यवायपरिहारार्थंशतवृत्येभिर्द्युभिरितिमंत्रंजपंकरिष्ये॥एभिर्द्युभिः
कण्वःप्रस्कण्वऊरुष्टोजगती॥अन्वष्टक्याकरणजनितप्रत्यवायपरिहारार्थं
जपेविनियोगः॥एभिर्द्युभिःसुमनाएभिरिंदुभिर्निरंधानोअमतिंगोभिर
श्विना।इंद्रेणदस्युंदरयंतइंदुभिर्युतद्वेषसःसमिषारणेमहि॥इतिमंत्रं

शतवारंजपेत्।आग्रयणादिपाकयज्ञानांमध्येन्यूनमस्याकरणेप्रायश्चित्त
मेवप्रजापतिः।दर्विर्यत्रेषशाकस्यलुप्तमाग्रयणादिकं।लुप्तमप्येकआदि
स्था नःइतिवापाठः।प्राजापत्येनशुन्धेतपाकसंस्तुचेवहीतिएतदनुप्रायश्चित्तानां क्त
श्रवणाकर्मसर्पबलिआश्वयुजीकर्माग्रयणप्रत्यवरोहणप्रायश्चित्तमिति
मंतव्यमित्यलंप्रयोगरत्ने।अमुकपाकयज्ञाकरणजनितप्रत्यवायपरिहारा ण
र्थममुकप्रत्याम्नायेनप्राजापत्यंनिमित्तंप्रायश्चित्तं॥अथपिंडपितृयज्ञे
न प्रणीतानाशेतस्मिँहोमपक्षेसर्वप्रायश्चित्तमेवनपुनरपिप्रणयनंकार्यं
कार्याभावात्।तस्मिन्होमपक्षेपिंडप्रक्षेपपक्षेचसर्वप्रायश्चित्तंकृत्वापुन
र्मंत्रेणातिप्रणयनंकार्यं।

अत्रप्रस

गादापस्तंबीयानामनिप्रणीतनाशेतस्मिन्होमपक्षेअहोमँसर्वंप्रायश्चित्तंच पक्षेवा
त्वापुनर्मंत्रेणाग्निप्रणयनंकार्य्यं।तत्रतस्यपुनरग्नौप्रक्षेपविधानात्॥ ॥पिं
डपितृयज्ञकरणेप्रायश्चित्तं॥पितृयज्ञस्यत्वमावास्यायामनुष्ठानेतत्प्रायश्चि
न त्तत्वेनवैश्वानरश्चरुरेवभवतिपुनःपितृयज्ञःतस्यगौणकालाभावात्॥
सएवचरुर्निर्णयसिंधौपराशरमाधवीयेकात्यायनः।पितृयज्ञस्यचैववै
श्वदेवस्यचैवहि।भोजनेपतितान्नस्यचरुर्वैश्वानरोभवेत् इतिचरुस्था
लीपाकः॥ ॥पिंडपितृयज्ञकरणप्रत्यवायपरिहारार्थमग्नयेवैश्वानराय राम
स्थालीपाकंकरिष्ये॥अग्नयेवैश्वानराय त्वाजुष्टंनिर्वपामीतिसर्वंस्थाली २९५

पाकवत्।अथवापिंडपितृयज्ञलोपेबौधायनापस्तंबमतात्सग्रहेणसन्नहो त्रा
वनुर्गृहीतंजुहुयात्।पिंडपितृयज्ञलोपेसन्नहोतारमितिबौधायनसूत्रात्॥
महाहविर्होतासत्यहविरध्वर्युः।अच्युतपाजाअग्नीत्।अच्युतमनाउपव
क्ता।अनाधृष्यश्चाप्रतिधृष्यश्चायज्ञस्याभिगरौ।अयास्यउज्जाता।वाच
स्पतेहद्धिधेनामन्न॥विधेमतेनाम।विधेस्त्वमस्माकंनाम।वाचस्पतिःसोम
मपातमदेव्यस्तनुश्लेदेमामनुष्यान्नमोदिवेनमःपृथिव्यैस्वाहा।वाचस्पत
ए येब्रह्मणःबौधायनमतोयंहविष्कल्पः॥७॥ इतिश्रीमदारडोपनामकल्प
रा क्षीधरभट्टसूरि नारायणभट्टकृतेगृह्याग्निसौरस्थालीपाकादिप्रायश्चित्त
विषयकनिरूपँसमाप्तं॥ ॥ ग

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ROYAL ASIATIC SOCIETY
LIBRARY